(१)(२)

॥ श्रीगणेशायनमः ॥

काव्यप्रकाशकुञ्जिका। 1
(विद्यासागरी)

ग्रन्थारम्भे विघ्नविघातार्थं स्वसमुचितेष्टदेवतां ग्रन्थकृन्नमस्करोति।

प्रणिपत्य गणाधीशं [illegible] तां चित्तरंतया।
उद्भटं काव्यसाहित्ये मम्मटं च बुधोत्तमम् ॥१॥
कुरुक्षेत्राह्वजनिना - इन्द्रप्रस्थनिवासिना।
महामहोपाध्यायेन - चन्द्रशेखरशास्त्रिणा ॥२॥
वामनाचार्य टीकातः सारमाकृष्य यत्नतः
काव्यप्रकाशस्यनिधेः कुञ्जिकेयं विधीयते ॥३॥

स्वनिर्मितकारिकाः [illegible] व्याख्यातुमिच्छुः महामहोपाध्यायो मम्मटः तत्र स्वाचरणकृतस्य प्रथमश्लोकस्य प्रवतरणिकामाह - ग्रन्थेति। पद्याङ्कैकवाक्यं ग्रन्थः। पद्यलक्षणम् - 'विषयो विधयश्चैव दर्पणः तथोत्तरम्। निर्णयश्चेति पद्याङ्गैः वाक्यं ग्रन्थं प्रचक्षते॥

तस्य प्रारम्भे = प्राक्काले, विघ्नविघातायेति तात्पर्यं चतुर्थ्यन्तपदे हरिं भजतीतिवत्। विघ्नः ग्रन्थप्रतिबन्धकमदृष्टम्, तस्यविघातो विशिष्टोध्वंसः, सर्वत्रोक्तेः तस्मै इतिभावः।

स्वसमुचितेष्टदेवताम् = स्वाराध्यदेवतानित्यर्थः। ग्रन्थकृत् = मम्मटः, परामृशति = स्मरतीत्यर्थः। निमीतकृतेति। निमीतः = प्रसाधारणोचितः, [illegible] तत्कृतो नियमः = [illegible] यत् पद्यावतंतन्नैरन्तर्यविशेषः। तद्विनाम् = तद्विनात्वस्यापन्नदर्शनात्। द्वादैकमयोः = द्वादशानाम् एकस्य च संख्यावाचकः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तथा चैकं वस्तु वस्तुनं प्रस्थं सा रत्नमयी, हादन रत्नमयी इति

सुप्सुपेति समासः । ७८४६, तृतीया । एवंच हादमात्रउचुरामित्यर्थः

[illegible]

ग्रत्नवत्परतंत्रेति । ग्रत्नस्य वाग्मिलस्य परतन्त्रा ग्रधीना [illegible]

भवति तां । नवरसरुचिरामिति । नवसंख्याकाः रसाः

शृंगाराद्यो यस्यां सा नवरसा, सा चासौ नवरसाश्चतारुच

रुचिरा = मनोहरा, तां । नवानां रसानां समाहारः इति समाहार-

समासस्तु नात्र भवति । [illegible] इति

[illegible] त्रिलोकी [illegible] नत्र 'नवरसी' इत्यादयः

ग्रतएव

[illegible] नवरसरुचिरामिति कर्मधारयः । [illegible]

[illegible] व्रलणे

[illegible] । [illegible] निर्मितं निर्णिं [illegible]

[illegible]

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

~~सर्वे वर्णा ए वर्तते । सि इति धातु: जपे प्रति जप: उत्तमर्ष~~

~~उत्तमे~~ ।

~~विपति शम्भेति~~ ।

विपते: ग्रहदशाया: शान्त्या: । स्वभावेन निर्धनं रूपं यस्या:

तादृशी । सुखदुःखस्वभावा पुत्रदुःखे सोहं स्वभाव: यस्या:

तादृशी । ~~यस्या: यस्या: यस्या:~~ । रक्तस्या: एव स्त्रिय:

पुत्रं ~~कान्त~~ इति सुखात्मकत्वं स्वपतौ प्रति दुःखात्मकत्वं

इत्येवं रूपा । परमाण्वादि यत् समवायिकारणं । उपादानकारणं

~~निमित्तकारणं च । स्वगत तत्रूपं इति कर्तव्यं कार्यं समवायि~~

~~कारणं पटत्वं प्रति तन्तुगतं रूपसमवायिकारणं तं प्रति~~

~~पटे वेमादिं निमित्तकारणेति~~ कर्म क्रिया चर्मचर्मादिकं वा

सहकारिकारणं तत्तत्तन्त्रा । बहुरसा । ~~बहु~~ - सुश्यामल-

लवणयुक्त कषाय तिक्ताम्ल रसा, यस्यां तादृशी च तेन

~~तेन~~ कदम्बादीना ग्रहत्वात् । तादृशी ग्रहणी निमित्ते:

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

निर्माणं, एतत् विलक्षणा = एतस्मात् विलक्षणा उद्भूत्य कवि-

वाङ्निर्मितिः = कवेः वाचः यथा निर्मितिः सुनाद्यात्मक चन्द्रादि यथा

अतोऽयं उक्तिः । सर्वोत्कर्षेण वर्तते । जयत्यसौ उत्कर्षेण वक्तृणां

उक्तिष्वयं तेनायं/स्वनिष्ठापकृष्टत्व बोधनं नञ् शब्दार्थः/

इति हेतोः ममटः
तां प्रति उक्तं = ज्ञातो शास्त्र इति लोकेऽपि ।

इङ्गितमेतदिति ।

इदं उक्तात् ग्रन्थे उक्तिमात्रं काव्यं सप्रयोजनं यशः इत्यादि प्रयोजन-

सीतं, उक्तं ग्रन्थकृत् रत्नवृष्टयते/

काव्यमेतदिति ।

काव्यं कविकर्म यशसे कीर्तये, उक्तकृते इदमादिपदं, व्यवहारविदे

उक्तात्, शिवेतरक्षतये उक्तं अमङ्गल नाशाय, सद्यः श्रवणसमनन्तरमेव

परनिर्वृतये परमानन्दाय कान्तासम्मिततया कान्तायाः स्त्रियः

सदृशं तुल्यं/ तदेतदर्थः । उपदेशयुजे उपदेशयोगात् अतीतपुनर्जन्मनः/

काव्यात् रघुवंश कुमार शंभवादिनिर्मितीनां कालिदासादीनामिव

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

यशः श्रीहर्षदेः राज्ञः बाणभट्टादीनामिव धनं धनम् ।

कश्चित् कविः इति बहूनां मतं, यावत्तो वर्णः इत्यनेनाभिप्रायः।

राजादिगतः अनुचितानुचारः पृच्छोपालम्भादिर्वर्णो

व्यवहारः तत्परिज्ञानं राजादित्याद्यैः भगवतः मथुरादिस्थानां

अनर्थनिवारणं स्खलितेषु प्रशस्तिषु प्रयोजनेषु स्खलितेषु

मौलिभूतं प्रधानभूतक्रियापदं। समनन्तरेण वाक्यस्य अनन्तरेण

रसात्मकेन समुद्भूतं विगलितं उत्स्मितं वेद्यान्तरं स्वाति-

रिक्तविषयान्तरं एकोत्पत्तिः। ब्रह्मानन्दं ब्रह्मज्ञानजं ब्रह्मानन्दं

इत्यर्थः। प्रभुसम्मितानि शब्दप्रधानानि पदानि वेदादिशास्त्राणि

तेभ्यः सर्वेभ्यः विलक्षणं सुहृदो मित्राणि तत्सम्मितं

उपदेशतुल्यं, पुराणादीति हासेभ्यश्च विलक्षणं शब्दार्थयोः

औचित्यमात्रेण रसांगभूतो यो व्यापारः तत्प्रधानतया विलक्षणं

यत् काव्यं लोकोत्तरवर्णनानिपुणो यः कविः तत्कर्म

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

कान्तेव स्वीव सरसतायाः उपादानेन निर्माणेन उपभुक्तीकृत्य

संभृतं कृत्वा रामादिवत् वर्तितव्यं न रावणादिवत् इत्यादिकं

उपदेशं च प्रयोजनं यशोलाभं कवेः काव्यकर्तुः सहृदयस्य तत्-

द्वारेण करोति निर्माति इति हेतोः सर्वथा तत्र काव्ये

यत्नोयं विधेयः अभ्यासोपि च परः कर्तव्यः एव्यः। एवं

एवंविधः त्रिभिः हेतुभिः युक्तः काव्यस्य प्रयोजनं निर्माणे समुत्पत्तौ च

उक्त्वा कारणं हेतुभूतं उक्तं सम्प्रति एव्यः।

शक्तिरिति।

शक्तिः कवित्व बीज रूपः संस्कारविशेषः कवित्वं काव्यं सहृदयत्वं च

संस्कारविशेषः केनाराधनादि जन्यं प्रतिभारूपं वासना वा यां

प्रतिं विना, काव्यं न उत्पद्येत न उत्पद्यात्। ~~काव्यं न~~

न सम्पूर्णं वा उपहसनीयं ~~काव्यं~~ दोषवैशिष्ट्यात् उपोद्बलकत्वात्

समोगं,
वोपहा, लोकस्य लोकवृत्तस्य स्थान(अंगभूतस्य शास्त्राणां

छन्दोव्याकरणादिषु शास्त्रेषु काव्यानां कालिदासादि महाकवि-

~~प्रणीतानां~~ काव्यग्रन्थानां, ~~उपजीव्यत्वात्~~ उपजीव्यत्वात् ~~प्रसिद्धानां~~ प्रसि-

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Siddhanta eGangotri Gyaan

भारताद्दीनां विमर्शनात् निचारात् व्युत्पत्तिः दृढतरसंस्कारः

काव्यं कर्तुं निर्मातुं निचारयितुं विवेचयितुं ये

~~जानन्ति~~ जानन्ति तदुपदेशेन करणे निष्पादने भोजने विन्यासे

च यौनः पुनः पुनः पुनर्वर्तनं इति नपः समुदिताः

संमेलिता उत्पत्ति दुष्करकारकत्व व्यापेन कर्तृ व्यता हेतृणारणिकर्मणि व्यापेन

पुलेकं कार्यजनकाः तस्य काव्यस्य निर्माणे रचनायां समुत्लासे

उत्कर्षे हेतुः कर्तृ हेतवः। एकेकं साक्षात्कारिणो।

'तस्य काव्यस्य निर्माणे समुल्लासे उत्कर्षे।

व्युत्पत्तिः शक्तिरभ्यासः त्रयं हेतुर्न हेतवः॥

अत्र हेतुपदं काव्येकदा दुपेजनकतानच्छेदकं समुदायत्वावच्छिन्नकं

~~हेतुजनकता व्युत्पत्तेः स्वतन्त्रयासस्यैव समुदाये काव्योत्पत्तौ~~

~~स्वतन्त्रव्यक्तिरूपत्वाभावात् उत्पत्तेरुत्कर्षस्य~~। उत्पत्ति रुतत्रित्वं मिलितस्यैव

काव्यनिष्ठ कार्यता निरूपित कारणतावच्छेदकम्।

>अस्येति काव्यस्य कारणं निर्माणहेतुमुक्त्वा स्वरूपं लक्षणमाह

~~तदेवाह~~। तदेवाहेति।

अत्र तत्पदं काव्यं परामृशतीति। ~~अत्रैव~~

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

काव्यशब्देन प्रकृतत्वात् । तेन शब्दार्थौ काव्यमित्यर्थो लभ्यते: ।

शब्दार्थयुगलं काव्यमिति यावत् । ग्राम्यत्वादु व्यंजकत्वस्य अपत्राप

यत्वात् । लक्षणावच्छेदक काव्यत्वस्य अपकृष्टत्वाच्च काव्यं

वर्जितं काव्यं रचितं इत्युभयत्रापि व्यवहार दर्शनाच्च ।

एवंविधौ शब्दार्थौ काव्यं । काव्यत्वनिश्चया ये श्रुतसंस्कारा-

दुष्टा दोषा: तद्रहितानिर्गुणभाव: । ये सगुणा इति । माधुर्यौज:

प्रसादाख्या ये गुणा: तत्सहितावित्यर्थ: । गुणानां रसोत्कर्षनिष्ठत्वे-

-पि परंपरासम्बन्धेन तदभिव्यंजकशब्दार्थनिष्ठत्वमिति

भाव: । अलंकृतीनामि । ववापि पुन: अलंकृतीति उक्तिर्यत्

सर्वत्र सालंकारौ क्वचित् अलंकृत्यभावेऽपि न दोष: ।

अलंकृतिकृत्त्वं तूत्पत्त्र रेव दर्शने नास्ति । अनुप्रासोन्मेषि

वत् । ईषत्वं चात्र सद्य: सहृदयसंवेद्यत्वं विवक्षितत्वं स्फुटत्व-

मेव अलंकस्य निरवकृष्टशब्दत्वात् । दोषगुणालंकारा: वक्ष्यंते

दृष्टा । तत्रापि दोषा: अपकृष्टे गुणा: अनपकृष्टे अलंकारा: निरूपिते

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

पत्ते इत्यर्थः । क्वापि इति स्थलगत पाठस्य व्याख्यानं

अत्र सर्वत्र शालंकारौ = शब्दालंकारनिरपेक्षौ व्यञ्जित

क्वचिदेवं तत्र: स्फुटालंकारभावे ऽपि न काव्यत्वहानिः ।

काव्यत्वं न व्याहतं भवति । यथोदाहरणं । यः कौमार

हरः इति । यः कौमारं बाल्यं हरति रूपमेव हि नरे भर्तरि भवति ।

द्वीपते प्रियत्वेन स्वं स्वीक्रियते इति नदः । रशनेन जघनानुरागो

द्योत्यते । चैत्र क्षपाः चैत्ररात्रयः अपि ता एव वाच्याः ।

उन्मीलिता विकसिता या मालती वासन्तिकलता तया

सुरभयः शोभनगन्धाः जैढाः रत्नदीपकाः कटम्बस्य

वृक्षविशेषस्य पुष्पस्य सम्बन्धिनः वापवो ऽपि त एव

सप्तपर्णिकाप्रसिद्धाः सेव न तु दैवन्तं जाया तथापि

तत्र रेवारोधसि केतकि रेवायाः नद्याः रोधसि तीरे

केतक्याः केतकलतायाः तले सुरतव्यापार लीला खेदो

जघन सुरतोत्थ मैथुनस्य या व्यापारः तस्य लीलाखेदश्चे

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

चेतो मनः समुत्कण्ठते उत्कण्ठितं भवति । यत्र -

ग्राम्यत्व पक्षे न कश्चित् अलंकारः स्फुटः इत्यर्थः ।

स्फुटत्वं न भवति पुनरुपमानत्वम् । रसस्य अप्रधान

प्राधान्यात् अलंकारत्वम् । अप्रधान्ये एव तस्यालंकारत्वं

परमार्थतीत्याचार्यः । तद्भेदादिति । यतः साभावे श्रोतृ

विशेषजिज्ञासा उदेति । तत्तद् यत्र काव्यं परामृशति ।

क्रमेण यद्वा इदमुत्तममित्यादृतेति मानः । शेषगुणाभावो

उत्तम काव्ये एव जिज्ञासा भवति यतः तस्य उत्तम -

काव्य लक्षणत्वेन प्रथमं नोक्तम । इदमुत्तमोक्ति । इदं काव्यं

उत्तमं भवते । व्यंग्य व्यंग्यार्थे यदि वाच्यात् अतिशयिनि

वाच्यार्थापेक्षया अतिशयिनि अतिशयोत्कर्ष शालिनि भवति,

इदमेव काव्यं ध्वनेः वैयाकरणैः ध्वनीति कथितः ।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

प्रधानभूतो यः स्फोटः तद्रूपं मत् व्यंग्यं तद् व्यंजकस्य

शब्दस्य महाभाष्यकार पतंजलि प्रभृतिभिः ध्वनीति

व्यवहारः कृतः। ततः तदनन्तरं तथा साहित्यिकैः महाभाष्यानुसारिभिः ध्वनेरपि

मर्मज्ञैर्वाग्भिः व्यवहारितो वाच्यार्थो मुख्यार्थो येन तादृशस्य

व्यंग्यस्य अंजने ध्वनने ध्वनिरूप समर्थस्य शब्दात्मकस्य पुद्गलस्य

ध्वनि मात्रा व्यवहारः व्यपदेशः कृतः इति॥ उदाहरति- यथेति।

निःशेषेति — ग्रहणे मिथ्यावादिनि, क्रियायां शीले, बन्धु

बान्धवजनस्य मद्रूपस्य मित्रजनस्य उद्गतः पीडायाः उत्खात

उद्गमः यया तथाविधे॥ हृदि इति संदेशहरे, न नु सीत

~~मत्सम्पर्कनिरूपणात् इतीत्यनेन मिथ्या प्रलापशीलत्व मेवर्थतोपि~~

~~ध्वनेः~~ त्वयितः सत्सम्भाषात् वार्ता० इति स्मर्तुं गतासीः सि

गमुनः तस्य बहुधाकृतापराधस्य अतएवानाथस्य अनन्य०

समीपं गतासीत्यर्थः। गतास्पेनेति मध्यार्थः।

~~गतासीत्व गतासीत्यर्थः॥ वामीत्यनेनोत्सवमात्र~~

~~प्रवादिकाव्यात् निःशेषेत्यादि। यतस्तव स्तनयोः~~

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

कुन्तकः तदं [redacted] निःशेषं यथास्थानया च्युतं चन्द्रं°

प्रस्तात् तथाभूतं, [redacted] नतु आवितं क्षालितं वा ।

रागं अधरोष्ठः निःशेषं यथा स्यात्तथा मृष्टो रागः यस्य तथाभूतः

ननूत्तरोष्ठः, कामशास्त्रे अधरोष्ठ एव पुम्बनिर्देश [redacted] इतिनात्।

[redacted] किंच नेत्रे चक्षुषी दूरं गात्तभोगे सति

अनञ्जने कज्जलरहिते स्वाभाविके नयनयोः मुद्रणात्

जालसम्बन्धाभावात्। तथा दृष्टं दृश्यमाणं तत् तनुः शरीरं

पुलकिता संजातपुलकाङ्कितं [redacted] यस्मात्तत्

अतः तदनन्तरमेव स्वं गतार्थं इति, अप्रधानपदत्वात्प्राधान्येन व्यज्यते ॥

यथातादृशीति. प्रथमस्य काव्यस्य लक्षणमाह। व्यंग्यं व्यंग्यार्थं

अतिशयिनि वाच्याद्वातिशायिनि, अथवा वाच्यापेक्षया अतिशयितां

चमत्कारालक्षायके सति, प्रधानं काव्यं भवति। तदेव दर्शयति:

गुणीभूतव्यंग्यं काव्यं कथितम्। व्यंग्यस्य वाच्याद्वातिशयत्व

न्यूनत्वेन तुल्यत्वेन चेति त्रिविधः। तत्राद्यमुदाहरति ..

[redacted] उदाहरणमुदाहृतं यथोचितम्।

[redacted] यदनेनेति। [redacted] [redacted] [redacted] [redacted]

CC-0. Lal Bahadur Shastri University. Digitized by Sarvagya Shastra Peetham

उदाहरणे मञ्जरी, तया सनाथो मुखः करोत्यस्यतत्प्रभवं ग्राम्यत्वं

ग्राम्ये एक एव लक्षणः तम्, मुहुः पश्यन्त्याः लक्षणाः मुखरयति

मुखरयतीति
नितरां मलिना भवति । ग्राम्यत्वलक्षणेन सकलयुवतिजनपार्श्वस्थितत्वं

दुर्लभत्वं व्यज्यते । अत्र ग्राम्ये दृढसंकेतेति । स्वयमेव

संकेतं दृष्ट्वा नागतो स्वयमुपतापातिशयो मुखरयतीत्यहेतुः ।

गुणीभूतत्वे हेतुमाह । तादृशेऽपि व्यंग्यापेक्षयेत्यर्थः । वाच्यस्य

मुखरयतीत्यतिशयत्व, चमत्कारः उद्भावकः उक्तः ।

ध्वनिं उदाहरणं वाच्यस्य लक्षणमाह- शब्दचित्रमिति ।

उद्व्यंग्यं व्यंग्यसहितं वाच्यं यत्र उच्चं उदाहरणं स्मृतं, तदेव उदाहरणं

चित्रमिति कथितं चित्रं च द्विविधं शब्दचित्रं वाच्यचित्रं

चेत्यर्थः । चित्रपदार्थमाह- गुणालंकारयुक्तमिति । यत्र

गुणालंकारयोरेव प्राधान्येन चमत्कारित्वेन उद्व्यंग्यमिति ।

यत्र उत्कृष्टतरातिशयि व्यंग्यराहितं, उक्तं- उत्कृष्टतरव्यंग्य-

सद्भावे व्यंग्यमात्राभावे वा चित्रकाव्यं भवति ।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

उदाहरति स्वच्छंदेति। मन्दाकिनी गंगा वः युष्माकं
मलना मङ्गलं पापं वा उज्झतु त्यजतु इत्यतः उज्झतपतु।
कीदृशी मन्दाकिनी इत्यत्राह। स्वच्छन्दं स्वाधीनं न तु बालाद्रि
परतंत्रं। यथास्यात्तथा उच्चलत् उद्गच्छत् उच्चं निर्मलं कुर्वत्
जलप्रदेशस्य कुहरे बिले यातं दुर्बलं तदन्तं बलवत्
पदम्बुजं तस्य यया परंपरा तया सूर्यान् विनश्यन् मोहो
उद्भवो येषां ते ~~अहर्निशं~~ महर्षिभिः हर्षेण निर्दिष्टे कथिते
सूतांत जाहेमं ~ यस्यां तादृशी। उच्चन्द्रु प्रकाशमाना:
उदाराः महान्तो दुर्दुराः मेकाः यासु एवंविधा दृश्यः मन्दराः
पर्वता यत्राश्रिता। तथा दीप्ताः ज्वलिताः उच्चरीका: शालवाड-
बाहुल्येनोद्भटाः ये द्रुमाः वृक्षाः, तेषां द्रोहः पातनं तेन
उद्रेकः ऊर्ध्वप्रसरो येषां एवंविधाः ये महोर्वयः महातरंगाः
ते: ~~मेदुरो~~ निबिडः सघो गर्भः पुनाइ चापल्यं, यत्राः
तत्राश्रेतत्पर्यः। उच्च दकारस्य, महार्ष हर्षेत्यस्य,
उजाहेमाद्रादेत्यस्य, दकारस्य, मन्दमेदेतस्य, चानुप्रासः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

शब्दालंकारः इत्यवांगमिदं काव्यम् । उर्वशि त्रमुपहासति

विनिर्गतमिति । इयग्रीवो दैत्यो विष्णुना हतः स्तिपुराण)

कथाश्रिते हयग्रीव नथ नाम्ने पद्यमिदम् । यं हयग्रीवं

शत्रूणामिनंक्ति यति खण्डयति मित्राणां मानं दृढ़ातीति

मानदः तथाभूतं परमात्मनो मन्दिरात् गृहात् न नु

नगरात्, यदृच्छया स्वेच्छया न नु योद्धुमिच्छया,

विनिर्गतं निःसृतं न नु उभयानत्वां पक्षिणं उपश्रुत्य

कर्णपरंपरया श्रुत्वा, ~~इन्द्रेण~~ ससंभ्रमेण त्वायुक्तेन

इन्द्रेण द्रुतं शीघ्रं पातिता निक्षिप्ता न नु विस्रब्धं

निहता ~~अर्गला~~ न नु कपाटफलकरूपं यस्याः सा तथा

विधा, उभयानली इन्द्रनगरी किल पीता निमीलिते

मुंचुलिते उभिनी नेत्रे यया सा तथाभूतेन अनतीत्यर्थः ।

संजाते अत्र नेत्रनिमीलनं स्त्रीणां स्वभावः । अर्गला न

स्यूतकाष्ठ विशेषो भवति । उत्र निमीलित्यत्र वीप्सेत्युक्तेऽपि

-लंकार ४ । उत्प्रेक्षायां

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

वीररसादयो व्यंग्याः तिरोहिता भवन्ति इत्यर्थः ॥

काव्ये [illegible] महामहोपाध्याय [illegible] विद्यासागरे [illegible]

[illegible] रोहतगी [illegible]

कृतौ काव्यप्रकाशदीपिकायां [illegible] व्याख्यायां काव्यस्वरूपनिर्णयो नाम

प्रथम उल्लासः ॥

अथ द्वितीय उल्लासः

शब्दार्थौ काव्यमित्युक्तं तत्र कतिविधः शब्दः

कतिविधश्चार्थः, इति प्रतिपादयति- [illegible] । शब्दार्थयोः

स्वरूपं विभागश्च । शब्दत्व जातिमत्वं शब्दस्य तद्भिन्नत्वं

चार्थस्य उपरिष्टादेव लक्षणम्।

स्याद्वाचकः [illegible]

अत्र काव्ये वाचको लाक्षणिको व्यञ्जकश्च इति त्रिधा शब्दः

स्यादित्यर्थः। [illegible] काव्ये; एषां वाचक लाक्षणिक व्यंजकानां,

स्वरूपं लक्षणं वक्ष्यते = उपपादयिष्यते। उदाहरणं निदर्शनं [illegible]

[illegible] । वाच्य लक्ष्य व्यंग्या, इत्यर्थः। तेषां वाचक लाक्षणिक

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

व्यंजकानां शब्दानां सर्वाः स्फुटित्वर्थः । । तात्पर्यवृत्तिरपि इति ।

केषुचिदिति षष्ठ्यर्थे सप्तमी । ज्ञानिनेतान्यपदवाच्यैक्यं मीमांसकानां मतं

तात्पर्यऽवृत्तिरपि तात्पर्याख्यवृत्तिरिति वाक्यार्थो ज्ञानं इत्यर्थः

समुत्तम्भतीति इत्यध्याहारः । ज्ञानं जीव इति । इतीत्यपदविशेषणमाकांक्षा ।

वा आकांक्षाविरहे योग्यता । ज्ञानसत्तिः सन्निधिः । यद्वा ज्ञानं जीव इति-

पदजिज्ञासा । योग्यता पदार्थानां परस्परसम्बन्धे

बाधाज्ञानः । के आकांक्षितानां पदार्थानां ज्ञानजन्यधीप्रकारत्वं

सन्निधिः । पदार्थानां पदवृत्तिविषयजातीयानां सम्बन्धे

परस्परसम्बन्धे तात्पर्याऽर्थः । तात्पर्याख्यवृत्ति-

र्जातिपदः, विशेषवपुः वाक्यार्थविलक्षणा शक्तिः । ज्ञानं ।

ज्ञपदार्थः ज्ञपदेनऽवृत्तपदविषयः । वाक्यार्थः पदजन्यज्ञानगम्यः । समुत्तम्भतीति इ

त्यनुभवविषयो भवति । इति ज्ञानिनेतान्यपदवाच्यैक्यं भाट्टमीमांसकानां

मतम् । पदार्थानां वाक्यार्थमाह । वाक्यं त्वेव वाक्यार्थः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvaeva Sharada Peetham

अत्र वाच्यान्तर्गत पदार्थ एवे वस्तुनः। इति व्यतिरेकाभिधान -

वादिनः एते मतमेतन्नबुध्यते। एवकारेणादनादेयत्वं सूचितम्।
सर्वेषामिति। व्यंजकत्वं नकेवलं

शब्दस्य किन्तु तदर्थस्यापि इति सर्वेषां वाच्यलक्ष्य व्यंग्यानां

उक्तानामपि व्यंजकत्वमिष्यते। मन्यते।
क्वचित् उक्तादित्व व्यंजना

मनसंभवति इति आशय इत्युक्तम्। यद्वा प्रधानस्य रसादेः -

व्यंजकत्वमिति आशयः इत्युक्तं उक्तानामपि रत्यादि शब्देन

शब्दानां समुच्चयः इति। तत्र वाच्य लक्ष्य व्यंग्येषु मध्ये

वस्तुनैशिष्ट्यात् वाच्यस्य वाच्यार्थस्य व्यंजकत्व मुद्रा -

हरतीत्यर्थः सर्वेति। मातर्गृहोपकरणमद्य यत्ते
मातर्गृहीति।

नास्तीति साधितं त्वया। तद्भवत्या गृहीपमेवमेव न

वासनस्थायी // इति संस्कृतम्। कस्याश्चित् उपनायक -

संगमार्थिन्या: अन्यथानुपपन्न व्यंजन वहिर्गन्तुं मातः

प्रवृत्तिरियम्। अत्र मातः इत्र मातरीत्यनेनाहेर्ष योग्यत्वं

उल्लंघनीयात्वं च व्यज्यते। गृहे गृहसम्बन्धि उपकरणं

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

इत्यनेन ज्ञानश्रमकता व्यज्यते / अर्थेत्यनेन अर्थेव

सम्यार्थत्वं व्यज्यते / ॥ इति त्वया साधितं उक्तिप्रकारेण

तत्, तस्मात् मम बहिर्गमनमाज्ञापयेति भावत् / कीदृशं

कर्णं वासो (इन्द्रजालानन्दं रम्यं) स्त्रियो नेत्यर्थः / अन्य

स्वैरविहारिणी इयं इति सामाजिकैः व्यंग्यमत्र बुध्यते /

उपपत्ति [illegible] समागमो ऽत्र स्वैरविहारपदार्थः / [illegible]

[illegible] इति यतः स्वैरविहारेच्छायां ही प्रतीयमानायां

शब्दस्य न व्यापारो विरतत्वात् नायकस्य व्यापारान्तरसंभवात्

इति व्यंजकात्व सिद्धिः / [illegible] / [illegible]

[illegible] व्यंजकत्वमुदाहरणीयम् / [illegible] साहेतीति /

साधयन्ती सीव सुभगं, कर्णे कर्णे [illegible] ते /

सदृशान्येव करणीय सदृशं तावत् विरचितं त्वया ॥

इति संस्कृतम् / हे सखि, मत्कृते सदृशं सुभगं

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

प्रतिकर्मं दुना निलाजीति / त्वया तावत् सद्भावः 11

साधुत्वं स्नेहे वात्सल्यं, तयोः करणीयं कार्यं सदृश-

मुचितं विरचितं, इतरत् सद्भावस्य स्नेहस्य च प्रतिकूलं

कार्यं तद् विरचितमित्यर्थः । अत्र प्रत्यक्षानीकृत

प्रकाशताकुलिहादुक्तं निजार्थिकप्रयोगत्वात्, मित्रत्वप्रत्यक्ष

मुख्यार्थस्य बाधात्, सदृशपदेन विसदृशं लक्ष्यते । तत्र

मित्रिपरत्वेन शत्रुत्वात्तस्यैव प्रत्यक्षे इत्यस्य लक्षणया

प्रत्यक्षेत्र कृतानि इत्यस्य हृष्टासि इत्यर्थः । अत्र मुख्यार्थ-

लक्ष्यार्थयोः मित्रत्व शत्रुत्वयोः वैपरीत्यं सम्बन्धः । तेन

च कामुकविषय सापराधत्वप्रकाशनं व्यंग्यम् ।

व्यंग्यस्य प्रभेदाः । व्यंग्यार्थात् व्यंजनमुपकरोतीत्यर्थः ।

गाथासप्तशत्यां प्रकाशते.

उच्छेदः । / उपनायकं प्रति कस्याश्चिदुक्तिरियम् ।

पश्य निश्चलकविपंक्ति विसिनीपत्रे राजते बलाका ।

निर्मलमरकतभाजन परिस्थिता शंख शुक्तिरिव ॥

दूतिं प्रति नायिकया ।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

२१.

बिसिनी कमलिनी खतस्या: पत्रे पर्णे वलाका पक्षिविशेष:

राजते शोभते इति त्वं पश्य। कीदृशी बलाका? नेदृश्यला आस्ते

निष्पन्द अति-मन्दचरण: [illegible] केव राजते?

पिर्गलं स्वच्छं यत् मरकतस्य नीलमणे: भाजनं पात्रं तत्र

पतिता निपतमाना शैवलश्रेणिरिव। शैवलपंक्तिं चलनाद्विनिवर्त्य

पात्रेण। न तु मुखाभ्यां। यत्र यस्मिन्नेवमपि लेशतोऽपि

क्षोभाभाव: तेन निर्जनत्वं गम्यते। यत्र यस्मिन् काले

[illegible] निष्पन्दत्वेन वायुना यदशब्दत्वं=निश्शब्दत्वं,

व्यंग्यमिति शेष:। तेन व्यंग्येन जनराहित्यत्वं निर्जनत्व°

व्यंग्यमिति शेष:। स्खलितमाह यत्र इति। कंचित्पुनि संकेतस्थानं

निलीयं पति इत्यर्थ:। स्खलित् नाधिक्येन उच्यते=व्यंजनया

प्रतिपाद्यते इत्यर्थ:। यत्र [illegible] ?यत्रेत्यर्थ:

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

प्रागतं इतवान् इति व्याकुर्वन्ति गम्यते । वाचकादीनां

वाचक लाक्षणिक व्यंजकानां शब्दानां [illegible] उद्देश्यत्वेन

स्वरूप लक्षणं उक्ते सा जातीति । यः शब्दः साक्षात् संकेतितं

गृहीत संकेतं अर्थं जात्यादिरूपं अभिधत्ते अभिधत्ते स

शब्दः वाचक इत्युच्यते । [illegible] व्याख्याति व्याकरोति इहेति ।

लोक व्यवहारे, [illegible] अगृहीत संकेतस्य शब्दस्य

अर्थप्रतीतेः = अर्थज्ञानस्य अभावात्, संकेत सहायः एव शब्दो

अर्थविशेषं प्रतिपादयति इति यस्य शब्दस्य अत्र पाठात्

संकेतः
अर्थे । संकेतग्रहः इष्यते = उपयुज्यते । स शब्दः तस्य अर्थस्य

वाचक इत्युच्यते । संकेतित इति । संकेतग्रह विषयेऽर्थः

चतुर्भेदः चतुर्विधो भवति । जात्यादीति । जात्यादिना गुणक्रिया -

[illegible] संबन्धतो व

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

जातिरेव संकेतितोऽर्थः । एवमादेश गुणक्रियायदृच्छानां

व्यवच्छेदः । प्रत्ययार्थे । प्रत्ययो द्रव्यगुणक्रियाप्रयोजनं तस्मै का

क्रिया गोरानयनाकृतया तत्प्राप्तिक्रया तन्निर्वर्तकत्वेन

प्रवृत्तिनिवृत्तिविषया प्रवृत्तिनिवृत्तेविषयीभूता व्यक्तेरेव जात्या

न तु जात्याकृतिरिति । तत्रैव संकेतो युक्तः तथापि सर्वासु गोव्यक्तिषु

संकेतग्रहो न कर्तुं शक्यते गोव्यक्तीनामानन्त्यात् शक्तेरो-

पाधिकत्वसंभवात् व्यभिचाराच्च स च व्यभिचारः एवं

यस्यां गोव्यक्तौ संकेतग्रहः कृतः तदतीतेषु गोव्यक्तेः

गोशब्दात् ज्ञानं न स्यादिति रूपः । महा व्यभिचारात्

~~अश्वादिषु प्रसंगात् संकेतग्रहविषयत्वनिर्देशे~~ गवादेरपि

ज्ञानप्रसंगात्, संकेतितस्यैव शाब्दबोध्य इति नियमाभावप्रसंगाच्च ।

तत्र व्यक्तौ संकेतः संकेतग्रहः क्रियते न शक्यते इति

हेतोः [illegible] तत्र दोषाऽक्रम् ।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

नैः शक्ता ~~गौ/गो शब्दः~~ 1 चलो डित्थः इति प्रयोगे गवादिभिः चतुर्भिरपि

शब्दैरेकैव गोव्योऽभिधीयते इति प्रवृत्तिनिमित्तस्य भेदाभावान्

विषयविभागो न प्राप्नोति / विषयविभागाऽभावे गवादिशब्दानां

पर्यायताः इत्यादौ गोत्वेन सम्बन्धित्वेन पर्याप्तया सह

प्रयोगो न स्यात् । उपाधिवादे तु गवादिशब्दानां प्रवृत्ति-

निमित्तानां भेदेन पर्याप्तत्वाभावात् भवति प्रयोगः । उपाधिः

जातिः डित्थः वस्तुधर्मः वक्तृप्रेच्छा संनिवेशितश्च ।

वस्तुनि व्यक्तौ समवेतो धर्मः जातिर्गुणक्रियारूपः वक्त्रा

स्वेच्छया संनिवेशितः संकेतसम्बन्धेन स्थापितः डित्थादिशब्दः

वस्तुधर्मोऽपि डित्थः क्रियाकालः सिद्ध्यं साध्यत्वं । साध्यः

साध्यत्वेन विवक्षितः । संकेतोऽपि डित्थः पदार्थस्य गवादेः

प्राणभृतः सर्वगो व्यक्तिवृत्तिः जातिरीतिभावत् । ~~इदं~~

~~गोत्वं जातिरिति सम्बन्धित्वेन~~ विशेषणत्वहेतुश्च ।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

गुणाकृतीदर्थः। तत्राद्यो जातिः। उक्तं हि गव्यपदीपे- भवृहरिणा

"गौः स्वरूपेण जातिरहित व्यक्तिमात्रेण न गौः। गोत्वनिबन्धनो भवति गौरिति व्यवहारविषयः। तथा सति गौरश्वगौः स्यादिति भ्रमः"।

गोत्वाभिसम्बन्धात्तु गोत्वज्ञानाद्गौरित्यर्थः। गौरिति व्यवहार-

विषयः। द्वितीयो गुणः शुक्लादिना हि गुणेन लक्ष्यमाणं प्राणिव्यवहारयोग्यतां वस्तुव्यक्तिः विशिष्यते। सजातीयेभ्यो व्यावर्तते। अतो जातिगुणाभ्यां महान् भेदः। ~~अतो गुणमात्रात्~~

~~इति हेतुनैवाश्वादयो जातिगुणाभ्यां वर्जिताः~~ साध्यं लक्ष्यमिति-साध्य इति।

साध्यत्वं चोत्पद्यमानत्व मिति शब्दरत्नकारः।

~~साध्यत्वेन इतीयमानत्वं, साधनं वेदवाक्यानीति~~

वर्षीयोऽतानपवः केशपाश इति। पूर्वपदीभूता उपधिकुथणाद्यो

उपवताणान्ताः उपवपवाः पस्य तथाभूतः इत्यर्थः।

~~उपमितप्रतियोगिनः विवक्षितस्य वि विक्षितस्य इत्यनेनोपमानस्य~~

~~तः जातार्थत्वेन [illegible] व्यतुत्पन्नस्य इत्यर्थः~~

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

~~[illegible]~~

~~[illegible]~~

~~[illegible]~~

~~[illegible]~~

~~[illegible]~~ वैपाक(ण)भूषणेप्युक्तम् ।

"साध्यत्वेन क्रिया तत्र चानुप्रेर्तिबन्धना ।

सिद्धभावस्तु पस्तस्याः स धात्वादिनिबन्धनः ॥

~~[illegible]~~

~~[illegible]~~

उपाधिं विशदमति-

~~[illegible]~~ । इत्यादि शब्दानां व्यञ्जनबुद्धिनिर्ग्राह्यं ग्रन्थो

यो वर्णः तद् बुद्ध्या निर्ग्राह्यं निःशेषतो ग्राह्योत्पर्मः ।

संहृत क्रमेति । संहृतः क्रमो वर्णक्रमो यस्य तत् वर्णक्रम-

शून्योत्पर्मः । स्वरूपं शब्दस्वरूपं, वक्त्रा पदच्छेदा

स्वेच्छया इत्यादिपदं उपयित्वेन नामत्वेन संगिवेश्यते

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

कल्प्यत कल्प्यते, इति सोऽयं संज्ञाकर्मो यदृच्छात्मकः

व्यवह्रियते। ~~यद्य~~ गौः शुक्लः चलो डित्थः इत्यादौ

चतुष्टयी चतुर्विधा शब्दानां डित्थादीनां प्रवृत्तिः प्रवृत्तिनिमित्त-

मित्यर्थः। ~~प्रवृत्तिनिमित्तं च~~ यज्ज्ञानात् शब्दे प्रवृत्तिः तत्तथोक्तम्।

तथाच शब्दानां प्रवृत्तिनिमित्तं चतुर्विधमाह ऋक्सूत्रे-

महाभाष्यकारः पतंजलिरित्यर्थः। परमाण्वादीनां त्विति।

~~परमाण्वादि~~ परमाण्वादि शब्दानां जातिशब्दतया कथं व्यपदेशैकशास्त्रे

गुणशब्दत्वेन व्यवहारः? अत उक्तं रूढ्या ~~इति~~ च

परमाण्वादीनां गुणसमुदायत्वात् जातिसादृश्यं भास्वं गुणत्वमित्यर्थः।

जातिशब्दाएवतेवस्तुतइतिभावः।

गुणक्रिया यदृच्छाशब्दानां वस्तुतः स्वरूपतः स्वरूपाज्ञानादेव

व्याप्त्यपेक्षात् भेद इन लक्ष्यते ज्ञायते।। एकस्यानेकप्रतीतौ ~~दृष्टान्तमाह~~।

यथैकस्येति। यथैकस्य गुडस्य रक्तश्वेतादिः गुणो दृष्टः

तैलं तिलजन्यं, ~~दृष्टादृ~~ दृष्टात् व्याप्त्यनपेक्षात् भेद इन

लक्ष्यते ~~न तु~~ प्रथमं। ~~अथवा~~ यथा गुडस्य गुणो दृष्टे दृष्टं

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvasva Sharada Peetham

मुकुरे गुणसदृशं तैले स्नेहश्चेति नानाकारत्वेन भासते

तथैव शुक्लादिगुणेऽपि एक एव शौक्लाद्याश्रयवान् नानात्वेन

स्फुरतीत्यर्थः । महाभाष्यकारसंमतं व्याख्यानं विधत्ते जात्यादीति

जातिरेव वा इति स्वीयं पक्षं मीमांसकसंमतं पक्षमाह

हेमेति । हेमपयःशरादयः येषां ते तथोक्ताः पदार्थाः

वस्तुतोऽभिन्नेष्वपि शुक्लादिषु गुणेषु मद्वशेन शुक्लः शुक्लः

इत्यादि अभिलापानं जायते शुक्लादि सामान्यभूतं जातिरित्यर्थः ।

तथैव संकेतः कर्तुं युज्यते । एवमेव क्रियाशब्देष्वपि ।

गुडतण्डुलादिद्रव्याश्रिताः ये पाकाद्यः स्थिताः तद्वशेन पाकः

पाकः इति अभिलापानुगतयोः एवं बालवृद्धशुकादि-

स्थितेषु, डित्वादिशब्देषु च जनिजन्यमानेष्वपि भिन्नत्वेन

स्फुरतेष्वपि, डित्वत्वादि सामान्यमस्त्येवेति ह्रस्वः सर्वत्र

शब्दानां गौः शुक्लः चलो डित्व इत्यादीनां पक्षान्तरनिरस्तं

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

संकेतविषयः इत्यन्ये पूर्वमीमांसकाः। आप्तवाक्यमेव ~~[illegible]~~

~~[illegible]~~

~~[illegible]~~

अनुमानान्तराण्यपि सन्ति तानि कथं नोक्तानि इत्यत्र। ग्रन्थे

तद्वान् इत्यादि। तद्वान् जातिमान् शब्दार्थः इति नैयायिकाः।

गोशब्दश्रवणात् सर्वासां गोव्यक्तीनामुपस्थितेरनन्तत्वात्

मतम्। उपपदे वा इति वैयाकरणमतम्। ~~[illegible]~~ अश्वादीनां

शब्दार्थ

गवादीनां व्यावृत्तिदर्शनात् अयं तद्व्यावृत्तिरूपः। इत्यर्थः।

~~[illegible]~~ केश्चित् ~~[illegible]~~ उक्तः। परन्तु गोत्वगोत्वेभ्यात् इत्यत्र

अननुपयोगाच्च साधकबाधकदर्शनेन मूले नोदर्शितस्वीकारिरीतिभावः।

स गुरुर्वाच्य इति। स शब्दात् संकेतित उच्चार्यो गुरुत्वः

गुरुत्वेन विशिष्टः। तत्रादौ शब्दव्यापारादनन्तरं योऽर्थो

योऽस्य शब्दस्य

अन्वयधातेन बुध्यते सोऽर्थो गुरुः। तत्र गुरुत्वो व्यापारो वृत्तिः सोऽ

इत्यर्थः। उपपदात्

अभिधीयते। इत्य संकेतितार्थ बोधजनको व्यापारश्चाभिधा

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

बोद्धव्येति। वाचक शब्दनिरूपणानन्तरं लाक्षणिकशब्दो

निरूपणीयो भवति। तत्रापि लक्षणानिरूपणाधीन

मिति लक्षणं लक्षयति- मुख्यार्थेति। मुख्यार्थस्य

(प्रवाहादिस्वरूपशक्यार्थस्य) तयोर्यो

वाच्यार्थस्य, बाधे सति। मुख्यार्थस्य योगे, ~~[illegible]~~ रूढ्यादिना

लक्षणीयेन तात्पर्यानुपपत्त्यादिना सह सम्बन्धे सति

स्वार्थः।

साक्षात्सम्बन्धः सतीति, ~~[illegible]~~ तात्पर्यानुपपत्तिः प्रयोजनाच्च शैत्य-

~~[illegible]~~ पावनत्वादिप्रतीतिरूपफलात् योगोऽर्थः।

लक्ष्यते प्रतिपाद्यते, सा लक्षणेत्यर्थः। सा च लक्षणा

क्रियाव्यापाररूपार्थेतिस्वार्थः।

रूढ्यादिरूपता शब्दे कल्पिता। साक्षात्सम्बन्धेन सा मुख्या

निष्ठा परम्परासम्बन्धेन तु शब्दनिष्ठेत्यर्थः। कर्मणि कृत

दर्भग्रहणादेरौपचारिकत्वादित्यर्थः।

इत्यत्र दर्भग्रहणाद्यौपचारिकत्वात्, 'गंगायां घोषः' इत्यादौ च

गंगादौ तु शब्दावं घोषादि रूढ्याधारत्वस्य रूढ्यसंभवात्

मुख्यार्थस्य दर्भग्राहकत्वादि रूपस्य रूढ्यादि रूपस्य च

[illegible] दर्भग्रहणात् [illegible]।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

बाध्ये सति, विवेचकत्वाऽऽ साम्ये च सम्बन्धे सति। गुणग्राहिणि दृष्टेश्च सामीप्यसम्पेक्षे च संबन्धेसति

प्रसिद्धेरित्यर्थः। गंगातटे घोष इत्यादेः प्रयोगात् प्रयोजनमाह- तथा

पावनत्वादीनां तथा तीरगतत्वेन प्रतिपत्तिः प्रतीतिः

तेषां पावनत्वादीनां दार्ढ्यं तथाप्रतिपादनात्मनः तथा

प्रतिपादनरूपादित्यर्थः। प्रयोजनाच्च मुख्येन असम्बोऽर्थः

लक्ष्यते प्रतिपाद्यते स असंबोधितः शब्दे स्खलितेव व्यापारः

सान्तरार्थविषः असन्तं व्यवधानं तेन सह वर्तते

इति सान्तः लक्षणरूपः, तत्रिष्ठः तद्विषयकः शब्दव्यापारो

लक्षणा। स्वसिद्धये इति। स्वस्य शब्यार्थस्य कुन्तादेः

सिद्धये असम्बन्धसिद्धये, पदार्थेपः परस्य असंबन्धार्थस्य

कुन्तादेः आक्षेपः, उपादानं उपादानलक्षणा

मुच्यते। गंगायां घोष इत्यादौ परस्य असंबन्धस्य

तीरादेः असम्बन्धबोधार्थं स्वस्य शब्दार्थस्य पुनादेः

समर्पणं त्यागः लक्षणं= लक्षणा लक्षणेत्युच्यते। तथाहि

स्वार्थं परित्यज्य गंगात्वादिना तीरादिबोधनादिति भावः।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

एवंच स्वार्थपरित्यागेन परार्थोपस्थापनं उपादान लक्षणम्।

स्वार्थपरित्यागेन परार्थोपस्थापनं लक्षणलक्षणेति यावत्।

एते एव शास्त्रान्तरे अजहत्स्वार्था जहत्स्वार्थेति उच्येते। इत्थं

सा लक्षणा शुद्धैव त्रिविधा उक्ता न तु गौणी। तस्या असम्भवात्।

उपादानलक्षणामुदाहरति कुन्ता इति। कुन्ताः प्रविशन्ति

यष्टयः प्रविशन्ति इत्यादौ तृतीयार्थ शब्देन कुन्तान् प्रवेशय

यष्टीः प्रवेशय इति प्रकृतार्थोपस्थापकस्य तत्तद्विशेषस्य उपादेयस्य

परित्यागस्य। अत्र कुन्तादिभिः आत्मनः प्रवेशोऽर्थः

स्वसंयोगिनः कुन्तादयः आक्षिप्यन्ते लक्ष्यन्ते। ततः

उपादानेन परार्थग्रहणेन इयं उपादानलक्षणेत्यर्थः। अत्र

कुन्तनिष्ठ तैक्ष्ण्यस्य कुन्तनिष्ठ बाहुल्यस्य च प्रकृतेषु

प्रत्ययः प्रयोजनम्। काकेभ्यो दधि रक्ष्यतां इत्यादौ उपादान-

लक्षणायाः उदाहरणं भवितुमर्हति। अत्र काकपदेन दध्युप-

घातकं लक्ष्यते। अन्यथा अत्र उपादान लक्षणया गौरनु-

बन्ध्यः इत्युदाहरणमपि दुष्टमेव स्यात्।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

गौरनुबन्ध्य इत्यादि । अत्र श्रुतिविहितानुबन्ध्यत्व क्रिया

मे अस गो पदार्थस्य जातेः कर्मत्वं स्यात् इति मुख्यार्थबाधः

अतः जात्या गोत्व रूपया व्याप्तेः शक्तिर्लक्ष्यते न तु शब्देन

अभिधीयते । यदाहुः

अभेदयया उच्यते । विशेषणं व्यक्तिरूपं धर्मिणं, अभिधाशक्तिः

क्षीणशक्तिः विरत व्यापारा सती न गच्छेत् इति व्यापारलक्षणा

अण्डनीमिष्टा अमता, अत्र त्रोदाहर्तव्या । तत्र हेतुमाह नहीति ।

अत्र गौरनुबन्ध्य इत्यादौ गवादिशब्दस्य व्यक्तौ लक्षणायां

किमपि प्रयोजनं नास्ति न वा रूढिः सास्नादिषु तदभावात् ।

व्यक्तयविना भावित्वात् = व्यक्तिं विना जातेरभावात्, जात्या व्यक्ति-

राक्षिप्यते अनुमीयते । जाति व्यक्त्याश्रिता; जातित्वादित्यनुमानम् ।

अथवा क्रियतामित्यत्र कर्ता आक्षिप्यते कुरु इत्यत्र कर्मादिकमिति

अविशेषात्र किं गृह्यते । पिण्डो भिद्यत इत्यत्र भङ्ग इति क्रियापदं

आक्षिप्यते । केचित्तु पीनो देवदत्तो दिवा न भुंक्ते इति

यो रात्रिभोजनवानिति लक्ष्यते इति मन्यते । तन्मतं दूषयति

श्रुतार्थापत्तेरर्थापत्तेश्चेति । तस्याः विषयत्वात् । श्रुताच्चब्दात्

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अर्थस्यापत्तिः श्रुतार्थापत्तिः। अर्थादर्थस्यापत्तिः प्राप्तिः अर्थापत्तिरिति

परमार्थः। [illegible] उपादानलक्षणा लक्षणलक्षणा

उदाहरति। गंगायामिति। अत्र तटस्थ घोषाधिकरणत्व-

सिद्धये गंगाशब्दः स्वार्थं प्रवाहरूपमर्थं अंशेन त्यजति

त्यजति, इत्येवमादौ लक्षणेन स्वार्थसमर्पणेन या लक्षणा

लक्षणलक्षणेत्यर्थः। उपचरूपा चेयं शुद्धैव न गौणीत्यर्थः।

उपचारेणामेदप्रतीतत्वात्=अत्र सम्बन्धात्। अत्यन्तं विलक्षणयो-

स्तयोः पृथग्भूतयोः साहश्यातिशयमहिम्ना भेदप्रतीतिस्त्यक्त-

मुपचारपदार्थः। अत्र योः भेदयोः उपादानलक्षणालक्षणयोः

लक्ष्यस्य तीराद्देः लक्षकस्य गंगादेश्च भेदरूपं भेदप्रतीतिरूपं

तादृश्ये भेदसौन्यं नास्ति। किन्तु अभेदप्रतीतिरेवेत्यर्थः।

अत्र भेदबुद्धिं विना प्रयोजनप्रतिपत्तेरभावात्। एतदेव स्पष्टीकरो-

तादात्म्येनेति। लक्ष्यार्थानामित्यर्थः। गंगादिशब्दैः

गंगादिवाचकशब्दैः प्रतिपादने बोध्यमाने सति, तत्प्रतिपत्तौ

तत्वं गंगादित्वं [illegible] प्रतिपादकधिषितस्य प्रतिपादितु-

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अभिधेयस्य प्रयोजनस्य गंगातिरस्थ शैत्य पावनत्वादेः संप्रत्ययः

च तीरादौ प्रतीतिः न तुभेदप्रतीतौ / अभेदप्रतीतिं विना प्रयोजनस्य प्रतीतेः / गंगासम्बन्धमात्रप्रतीतौ तु

'गंगातटे घोषः' इति मुख्यशब्दाभिधानात् - 'मुख्यशब्दप्रयोगा-

योगेऽपि को भेदः को निरोधः नकोऽपीत्यर्थः / सारोपेति /

विषयी ज्ञानोप्यमाणः (गवादिः) विषयः ज्ञारोपस्य ज्ञाश्रयः

वाहीकादिः यत्र यादृश्यां लक्षणायां उक्ते शब्दप्रतिपाद्ये

तथा तेनैव रूपेण / गोत्वजातिकादावपि तत्प्रेणेतिभावः / उक्ते शब्दप्रतिपाद्ये सति इति शेषः /

सा ज्ञन्या शुद्धा गौणी च सारोपा लक्षणोच्यते /

ज्ञारोप्यमाणः ज्ञारोपितुं योग्यः गवादित्वेन

ज्ञारोपविषयः ज्ञारोपाधिकरणं वाहीकादिरित्यर्थः / यत्र

स्पष्टे ज्ञनपह्नुतभेदे निश्चित वैधर्म्ये भवतः तथा

सामानाधिकरण्येन समानविभक्तिकपदाभ्यां निर्दिश्येते

सारोपा

उपस्थाप्येते / सा लक्षणा, सारोपपदवाच्या इत्यर्थः /

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

भेदानाह-

~~विषयविषयीभेदो~~ ~~आरोप्यस्य~~ ~~आरोपस्य~~ ~~तु~~ ~~च~~ ~~च~~: / विषयीति

19

ग्रन्थारोप विषये बाह्लीकादौ, निगीर्णेन आरोप्यमाणेन (गवादिना) ग्रन्थ: कृते निगीर्णे सति साध्यवसानिका साध्यवसान लक्षणा भवतीत्यर्थ: | विषयनिगीर्णेन विषयिणो ग्रभेदे बुद्धिरध्यवसान मित्यर्थ: | तेन सह वर्तते इति साध्यवसाने - त्यर्थ: | उदाहृतं गौरयमिति वक्ष्यते | तत्र विषयिणा गवा विषये बाह्लीके निगीर्णे इति बोध्यम् | भेदाविमाविति | इमौ साध्यवसान रूपौ भेदौ सादृश्यात् सादृश्याख्य - सम्बन्धात्, गौणौ गौणशब्द वाच्यौ तथा सम्बन्धान्तरात: कार्यकारणभावादि रूपात् सम्बन्धात्, शुद्धौ निश्चयौ इत्यर्थ: | सारोपसाध्यवसानौ गौणीभेदावुदाहरति इमाविति आदिना | ग्रारोपाध्यवसान रूपाविति | सारोपसाध्यवसान रूपावित्यर्थ: | सादृश्यमेव हेतु सादृश्याख्य सम्बन्धहेतुको, 'गौर्वाहीक' इति गौणीसारोपामा | उदाहृतं, बाह्लीको नाम देशविशेष, 'वाह्लीकानामते देशा ननत्र दिवसं वसेत्' इत्युक्ते: | पप्रच्छ इति प्रश्निक्त: | ~~बाह्लीकेषु गौर्वाहीक इति~~

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

~~हलवद्विकल्पपुरुषोवाहीकः~~

गवाभिलो बाह्लीक इति बोधात्। गौणीसाध्यवसानामा: उदाहृतं

गौरयमिति। अत्रेदं शब्देन बाह्लीकादे रुपस्थिति: न

तु बाह्लीकत्वरूपेण। शुद्धसारोपाया उदाहृतं अग्नाविन्द्रः

इति। शुद्धसाध्यवसानायास्तु अग्निरेवेदमिति न

अत्र इति। गौर्वाहीक इत्यादावित्यर्थः। स्वार्थसहचारिणो

गोत्वसहचारिणो गुणा: जाड्यमान्द्यादय: लक्ष्यमाणा

लक्षणया बोध्यमाना उपपादयन्ति। परार्थोऽभिधत्ते बाह्लीकाभिधत्ते

उपमिधया बोधेनेत्यर्थः। शक्यतावच्छेदकत्वं

उपयन्ति पर्याप्नुवन्ति इति केचित्। गोशब्दात्

लक्षणया जाड्याद्युपस्थितिः उपमिधया बाह्लीकस्य बोधः

इति परमार्थः। स्वार्थसहचारिगुणाभेदेन परार्थगता

बाह्लीकगता: गुणा: जाड्यमान्द्यादय: एव लक्ष्यन्ते

न परार्थो गोशब्देन बाह्लीकार्थो उपमिधीयते इति

मतान्तरम्। गोगत जाड्य सजातीय जाड्यवान् बाह्लीक:

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

इति शाब्दबोध्यः । साध्यत्वे गुणाश्रयत्वेन इति । साध्यत्वे-
गोनिष्ठ
गुणाः । जाड्यमान्द्याद्याः तदाश्रयत्वेन परार्थं एव वाहीक
एव लक्ष्यते गो शब्देन लक्षणया बोध्यते
इत्यर्थः । स्वोक्तं उपपादयति पूर्वमीमांसक सम्मतिमाह
उक्तं यति । एतन्यत्रेति । कुमारिलभट्ट वार्तिके कृत
मीमांसा सूत्रस्य वार्तिके इत्यर्थः । एतिभिध्येयानिनेति
२.
१ एतिभिध्येयेन पदार्थादिरूपार्थेन एतिना-
भूतं सम्बद्धं (तदादि) तस्य प्रतीतिः प्रतीतिकरणभूतो
व्यापारः लक्षणोच्यते । लक्ष्यमाणा ये गुणाः जाड्यादयः
तैर्योगात् सम्बन्धात् या वृत्तिः गो शब्दस्य वाहीकार्थे-
पदस्यापकता तस्याः गौणता इष्टेत्यर्थः । एतिति लक्षणाया
लक्ष्यतानवच्छेदकाः ये गुणाः जाड्यादयः तैर्न यदि योगः
शब्दस्य सम्बन्धः तदा गौणी वृत्तिरिति परमार्थः । एतिना-
भावोऽत्रेति दीक्षितभट्ट वार्तिके, नान्तरीयकत्वमिति येन
[illegible] यथा जात्यन्तयोः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

~~अन्तरीयकत्वं~~ तथात्र वाच्यार्थे लक्ष्यार्थयो० नान्तरीयकत्वं

किन्तु सम्बन्धमात्रं ~~भविष्येतामिति~~ भाव: । तत्वे हि

नान्तरीयकत्व स्वीकारे पर्यवसन्ना: । मञ्चा: क्रोशन्ति, मञ्चा

हसन्ति इत्यादौ लक्षणा न स्यात् इष्यते तु लक्षणा

मंचत्वं विना क्रोशनादेरसम्भवात् अविनाभावे च ~~अन्यतरेणैव~~

अनुमाप्यौ ~~वक्तृ~~ सिद्धे: लक्षणाया: गंगायां घोष इत्यादौ

तटादौ ~~नोपयोग~~: इत्युक्तं गौरनुबन्ध्य: इत्यादावित्यर्थ: ।

लक्षणास्व सम्बन्धान्तरेण इति व्याख्याति- ~~आयुर्घृतमित्यादेना~~ ।

आयुर्वै घृतमिति वेदेऽपि इष्यते । अत्र घृतं जनकं आयु:

जन्यं जन्यजनकभावस्य सम्बन्ध: तथोश्च लक्षणाया भेद: ।

आयुर्जनकत्वात् घृतमायुःशब्देन लक्ष्यते । ~~आयुर्घृ~~

आयुरस्मिन् ~~अस्ति~~ घृतमिति शाब्दबोध: । आयुर्वेऽडमिति ।

आयुरेङ शब्देन घृतेपत्तिति: न तु घृतत्वाद्धेतोति । ~~अ~~

~~विषयवाक्यस्य सत्यत्वेन~~ अत्र साहश्यात् अन्यत्

कार्यकारणभावाद् सम्बन्धान्तरं ~~इतीति~~ इति शेष: ।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अत्रार्थात्- अग्नेऽसम्बन्धावच्छिन्ना घृतत्वावच्छिन्ना या घृत-

निष्ठा ज्ञाप्यता। तादृशज्ञाप्यतानिरूपिता कार्यता अग्नावनिष्टेत्यर्थः।

एवमग्नावेवेदमित्यत्रापि। अत्र त्वारोपाध्यवसाने कार्यसा(ा)-

मानाधि लक्षणापूर्वं एव भवतः तथा चात्र न सादृश्यादि-

सम्बन्धस्य सत्ता मात्रमपि। अत्र गौर्वाहीकः इत्यादि चतुर्थ्य

उदाहरणेषु मध्ये गौणभेदयोः गौर्वाहीकः गौरयमित्यनयोः

भेदेऽपि वैधर्म्ये आसमानेऽपि तादात्म्यस्य। गौर्वाहीक इत्यत्र तादात्म्यस्य प्रतीति

र्भवति। सर्वत्रैव गौरयमित्यत्र तु सर्वत्रैव गोत्व वाहीकत्वयोः

भेदप्रतीतिं विनैवेत्यर्थः। अग्नेरवगमः अग्नेऽप्रतीति प्रयोजनं

फलं व्यङ्ग्योमिति शेषः। अग्नेऽग्नेरेवेत्यत्र तु सारोपसाध्यवसानयो

रित्यर्थः। अग्नावग्नेर्घृतमित्यत्र अग्नेः वैलक्षण्येन कार्यत्वादि

अग्नेरेवेदमित्यत्र घृतं जीरणादिवत् अग्नेरयं भवति न त्वग्निरिति

इति निश्चयेन कार्यत्वादि प्रयोजनं क्वचित् तादर्थ्यात्

तादर्थ्यरूप सम्बन्धात् उपपदे लक्षणा भवति। अथवा

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

~~इन्द्रशब्दप्रयोजनविचारप्रकारः।~~

इन्द्रशब्दस्य ^ इन्द्रः अग्रेसृ प्रदानत्वं प्रयोजनं व्यंग्यम्।

क्वचित् स्वस्वामिभावात् सम्बन्धात्, यथा राजकीयपुरुषेषु

अग्रमाप्नुयुः। राजेति। अग्रशब्दलक्षणीयाग्रत्वं प्रयोजनं व्यंग्यं,

इदमेव पुंयोगलक्षण्यामिति सूत्रे भाष्यकैयटयोः स्थितम्।

क्वचित् अवयवावयविभावात् सम्बन्धात्, यथा अग्रग्रामो

अग्रवटे अग्रग्रस्त इति। ~~अत्र अग्रशब्दस्य इत्यलक्षणं~~

~~अग्रेति हर्ष इति बलाधिक्यं प्रयोजनं व्यंग्यं इत्यंशीला~~

~~वर्षणि अंगा सम्भोगिनि अंगा इत्युदाहरणेषु अत्र~~

~~संगवटे संगवटं लक्षणीयं~~ क्वचित् तात्कर्म्यात्

तत्कर्मकीर्तनरूपात् सम्बन्धात्, यथा- अग्रतक्षा गोपालादिः

तथा ~~वर्षकिः~~ वर्षकिः। इदं च जातिविशेषावच्छिन्ने रूढं

अत्र तत्कर्मनिपुणत्वादिकं प्रयोजनं व्यंग्यम्। इदमेव

मंजूषायां नागोजिभट्टैरुक्तम्—

"तात्स्थ्यात्तत्रैव तार्कम्यात् तत्साम्मुख्यात् तथैव च।

तत्साद्गुण्यात् तादर्थ्यात् क्षेत्रादौ लक्षणा त्रयी॥"

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तात्पर्यात् यथा ग्रामः चलतीति। तादृश्यात् यथा सिंहो माणवकः। तत्सामीप्यात् गंगायां घोषः। तत्साहचर्यात् यष्टिः प्रवेशस। तादर्थ्यात् इन्द्रार्थस्थूणा इन्द्र इति। तत्र तात्पर्यलक्षणेन व्यंजनामुपसंहरति षड्विधा=शुद्धा, गौणी सारोपा साध्यवसाना उपादानलक्षणा लक्षणालक्षणेति षड्भेदेत्यर्थः। ~~शुद्धा लक्षणा द्वेधा उपादानलक्षणा लक्षणालक्षणा च व्यंजना~~

~~सति हेतौ तत्संबंधे सति प्रयोजनाभावे भेदाधिक्यं तु व्यंजनैव तत्र~~

~~भेदत्रयं इत्युक्तेरिति।~~ एवं उपादानभेदाभ्यां सहेति। उपादानलक्षणा लक्षणालक्षणाभ्यां सहेत्यर्थः। एवं भेदषट्कं प्रतिपाद्य व्यंजनकृतं भेदत्रयमाह। साचेत्यादिना। ~~सा च~~ लक्षणा च व्यंग्येन रहिता कदा प्रसिद्धा भवति। व्यंग्येन सहिता प्रयोजने सति भवतीत्यर्थः। एवं च शुद्धव्यंग्या सव्यंग्या चेति द्विविधा लक्षणेति भावः। शुद्धव्यंग्या रूढिलक्षणा सव्यंग्या प्रयोजनवतीति। विशेषः। प्रयोजनं हि व्यंजनव्यापारगम्येन भवति- व्यंजनरूपे मे व्यापारः तद्गम्येनेत्यर्थः। प्रयोजनं व्यंग्यभेदे कार्यत्वात्।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सर्वांगापि अनिच्छा गूढत्वागूढत्वेन। सहृदयमात्रवेद्यं

गूढं। सहृदयेतरैरपि वेद्यमगूढं। ~~[illegible]~~

~~[illegible]~~

~~[illegible]~~

प्रथमा।
गूढव्यंग्या अगूढव्यंग्या चेति त्रिविधा। ~~[illegible]~~

~~[illegible]~~ व्यंग्यरहिता सृष्टि लक्षणा एकविधा

उक्तद्विविधा प्रयोजनलक्षणा गूढव्यंग्या-~~[illegible]~~

गूढव्यंग्यत्वेन द्विविधा इति मिलित्वा लक्षणा त्रयोदश-

विधा भवति। उदाहरति-
गूढं यथोति/~~[illegible]~~

कश्चित् युवा कान्तिं युवतीमालोक्याह सुश्रुवमिति।

इन्दुवदना या: तनौ शरीरे तस्या: निम्न: ताम्रवर्णस्य

उद्गम: प्रादुर्भावो भवते स्फोतो भवतीत्यर्थ:।

इति वत्स रेवद:

~~[illegible]~~

~~[illegible]~~

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सुश्रुवं वक्त्र विकासितस्मित विकसित स्मित,

स्मितं हास्यविशेषरूपं यत्र तथाभूतं, वेक्षितं अवलोकनं

वशीकृतः वशीकृता वक्रिमा वक्रत्वं येन तथाभूतं भवति:

बुद्धिः उपास्त संस्था अनेन निष्प संचारी जीतम्, । गतिः

समुच्छलित विभ्रमा प्राकट्यभावभेदा । उरः वक्षस्थलं

मुकुलितौ ईषद्मुलतौ स्तनौ यत्र तादृशं जघनं संसर्गेण

उद्भूतं विलक्षणरतिभोग्यं, एतत्सर्वं यौवनोद्भमं गिरति

इति ॥ गूढव्यंग्यपदत्वम् । अत्रत्य श्लोके भाति व्यंग्यानि तानि

काव्यवासनापीयूषकुक्षैः सहृदयस्यैव स्वदन्ते इति गूढानि ।

अत्रत्य गूढव्यंग्यभेदं काव्यम् । अत्रगूढव्यंग्यमुदाहरति अत्रत्यं

अत्रेत्यादिना । श्रीजीव्यादीति । अज्ञाः अनभिज्ञाः अपि जनाः

स्त्रियो लक्षणाः यः पीवरः उभय सञ्चरत्वं तस्मादेव विदग्धानां

चतुराणां यानि चरितानि चरित्राणि तेषामभिज्ञाः ज्ञातारो भवन्ति

स्वयमन्तरुत्पद्यते तत्रार्थान्तरं न्यस्यति- उपदिशतीति । यौवनस्य

अद्भुः तारुण्यहर्षः कामिनीनां स्त्रीणां लालितानि उपदिशति

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

उपदिशति ग्नाविष्करोतीत्यर्थः। ग्नत्र उपदिशतीति पदं

ग्नगूढव्यंग्यं उपदेशकर्तृकत्वस्य चेतन धर्मस्य ग्नचेतने

यौगनभेद बाधात्। ग्नाविष्कारमात्रं लक्ष्यं तेन ललितग्नान

व्यंग्यं तच्च सहृदयैतरैरपि वेद्यमित्यगूढत्व ग्र।

~~शिक्षणाः ग्नयं निर्दिशति इति उपदेशस्यैकं व्यंग्यं ग्नगूढत्वेन~~

~~व्यवहारोक्तेः~~। इदानीं लक्षणायाः त्रैविध्यमुपसंहरति तदेवेति।

तत् तस्मात् कारणात् ग्नव्यंग्यत्व गूढव्यंग्यत्व ग्नगूढव्यंग्यत्व-

रूप भेदकल्पनात् कल्पिता उक्ता लक्षणा त्रिधा रूढौ व्यंग्य शैथिल्येन

प्रयोजने गूढागूढव्यंग्यत्वेन त्रिधा ग्नक्षेपे त्यर्थः। तदेवाह

ग्नव्यंग्ये व्यापिका। इदानीं प्रसंगात् लाक्षणिकं शब्दं लक्षयति

तदाश्रीति ~~च~~ तदाश्रय इत्यर्थः। तत्रेदं लक्षणायाः ग्रहणं तत्र

पावनत्वाद् प्रयोजने व्यापारः शब्दनिष्ठः व्यंजनात्मकः व्यंजन-

स्वरूप इत्यर्थः। व्यंजना च द्वैधा शब्दनिष्ठा ग्नर्थनिष्ठा च

ग्नद्या शब्दनिष्ठा द्वैधा ग्नभिधामूला लक्षणामूला च।

तत्र लक्षणामूलां दर्शयति ग्नस्मेति। यस्य प्रयोजनस्य

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

शीतत्व पावनत्वादेः फलस्य प्रतीतिं व्यञ्जनव्यापारं प्राहुः तु

जनयितुं लक्षणा लाञ्छनम् शब्दः, समुपास्यते अवाप्यते यत्र

व्यंजनात् व्यंजनं विहाय अन्यपरा क्रिया अन्यो व्यापारो न किन्तु

व्यंजनात्मक एव व्यापारः प्रयोजन प्रतिपिपादयिषया प्रयोजनाभिधाने-

च्छया यत्र यस्मिन् वाक्ये गंगायां घोष इत्यादौ, तत्र वाक्ये मुख्यतः

न प्रमाणान्तरात् तत्प्रतीतिः प्रयोजन प्रतीतिः अपितु तस्मादेव

लाञ्छनात् शब्दात्, न च यत्र प्रयोजनविषये अन्यो व्यापारः

अन्यपराक्रियेत्यर्थः। तथाहि नाभिधा समयाभावात् तत्र समयस्य संकेतस्य

अभावात् नैवास्य नैवाभिधा = अभिधाव्यापारो नास्ति, गंगायां

घोष इत्यादौ ये शीतत्व पावनत्वादयो धर्माः तद्बोधो प्रतीयन्ते

न तत्र पावनत्वादौ गंगादिशब्दाः संकेतिताः संकेत-

विषयाः। लक्षणा अपि च न इष्टत्वभावात्। इष्टश्च तत्र मुख्यार्थ-

बाध्यः मुख्यार्थयोगः रूढि प्रयोजनान्यतरश्च तयोरित्यर्थः

~~देहीति। तत्तात्पर्येण इष्टत्वं इष्टत्वं~~

तथा चेति। लक्षणमित्यादि लक्ष्यं तीरादि न मुख्यं गंगादि-

शब्दस्य न शक्यमित्यर्थः। अत्र तीरादौ लक्ष्ये, घोषाधिकरणत्वासंभवरूपो

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

बाधोऽपि न फलेन प्रयोजनेन पावनत्वादिना योगकृतस्य

साक्षात् सम्बन्धस्य फलस्य प्रवाहसमवेतत्वात् । युक्तमन्तर्भाह

न प्रयोजनमिति । स्वतस्तिष्ठन् प्रयोजने प्रयोजनं यन्नयत् प्रयोजनं

नेत्यर्थः । कुतः? प्रयोजनेऽपि प्रयोजनान्तरत्वे यत्नवत्त्वापत्तेः ।

ननु मुख्यार्थबाधादिकं विना लक्षणास्तु यत्र तत्राह

न च शब्द इति । शब्दः लाक्षणिकः शब्दः । गंगादिः स्वलक्ष्यगतिः

प्रयोजनप्रतिपादने विषये प्रच्युतसामर्थ्यो न गंगाशब्दात्

पावनत्वादि प्रयोजनं न प्रतीयते इति न यत्नेन प्रतीयत एवेत्यर्थः ।

इति चेन्न यथोक्तादोषात् । गंगाशब्दः स्रोतसि प्रवाहे सबाधः

इति तटं लक्षयति । तद्धि यदि तेऽपि सबाधः स्यात्

तान् प्रयोजनं लक्षयेत्, न चात्र तटे मुख्योऽर्थः नापि

यत्र बाधः न च गंगाशब्दार्थस्य तटस्य पावनत्वादेः

साक्षात् सम्बन्धः नापि प्रयोजने लक्ष्ये किंचित् प्रयोजनं

नापि गंगाशब्दो मुख्यार्थबाधादिकं विना तटं प्रतिपादयितुं

असमर्थः । किन्तु मुख्यार्थबाधादिकं विनैव

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

प्रयोजनस्य लक्ष्यत्वं स्वीकारेऽपि दूषणमाह। अवश्यनवश्येति।

ननु गङ्गायां प्रयोजनेऽपि लक्ष्ये प्रयोजनान्तरं तच्च तीरनिष्ठशैत्य-

पावनत्वे लक्ष्ये घोषनिष्ठं पावनत्वादि व्यंग्यमेवेति यदि ब्रूयात् तत्र

अवश्यनवश्येति। अवश्यनवश्या

इदं वक्तव्यं। अवश्यनवश्येतिः या च मूलप्रकाशिनी। ~~अवश्यमेति~~

प्रयोजनं नेत्यत्रापि ~~तत्र प्रयोजनान्तरे~~ तथापि

प्रयोजनान्तरे इति मूलप्रतिः स्यात्। अयमर्थः प्रयोजन-

परम्परया लक्षणास्वीकारे मूलभूतलक्षणाप्रयोजनयोरिति यदि

न स्यादिति भावः। ननु शब्देन केवलं प्रयोजनं लक्ष्यते किन्तु

पावनत्वादि प्रयोजनमुख्येन तटं लक्ष्यते गंगायास्तटे घोषः

इति प्रयोगापेक्षया अधिकस्यार्थस्य पावनत्वादिविशेषस्यापि

प्रयोजनं फलीभूतं विशेषे पावनत्वादि मुख्ये तटे लक्षणात्तु

किमर्थमित्यत्रार्थे व्यंजनमेवमाह- प्रयोजनेनेति। लक्षणीयं

लक्षणाजन्यज्ञानविषयः, तटं प्रयोजनेन पावनत्वादिना सोष्टं

न युज्यते। ~~तत्र यदि लक्षणाजन्यज्ञानेन प्रतीयमानत्व-~~

~~स्यात् तज्जन्यस्य लक्षणाजन्यज्ञानस्य~~

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

इत्याह ज्ञानस्येति | यथा ज्ञानस्य विषयः ज्ञानादन्यः तथा ज्ञानस्य प्रत्यक्षमपि ज्ञानादन्यत् भवति | प्रत्यक्षज्ञानयोः समसमयसमुत्पत्तेः रसम्भवात् | तत्र दृष्टान्तमाह प्रत्यक्षादेरिति | इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षं तदादेः नीलादिर्विषयः प्रत्यक्षं प्रकटता संविन्निर्वा | अयमर्थः- घटज्ञानात् ज्ञातो घटः इति प्रत्ययात् घटे ज्ञाततापरनाम्नी प्रकटता जायते इति पूर्वमीमांसकमतम् | तार्किकमतेन संविन्निरीति | अयमर्थः घटज्ञाने जाते घटमहं जानामि इति अनुव्यवसायापरपर्यायात् संविन्निष्ठघटज्ञानात् जायते एवं ज्ञातृधर्मः संविन्निः प्रत्यक्षादि- ~~ज्ञानवत् तार्किकैः प्रत्यक्षमुच्यते | एवं प्रत्यक्षज्ञानं नैवं प्रत्यक्षं~~ ~~प्रत्यक्षं ज्ञानं भिन्नं एवं मतं युक्तम्~~ तथा लक्षणात् जन्यं ज्ञानात् तत्प्रत्यक्षं पावनत्वादे ज्ञानस्यापि अनुभवत्वमेव बोद्धव्यम् | ~~कुतः तौल्यं [illegible] तेषामेव भिन्नत्वे सति वर्तमानत्वेन~~ ~~ज्ञानमेव भिन्नत्वे~~ तौल्यत्व पावनत्व ज्ञानयोरभेदे जन्यजनक- भावानुपपत्तेः | तस्मात् ~~[illegible]~~ शेत्य पावनत्वादेः लक्षणाविषयत्वं दुरुपपादम् | ~~[illegible]~~

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

एवमुक्त्यैव विशिष्टे लक्षणा तु भवत्येव नेति पुनरुक्तम्।

लीयते, लक्षणया बोधिते, तयोस्तु विशेषः पावनत्वादयः [illegible]

च = व्यापारान्तरंचेत्यर्थः। व्यञ्जनध्वननादीति। आदिना प्रसादनसूचनादिग्रहणम्।

अर्थात्- तटादौ ये पावनत्वादयो विशेषास्ते अभिधया तात्पर्य

लक्षणा वृत्तिभ्यो व्यापारान्तरे व्यंजन प्रकाशनध्वनन-

द्योतनादि शब्देन बोध्याः। एवं लक्षणामूलं व्यंजकत्वमूलं

व्यंजकत्वं च व्यंजनैव नान्यत्। अभिधामूलं व्यंजकत्वमाह

अन्येनैवार्थस्येति। अन्येन एव अन्यो यस्य तस्यान्येनार्थस्य शब्दस्य

अन्येनात्र गृहीतशक्तिकस्येत्यर्थः। वाचकत्वे संयोगादेर्हि

निर्यन्त्रितं सति अन्यवाच्यार्थः अभिधया ज्ञातियादयितुमशक्यः

तद्बोधकृत्व = तत्प्रतीति हेतुः या व्यापृतिः व्यापारः सा

संजनं व्यंजनेनेत्यर्थः। अन्यति संयोगादिना नियन्त्रिताभिधया

बोधयितुमशक्यार्थस्य बोधने प्रभवन्ती वृत्तिर्व्यंजना [illegible]

इयं हि अभिधामूला शाब्दी व्यंजनाभिधीयते। [illegible]

[illegible] ननु श्लेषवत् अभिधावृत्तेव द्वितीयार्थग्रहः स्यात्

इति शंकायां [illegible] वाचकत्वे इति।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

संयोगादिना व्युदस्यावत् व्यंजनाऽऽ नियंत्रयतामिति वाच्यं

संयोगादिकमुल्लंघ्य बोधकत्वेनैव व्यंजनायाः सिद्धेः।

~~व्यञ्जनया मुनिर्वक्तीत्यत्र प्रयोजनं मुनिगतं भवान् वक्ति~~

~~इत्यभिधाने प्रयोजनस्य तुल्यत्वात् विवक्षायाः प्रयोजकत्वं~~

~~उदाहरिष्यतो ग्रन्थस्य [illegible] संयोगाद्यैः~~

वाचकत्वनियामकत्वे भर्तृहरिसंमतिमाह- संयोगेत्यादिना।

संयोगः सम्यक् योगः प्रसिद्धः सम्बन्ध इति यावत्। विप्रयोगः

प्रसिद्धिविभागः, साहचर्यमेककालदेशावस्थायित्वं विरोधिता

सहाननस्थानं ~~[illegible]~~ प्रयोजनं, वक्तव्यं, वक्तृश्रोतृबुद्धिस्थता।

लिंगं पदपदान्यावृत्तयो धर्मः। शब्दस्यान्यतः सन्निधिः

समानार्थकशब्दान्तरसन्निध्यादेः। सामर्थ्यं कार्यता।

प्रकृतिः योग्यता। देशः कालो वा तद्विशेषो व्यक्तेः

लिंगं स्त्रीपुंस्त्वादि। स्वराः उदात्तादयः। उदात्तस्यानु-

दात्तस्य स्वरितस्य च त्रयः स्वराः' इति पाणिनीयशिक्षोक्तेः।

एते शब्दार्थस्य संदेहे सति [illegible]

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स्मृति हेतव:। विशेषस्य विनर्जितार्थस्य या स्मृति र्दीयते

तद् हेतव: तज्जनका: भवन्तीत्यर्थ:। इत्युक्तोदेशा इति

अवृद्धी त्रोत्र कालिकेत्यर्थ: । संयोगादीनां क्रमेणो दाहरणानि

प्रदर्शयति । सँशरत्वत्रु इति । एशरन वत्रु इति उभयत्र

हौपधस्य विष्णौ नियमनम्। शमत्कृमणाविति दाशरथौ राज्ञे।

शमत्रुना गतिरस्तेति। शमो मार्गव एव न तु दाशरथि:

एजुनेदेन च कार्तवीर्य एव न तु पाण्डव:। स्वयं भज

अनविच्छेद- एत्र स्वयं पदेन शिवे नियमनम्। स्वयं जानाति

देवदेव
देव: इति। राजाने नियमनम्। कुपितो मत्कृच्छ्रज: इति

मकृच्छ्रजस्य क्रमे नियमनम्। देवस्य पुरारते: एत्र पुरारातेः

शब्दस्य रांभाँ नियमनम्। अधुना मत: कोकिल: इति मधु-

शब्दस्य वसन्ते नियमनम्। जातु वो इतिजातुषं इति मुष-

शब्दस्य साम्मुख्ये नियमनम्। भात्मन परमेश्वर: एत्र

परमेश्वर शब्दस्य राजनि। चित्रभानुर्विभाति इति चित्र

भानुपदस्य दिने क्रत्वो रात्रौ वह्नौ नियमनम्। मित्रं भजे

प्रीतौमित्र मित्रशब्दस्य सुहृदि मित्रो भवतीति रत्नो

CC-0. Lal Bahadur Shastri University. Digitized by Siddhanta eGangotri Gyaan

सूत्रे नियमार्थम्। 'इन्द्रशत्रुः वर्धस्व' इत्यादौ स्वरस्य वेदे एव

काव्येषूक्तानादीनांनार्थविशेषनियामकत्वमित्यर्थः।

व्यञ्जकविशेषनियामकता न तु काव्ये। ^ एवंच ग्रहणात् व्यभिचारस्य

नियामकत्वं सदा एवेति।

"एतावन्मात्रस्तनिमा एतावन्मात्राभ्यामधिकत्राभ्याम्।

एतावन्मात्रावत्या एतावन्मात्रेदिमे:। इति संस्कृतम्।

निरूपणादिनि नाथके नापेक्षावत्त्वं बोधयन्त्याः कस्याश्चिदुक्तिमीक्षणं।

एतावन्मात्रौ स्तनौ यस्याः तथाभूता एतावन्मात्रे व्यधिकपत्रे

यस्याः यया: लक्ष्मा सधिकपत्राभ्यां उपलक्षितेत्यर्थः।

~~एतावन्मात्रे दिमे: परिच्छिन्नमित्यर्थो व्यभिचारदुःख~~

विशेष संसृति हेतवो भवन्ति इति शेषः। इत्थं संयोगादिभिः

व्यञ्जनान्तराभिधेयकत्वे नियमिते प्रतिपादिते सति

एतेनार्थस्य शब्दस्य मत्वर्थीयात् व्यञ्जकात् बोधनं

तत्र नाभिधा। संयोगादिभिः व्यभिधाया नियमनात्।

मुख्यार्थ बाधाद्यभावात् लक्षणापि न व्यञ्जनं तत्र

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

व्यंजनमेव व्यापारः । अभिधामूलां शब्दव्यंजनामुदाहरति

प्रेर्यति । कस्यचित् शब्दो वर्णनं प्रेरयति । यस्य राज्ञः कृतः

पाणेः ततं दानस्य सम्बन्धि यदुदकं जलं तस्य सेकेन

सुभगः शोभनोऽभूत् । कीदृशस्य यस्य? भद्रः शोभनः

आत्मा यस्य तथाभूतस्य, दुरधिरोहा तनुः शरीरं यस्य

विशाले महति कुले वंशे वा उन्नतिः शक्तिमत्त्वं वा

यस्य कृतः, विहितः शीलमुत्तमानां वर्णानां संग्रहो येन अनुपप्लुता गतिः

ज्ञानं यस्य परान् शत्रून् वारयतीति य-

वारः तस्य शत्रुनिवारकस्येत्यर्थः । अभ्राकरिणि राज-

पक्षे च यस्य गजस्य करः शुण्डादण्डः ततं भद्रजात्येव

सुतः अभूत् । कीदृशस्य? भद्रात्मनः भद्रजातीयस्य दुरधि-

रोहतनोः उच्चत्वात् दुःखाधिरोह्यशरीरस्य, विशालव-

त्, उन्नतिरुच्यता यस्य कृतशीलमुत्त संग्रहः कृत-

भ्रमः संग्रहस्य, अनुपप्लुतगतेः अनुद्धतगमनस्येत्यर्थः ।

अत्र राजा वन्द्यो द्विरदो वंशगः यतः अभिधायाः

भद्रात्मनः इत्यादिशब्दानां राज्ञि नियन्त्रणेऽपि सहृदयानां

[illegible] सा व्यंजनमेवेति भावः ।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

व्यंजना च द्वेधा शब्दनिष्ठा अर्थनिष्ठा च। आद्यापि द्वेधा

अभिधामूला लक्षणामूला च। तत्राभिधामूला यथा च

अग्नात्मन इत्यादि। लक्षणामूला यथा गंगायां घोष इत्यादौ।

व्यंजनं निरूप्य संप्रति व्यंजक शब्दं लक्षयति। तद्युक्त इति।

तद्युक्तः शब्दो व्यंजक इति कथ्यते। ~~तद्युक्तमिति~~

~~संज्ञक शब्देन व्यंजनं यस्मादृश्यते तेन तद्युक्ते व्यंजको~~

~~तद्युक्त इति~~। सहकारितया अर्थस्यापि व्यंजकत्वमस्तीत्याह—

~~तत्~~ यत् स इति। यत् यस्मात् कारणात् स शब्दः

अर्थान्तरयुक् अर्थान्तरेणयुक्तः सन् व्यंजको भवति सर्व

अर्थो ऽपि शब्दसहकारितया ~~व्यंजकत्वं~~ शब्दसहकारेण

व्यंजको यतः सम्मत इत्यर्थः। शब्दस्य प्रतिवृक्षसहत्वात्

शब्दमूलकत्वेन व्यपदेशः। अर्थोऽपीत्यपि शब्देन शब्दस्य

समुच्चयः। इति काव्य प्रकाश टीकायां परीक्षाकृपायां

शब्दार्थ स्वरूपनिर्णयो नाम द्वितीय उल्लासः ॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

शब्दव्यंजनां प्रतिपाद्य अर्थ व्यंजनां प्रतिपादयितुं ध्वनेर्मं स्मारयति अर्थेति इति। तेषां वाचकादिशब्दानां अर्थाः वाच्यादयः पुरा वाचकादय-स्तदर्थाः स्फुटीत्यत्र शेषाः कथिताः। [illegible] अर्थव्यंजकता उच्यते।

कीदृशी सा? इत्युच्यते- वक्तृबोद्धव्येति। यः परबोधनाय वाक्यमुच्चारयति स वक्ता। स च कविः तन्निबद्धो नायकादिश्च। बोद्धव्यः बोधनीयः पुरुषः, काकुर्हि तद्भावोऽत्र विवक्ष्यते शब्दानां पदानां समूहो वाक्यं शक्योऽर्थो वाच्यः अन्यस्य वक्तृबोद्धव्यौचित्यस्य, सान्निध्यं प्रस्तावः प्रकरणं, देशो विजनादिः, कालो वसन्तादिः अर्थशब्दग्राह्यत्वेनोक्तिः। तेषां वैशिष्ट्यात् सम्बन्धात् प्रतिभाजुषां काव्यवासना-परिपक्वबुद्धीनामित्यर्थः। सहृदयानामिति भावः। या अन्यस्यार्थस्य द्योतः अन्यो अर्थः व्यंग्यरूपः तद्बुद्ध्यर्थो अर्थस्य वाच्यलक्षणव्यंग्यरूपस्य, व्यापारः का अर्थैः व्यंजनेति सूत्रार्थः। [illegible] वक्त्रादि वैलक्षण्यहेतुका या

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तिभाशालिनां मन्यार्थ चौः, तद्धेतु व्यापारत्वं ग्रस्याः स्वरूपम्।

वक्त्रादीनां संकरे यस्याप्राधान्यं तन्मूलको व्यवहारः

'प्राधान्येन व्यपदेशा भवन्तीति न्यायात्। क्रमेणोदाहरणानि

ववत्राङ्कवंशिकृत्य क्रमेणोत्पर्णः। ग्रन्थिपिहलमिति।

'स्फीतपृथुलं जलकुम्भं गृहीत्वा समागतासि सखि त्वरितम्।

श्रमस्वेदसलिलनिःश्वासनिस्सहा विश्राम्यामि क्षणम्॥

इति संस्कृतम्। स्फीतशयेन पृथुलं महान्तं जलपूर्णं कुम्भं

गृहीत्वा हे सखि त्वरितं शीघ्रं समागता [illegible]

[illegible] ग्रस्मिन् ग्रहं, श्रमस्वेद सलिल निःश्वास निस्सहा श्रमात्

यौ स्वेदसलिल निःश्वासौ तान्यां निस्सहा चलितुमक्षमा,

सलिलत्वात्तस्या स्वेदबाहुल्यं व्यज्यते। ग्रतः क्षणं विश्राम्यामि

विश्रामं करोमीत्यर्थः। ग्रत्र ईदृश जलकुम्भवहनजन्यश्रमः

ग्रस्मे नान्यस्मै शंकिष्ठा। इति भावः। परन्तु प्रमाणान्तरेण

ग्रस्मत्तोऽन्यगते सति व्यभिचारीति वक्तुं वैशिष्ट्यात् इयं

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

वोर्पेण कृतं रतं गोपयति इति साभाजेकाङ्क्षति व्यंग्यमिति भावः।

बोद्धव्यवैशिष्ट्यात् वाच्यस्य व्यंजकत्वमुदाहरति- ग्रैष्मिण्या दृष्टि

ग्रैष्मिण्यं दैर्बल्यं, चिन्तालसत्वं सोनिःश्वसितम्।

अत्र मन्दभागिन्याः कृते सारवे, त्वामपि ग्रहह परिभवति ॥

कृते यत्कृतम्। हे सारवे, सोनिःश्वसितं निःश्वासमोहितं,

ग्रैष्मिण्यं गर्मनिद्रत्वाद्, अत्र मन्दभागिन्याः कृते त्वामपि

परिभवति पीड़यति, [redacted] मां तु परिभवत्येव।

[redacted] मत्कार्यार्थं गम्यागमनादिना कामुकप्रसादने

निरतां त्वामपि इत्थंपरपुरुषः। ग्रतएव असतीति सम्बोधनम्।

ग्रत्र इतौ बोद्धव्ये, तस्याः स्वकामुकोपभोग [redacted] कर्तृत्वेषा

[redacted] तिरस्कारयति, इति साभाजेकान्

क्षीत व्यंग्यम्। काकुवैशिष्ट्यात् वाच्यस्य व्यंजकत्वमुदाहरति

तथाभूतामिति। वेणीसंहारे द्रौपदीं के [redacted] प्रत्युक्तिरियम्।

गुरुः युधिष्ठिरः इत्थं खिन्ने म्लानमुखे मयि विषण्णे खेदं भजति,

कृष्णे दुर्योधनादिषु ग्रत्यन्तं रुष्टे विधुरावस्थामपि खेदं

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

न गच्छति इति सेयदृशः काक्वर्थः। रेवतकाद्यभाद्दृ तामभूतां रजस्वलां, दुःशासनाकृष्टवसनकवपाशां, नग्नौ किमग्रगामिनि यावत्। नृपसदसि = राजसभायां न नु यत्र कुत्रचित् पाञ्चालस्य द्रुपदराजस्य तनयां न नु यस्य कस्यचित् नाद्दृशीं दृष्ट्वा वचो व्याप्तैः सद्दृ वल्कलधरैरस्माभिः न नु वानप्रस्थाद्दिक्षीभिः यत् सुचिरं बहुकालमुषितं तत् विराटस्य राज्ञः गृहवासे गृहे गृहनुचितं यत् सूदादिकर्म तदारभ्ये निभृतं गुप्तं यथा स्यात्तथा दृष्टेत्यर्थः। अत्र काकुवैशिष्ट्यात् अपि न भोग्यं मात्सर्यं कुरु नु भोग्यं इति व्यज्यते। ~~अत्र गुणीभूतव्यंग्यमिदं नु [illegible] निवर्तयति~~ न चेति। वाच्यस्य वाक्यार्थस्य शान्तिरिव रेवद्भजनरूपस्य सिद्धिः पर्यवसानं तदंगं तत्कारकमित्यर्थः। अत्र काकुः इति गुणीभूतव्यंग्यत्वं न शंकयं प्रश्नमात्रेणापि काकोः विश्रान्तेः। वाच्यार्थस्य पर्यवसानात्। अन्यथा अत्र काकोः ~~अव्यंग्यत्व~~ वाच्यसिद्ध्यंगत्वं न ~~[illegible]~~ ग्राह्यं तु

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ग्रभजति इति प्रश्नमन्त्रोपस्थापनाद्वारेण वाक्यवैशिष्ट्यात्

वाच्यस्य व्यंजकत्वमुदाहरति । तरसा त्वरया इति ।

नाहं तस्य गण्डस्थलनिमग्नां दृष्टिं नीनैषीरन्यत्र ।

इदानीं सैवाहं नौ चक्रवाकौ न सा दृष्टिः ॥

इति संस्कृतम् । तदा यदा सा कामिनी मत्सोत्रभवासीदित्यत्र

निमग्नां ननु पतितां इदानीं तस्याः गमनकाले सैव

तथैवस्थैव लोचनचकोपालौ न सा दृष्टिः श्लाघा

~~प्रतिनेयमात्~~ किन्तु ग्रन्यैव, ~~सा दृष्टिः विपरीतभाव~~

चलितायां तु तस्यां ग्रन्यैवाभूत्, ~~निर्भिन्नेव क्षिप्तेव भीता~~

~~इत्यर्थः~~ ते ते प्रच्छन्नकामुकत्वमिति व्यंग्यम् । वाक्यवैशिष्ट्यात्

वाच्यस्य व्यंजकत्वमुदाहरति । उद्देशोऽयमिति । नायिकां

प्रति रत्नार्पिजः कामुकस्योक्तिरियम् । हे तन्वि, ग्रन्यं नर्मसखाः

तत्नामकं नद्याः उद्देशः ग्रप्रदेशः रत्नवतः । कीदृशः ? सस्यानां

स्निग्धानां कदलीनां श्रेण्याः या शोभा तया ग्रतिशयितः

तया कुंजानां लतागृहाणां उत्कर्षेण गुंजन्मधुकरीसहितः

कुसुमसमृद्धादि वचनेन व्यंकोसलः ग्रप्रसिद्धोत्पादितः रत्नवतः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

विश्रमो मत्र तादृशः, किंच यतस्मिन् प्रदेशे मानिनीमान-
भंजने ते युक्तिप्रयोक्तारः सुरतस्य सुहृदः वाता वान्ति। येषां
वातानामग्रे मनोभूः कामः कीलितो धृतः युद्धकाण्डे युवयोरे
निमिनाभावे पीडयति। योगो येन तादृशः सन् सरति चलति
इत्यर्थः। अत्र तन्वीत्यनेन कन्यत्वं वेदनावत्त्वं रतौ चिरंत्वं
व्यज्यते। नर्मदेत्यनेन नर्म क्रीडां ददातीति नर्मदा न नदी-
मात्रमिति दिक्। अत्र रतार्थं सुरतार्थं प्रविशतीति
अन्यासिकामाः प्रेष्यं तत्सामाजिकान् प्रति व्यंग्यम्। अत्र प्रसंगविशेष-
प्रेक्षणत्वात् नाट्यस्य व्यंजकत्वमुदाहरति। णोल्लेइ इति।

नुदत्यन्तर्हसनाः श्वश्रूः सार्थं गृहभरे सकले।
क्षणमात्रमपि संध्यायां भवति न वा भवति निश्रामः॥

इति संस्कृतम्। अत्रार्थे युक्तरूपं मनो यस्याः सा
युक्तमनाः युक्तेन श्रमापनोदव्याजालम्बनेनापि नानन्दाशा इति
व्युत्पत्तेः। श्वश्रूरित्यनेन युक्तनिष्कृपणीयाशता सकले समये न तु मानसं कार्यम्
गृहभरे गृहकार्यनिर्वाहे मां नुदति प्रेरयति सति यदि क्षणमात्रं
विश्रामो निश्रान्तिः भवति तर्हि संध्यायां [illegible]

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarayu Sharada Peetham

उपलभ्य तत्रापि न भवत्येव चरणसेवादि व्यग्रत्वादिति चरवपते।

अत्र 'संध्या संकेतकालः' इति तटस्थं उपजीव्यं प्रति मत्

संकेतसमय बोधनं तत्सामाजिकान् प्रति व्यंग्यम्। प्रकृती-

वैशिष्ट्यात् वाच्यस्य व्यंजकत्वमुपपद्यते। सुवनइ इति।

श्रूयते समागमिष्यति तवप्रियोऽद्य प्रहरमात्रेण।

एवमेव किमिति तिष्ठसि तन्वि सखि सज्जय करीषम्॥

इति संस्कृतम्। अत्र प्रहरमात्रेण तवप्रियः नायकः समागमिष्यति

इति श्रूयते तत् तस्मात् कारणात् हे सखि एवमेव तदीय-

भोजनादि व्यापार शैथिल्येनैव किमिति किमर्थं तिष्ठसि

करीषं इन्धनादि कार्यं सज्जय साधय। अत्र उपेक्षयेन

न तु कालान्तरे तत्रापि प्रहरमात्रेण न तु निश्चयेनेति

व्यज्यते। ~~अत्रापि इति इदमो दर्शनात्~~ श्रूयते इति वर्तमान-

निर्देशेन न तु श्रुतमित्यत्र उपपत्तिं प्रति उपजिव्यज्ञानस्य

वैशिष्ट्यम्। निवर्तते इति किंचित्कालस्था सखी पत्यागमन-

कथनेन उपजिव्यनिषेधं करोति इति सामाजिकान् प्रति

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

व्यंग्यम् । देशवैशिष्ट्यात् व्यंजकत्वमुदाहरति— अत्रेति ।

भो सखेः इमं कुसुमानां पुटपाणौं अवनयावं हस्तेनादाय

अत्रान्तरे इतो इदे कुरुष्वम् । अत्र अनेन चेष्टेशो अनीश

अहं करोमीत्यर्थः । अहं इदं इमिनुं गन्तुं न समर्था न

शक्ता अयं अंजलिः करसंपुटः वः युष्मभ्यं रचितः

कृतः प्रसीदत, यूयं प्रसन्ना भवत । अत्र विविक्तो विजनोऽयं

देशः तस्मात् प्रच्छन्नकामुकः उपपतिः त्वयापि सार्धता

श्रेयसीमिति उपचारिं प्रति कयाचित् सख्या

देशवैशिष्ट्यात् व्यज्यते । कालवैशिष्ट्यात् व्यंजकत्वमुदाहरति

गुरु अग्रेति ।

प्रवासं गन्तुमिच्छन्तं नायकं प्रति नायिकायाः उक्तिरियम् ॥

गुरुजन परवशा प्रिय किं करोमि तव सन्निधागिनी अहकम् ।

अद्य प्रवासं व्रजसि व्रज स्वयमेव श्रोष्यसि कर्णाभ्याम् ॥ इति संस्कृतम् ।

अत्र व्यंग्यमाह— अद्य वसन्त समये यदि व्रजसि तदाहं तावत्

न मरिष्यामि न जीवामि तव तु गतिं न जानामि इति

सहृदयत्वात् इति व्यंग्यम् । उदाहरति श्रेष्ठोदीति ।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

गृहणीमिति शेषः। चेष्टा वैशिष्ट्यात् व्यंजकत्वमुदाहरति।

दोषान्तेति। अये दोषान्तस्य द्वारसमीप देशस्य निष्टंके

सान्निध्ये सति सौन्दर्यसारोऽया तया नायिकया अस्मद्युगं

प्रेरितस्य ब्रह्मणे परस्य समासक्तं अन्योन्य संलग्नं सामासाद्यं

कृतं शिरोंशुकं शिरःसम्बन्धिवस्त्रं पुरतो ज्ञातः ज्ञातं ज्ञानेन

गूढमागच्छेति व्यंजितं तदनन्तं यदे चंचलो लोचने अधः क्षिप्ते

संज्ञापिते अनेन सूर्यास्त समं संकेतस्थाना इति ध्वनितं। तत्र

तस्मिन् काले वाचः वचनस्य प्रसङ्गं निवारितमनेन कोलाहल-

रहितं यथा स्यात्तथा गन्तव्यमिति द्योतितं। ततः दोर्लते

भुजलते संकोचिते संकुच्य प्रियः संयोजिते, अनेन अङ्गसंग-

जातोषक आलिंगनं कृते कारिष्यामीति ध्वनितम्। अत्र

चेष्टया प्रच्छन्नकान्तविषयः अङ्गनिशेषः स्वाभिप्रायः

अङ्गालिंगनादि विषयकः चेष्टा वैशिष्ट्यात् सहृदयान् प्रति व्यंग्यः।

निरांकांक्षप्रतिपत्तये प्रत्येकं किञ्चित्कहेत्यादीति शिष्यधियाया-

निवृत्तये, दूत्यर्थः। प्राप्तावसरं तया च पुनः पुनः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

उदाहियते उदाहरणं दीयते । वक्त्रादीनां वक्तृ बोद्धव्यादीनां

मिथः संयोगे द्वयोः संयोगे विके वैशिष्ट्यं त्रयाणां संयोगे

त्रिक वैशिष्ट्यं उभयेन क्रमेण लक्ष्य व्यंग्ययोः द्वयोरपि

व्यंजकत्वप्रदर्शनार्थं = उदाहरणान्तरमभिधेयं सेयमित्यर्थः । त्रिक

वैशिष्ट्यात् वाच्यस्य व्यंजकत्वं यथा । उन्नत रात्र त्रिक

इत्यादौ । इदानीं शब्दस्यापि सहकारितया व्यंजकत्वं दर्शयति ।

शब्दप्रमाणेति । यतः यस्मात् कारणात् शब्दप्रमाणेन वेद्यः

प्रतिपाद्यितो ऽर्थः वाच्यलक्ष्य व्यंग्य रूपः उन्नतत्वं व्यंग्यत्वं

व्यनक्ति बोधयति तत् तस्मात् कारणात् उन्नतत्वे व्यंजकत्वे

शब्दस्य सहकारिता अपेक्षेत्यर्थः । प्रमाणान्तर वेद्यो ऽर्थः

व्यंजको नहि भवति यतः उन्नतत्वं स्वव्यंजने शब्दसाहाय्य-

मपेक्षते । एवं शब्दो ऽपि उन्नतत्वं साहाय्य अपेक्षते इति उभयरूपं काव्यस्य

व्यंजकत्वं निर्वहतीति ॥ इति काव्यप्रकाश टीकायां पदीजाख्यायां

सर्व व्यंजकता निर्णयो नाम तृतीय उल्लासः ॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अथ चतुर्थ उल्लासः

यद्यपीति । शब्दार्थयोः काव्यत्वे शब्दार्थयोः निर्णये कृते दोषगुणालंकाराणांमध्ये दोषाणां हेयता गुणालंकारयोश्च उपादेयता ज्ञायते इति तेषां स्वरूपमाख्यातव्यम् ।



अत: सम्मति, पूर्वं दोषादिनिरूपणात्पूर्वं काव्यभेदात्=ध्वन्यादिकाव्यभेदात्, प्राह प्रदर्शयति उपविवक्षितेति । उपविवक्षितं अनुपयुक्तं वाच्यं वाच्यार्थो यत्र तादृशो भो ध्वनि: तत्र तात्पर्यं ध्वनौ वाच्यं वाच्यार्थ: उपर्यन्तरे संक्रामितं उपस्थापितं तिरस्कृतं वा भवेदित्यर्थ: । लक्षणामूलेति । लक्षणामूलं यत् गूढव्यंग्यं तस्य प्राधान्ये सत्येव उपविवक्षितं न वस्तुनिष्ठं वाच्यं यत्र स ध्वनि: काव्यं भवतीति शेष: । तत्र च उपविवक्षित वाच्ये ध्वनौ, क्वचित् अनुपयुज्यमानत्वात् प्रकृते उपनिबन्धनत्वात्, उपर्यन्तरे वाच्य लक्ष्य व्यंग्यरूपे त्रिविधे लक्षणामिति यावत् यत्र वाच्योऽर्थ:

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

प्रकारान्तरेण लक्ष्यो भवतीत्यर्थः। यथा काकेभ्यो दधि रक्ष्यतामित्यादौ वाच्योऽर्थः काकः तद्रक्षणप्रतिबन्धरूपेण लक्ष्यः। उपलक्षितं संकेतितं वाच्यं ध्वनिमुद्घाटयति यथेति। त्वामस्मीति। यतो यत्र विदुषां पण्डितानां समवायः तिष्ठति तत् तस्मात् हेतोः त्वं उज्जयिनीं स्वकीयां मतिं बुद्धिं मात्थाप स्थापीकृत्य स्थितिं निश्चेष्टां कुरु इत्यहं त्वां प्रति वक्ष्मि उपदेशामीत्यर्थः। अत्र लक्ष्यं दर्शयति अत्रेति। [अत्र वचनाद् उपदेशादिरूपतया वाक्यमिति इति लक्ष्यं तेन च हितसाधनत्वं व्यंग्यं उज्जयिनी त्यागे उपहसनीयत्वं च व्यक्तिः प्रकृतानुपयोगितया वाच्यं उज्जयिनं तिरस्कृतं भवति। यथा गंगायां घोषः इति। उपलक्षितं वाच्यं ध्वनिमुद्घाटयति। उपलक्षितमिति। बहुभिरुपलक्षैः तथमानस्य

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अम्माट:। त्वया यत् बहु उपकृतं तत्र विषये निगद्यते

किं वाच्यं बहुत्वात् वक्तुं न शक्यते इत्यर्थः। भवता

यं सुजनता प्रथिता उच्चारिता ते सर्वे ततः पश्चात्

सुजनता प्रथिता तस्मात् इदृशेन सदा निरयत् कुर्वन्

शतं वर्षाणां शतं शतवर्षजन्तं सुजीवतं अवेक्षमाणं मया

स्मरता त्वया तिष्ठेति मुख्योऽर्थः स च प्रकरणादिना

बुद्धौ बाधितः सन् विपरीतं लक्षयति। तथा उपकृतं

बहु त्वं निगद्यते कुजनता प्रथिता भवता यस्मै।

विदधदीदृशमेव सदा ऽसौ जीवितमास्व ततः शतं शतम्।

इति योजयति। उपकारातिशयो व्यंग्यः उक्तिभङ्गयन्तरं

ध्वनिं लक्षयति- विवक्षितं इति। यत्र मुख्यं ध्वनौ,

वाच्यं वाच्योऽर्थः निरुक्तं वाचकत्वोपेतं

उक्तम बोध्यविशेषः। उदाहृतं व्यंग्यनिष्ठं यत्र

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

विवक्षितान्यपरवाच्य ध्वनीकृतम् । विवक्षितान्यपर

वाच्यध्वनि० विभजते । रसादीति । विवक्षितान्यपरध्वनि-

श्चेत्यर्थः । केवलं ध्वनिर्वचनीय चमत्कारकारी रसः

रसलक्षणक्रम व्यंग्यः । रसति वाच्यव्यंग्ययोः क्रमो यत्र न

लक्ष्यते इत्यर्थः । रसस्तु लक्ष्यव्यंग्य क्रमः लक्ष्यक्रम-

व्यंग्य इत्यर्थः । तत्र लक्षणक्रम व्यंग्यः पुनर्म शब्दार्थोभय-

शक्तिमूलकत्वेन त्रिविधः । तत्र शब्दशक्तिमूलत्व

द्वौ भेदौ वस्तु अलंकृतिरीति । अर्थशक्तिमूलकस्य

द्वादश भेदाः । वक्ष्यन्ते । उभय शक्तिमूलकः रस इति

पंचदश ध्वनिभेदाः । षडेकैकेशाई कृत भेदास्तु सर्वेषां

समाना इति न गण्यन्ते । न रसस्यति । केवलं विभावादयः

रस रसः रसस्तु रसस्तेरभिव्यज्यते । तथा च तौत्पत्तिकेन

हेतुत्व कथनात् व्यंग्य व्यंजकयोः रसविभावयोः

शतपत्रभेदवत्

पौर्वापर्य क्रमो भाति परन्तु वाच्यवत् न लक्ष्यते ।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

न इत्यर्थः। व्यङ्ग्यक्रमं विभजते रसेति। रसाः शृङ्गारादयः

भावाः रत्यादयः तदाभासाः रसाभासा भावाभासाश्च। भावस्य

व्यभिचारिभावस्य शान्तिः प्रभृतिर्यस्य स व्यङ्ग्यः व्यङ्ग्यक्रम

इत्यर्थः। स च रसाद्यलंकारात् रसवदाद्यलंकारात् भिन्नः

~~प्रधानतया~~ अलंकार्यतया प्रधानतया स्थितः व्यङ्ग्यः ईदृशो रसादिर्यत्र

ध्वनौ स्थितः सोऽत्र व्यङ्ग्यक्रम व्यंग्यो ध्वनिरिति भावः। व्यादिग्रहणात्

भावोदयः भावसन्धिः भावशबलत्वानि बोध्यानि। प्रधानतया यत्र

रसादिः स्थितः तत्रालंकार्यः यथा शृङ्गं वामदृशामित्यादौ। व्यङ्ग्यत्र

तु गुणीभूत व्यंग्य इत्यर्थः। प्रधाने ~~अप्रधाने~~ अङ्गीभूते वाच्यार्थे

यत्र व्यङ्गभूतो रसादिः तत्र गुणीभूत व्यंग्ये व्यङ्ग्यं अस्यातीत्यर्थो

इत्यादौ रसवदादयो व्यलंकाराः। तदुक्तं ध्वन्यालोके प्रधानेऽत्र वाच्यार्थे

यत्राङ्गं तु रसादयः। काव्ये तस्मिन्नलंकारो रसादिरिति मे मतिः॥

ते च रसवदादयः गुणीभूत व्यंग्यनिरूपणे उदाहरिष्यन्ते

तत्र भावादिमध्ये रसत्वमुपपादयति इदमित्यादि। इदं रसभावादिमध्ये रसत्वमुपपन्नं

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

रसलक्षणमाह कारणान्येवेति / स्थायिनः रत्यादेः ललनादि-

विषयक प्रीत्यादेः लोके व्यवहारे, यानि कारणानि ललनाद्युद्दीपनानि

उद्दीपनपदाभिधेयानि / उच्चैः यानि कार्याणि कटाक्षभ्रूक्षेपकेश-

कास्फिसृक्प्रभृतीनि यानि च सहकारीणि रत्यादेः जनने सहायभूतानि

निर्वेदादीनि / तानि नाट्यकाव्ययोः चेत् काभिः निबध्यन्ते

तत् तदा क्रमेण विभावाः अनुभावाः व्यभिचारिणः कथ्यन्ते /

एतत्तत् कारणानि विभावाः कार्याणि अनुभावाः सहकारीणि

व्यभिचारिणः इति कथ्यन्ते रसज्ञैरिति शेषः / विभावादिभिः

व्यवहिपन्ते इति यावत् / तैर्विभावाद्यैः व्यक्तः व्यंजनया

प्रतिपादितः स स्थायिभावः चित्तवृत्तिविशेषः रसः स्मृतः कथितः

ध्वनिकारादिभिरिति शेषः / ~~यद्यपि स्थायिनि विभावादि सहकारिकारण-~~

~~चित्तवर्ति रसस्य उपचारादिति विवक्षितं तत्र तु मुख्यं~~

~~चित्तवर्तिभिः कारणैरेव रसोत्पत्तिरिति मतं तन्मतमिति तत्रैव~~

~~एतन्मतमिति तेषां यथा तावत् रसस्य तेषां चित्तवर्तित्वं मतं~~

यथा खलु नानाव्यञ्जनसंस्कृतं भक्तं भुञ्जानः पार्थिवेन जनभूयते तथात्र

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

37

विभावाद्यंश इति। उक्तेऽर्थे ~~अस्तमुनि सम्मतिमाह~~ उक्तहेतौ।

अस्तेन नाट्यशास्त्रमेऽनुमतिनेत्यर्थः। विभावादिभिः संयोगात्

सम्बन्धात् रसस्य निष्पत्तिः प्रकाशो भवति इति सूत्रार्थः।

इदञ्च भरतसूत्रं तद्वीकाकृद्भिः भट्टलोल्लट शंकुक-

भट्टनायक-अभिनवगुप्तपादैश्चतुर्भिः क्रमेण मीमांसाव्याप

संख्य चित्रतुरंगन्याय सीत्या चतुर्धा व्याख्यातं तत्र भट्ट-

लोल्लटप्रभृतयः सूत्रमिदमेवं विवृण्वते स्थायिनां विभावैः

लक्षणाख्यैः ~~उत्पाद्य~~ आलम्बनकारणैः उद्दीपनाख्यैः

~~अनुभावैः~~ कटाक्षभ्रूक्षेपप्रभृतिभिः कार्यैः व्यभिचारिभिः

निर्वेदाख्यैः सहकारिभिश्च संयोगात् उत्पाद्योत्पादकभाव

रूपात् सम्बन्धात्, रसस्य निष्पत्तिः क्रमेणोत्पत्तिरभिव्यक्तिः

~~ज्ञप्ति~~ भवति। तत्र व्याख्याने ~~भट्ट~~ यथा चित्रतुरंगेऽपि

सर्वतो वल्गितत्वात् दाम्नोऽपि गतिरस्तीति तथा सीताद-

विलम्बिनो ~~अनुराग~~ रूपा रामरतिरभिव्यमानाऽपि नर्तके

~~[illegible]~~ ~~अनुकार्ये~~

CC-0. Jangamwadi Math Collection. Digitized by eGangotri Sarvagya Shastra Vimarsh Kendra, Varanasi

रामादावेव रसनिष्पत्ता सामाजिके रसनिष्पत्त्यभावात्

सामाजिकानां चमत्कारानापोद्यरितमस्तिष्कमनोभि निधाय शंकुक-

मतमाह रामस्तथेत्यादिना । रामस्तथावर्णं, उन्नमनेन नाम इति इयं

सम्भवप्रतीतिः/ न रामोऽयमिति उद्भावकादिके बाधे रामोऽयमिति

मिथ्याप्रतीतिः/ ~~[illegible]~~ रामस्यादा न वायमिति

~~[illegible]~~ मयकोटयवलम्बितत्वेन संशयप्रतीतिः रामसदृशोऽयमिति

सादृश्यप्रतीतिः/ ~~[illegible]~~ यथा चित्रे तुरगोऽयमिति

चर्वोन्मप्रतीतिचतुष्टय ~~[illegible]~~ विलक्षणाप्रतीतिरेवेति तथा

रामोऽयमिति प्रतिपत्त्या ~~[illegible]~~ ग्राह्ये विषयीकृते सति उन्नमिनेतरि सेयमिति

सेयं जानकी मम मनसः सकाशात् लोचनगोचरं गता इयं

मनस्येवासीत् इदानीं कोऽपि इयेत्यर्थः/ ईदृशी उन्नमेषु

नैकस्मिन्नंगे सुधारसस्य उन्नभूतरसस्य क्वय वृष्टिः

~~[illegible]~~ कर्पूरस्य यः पूरः तत्शलाकिका कर्पूराञ्जनवर्तिका

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

शरीरी मूर्तिमती मनोरथस्य श्रीः सम्पत्तिरित्यर्थः। ~~[illegible]~~ सम्भोग शृंगारमुद्दीपयति विप्रलम्भ शृंगारमुद्दीपयतीति देवा- दिति। अद्यार्द्धं देवात् भाग्यात् ऋतु स्वेच्छया तया अनुभवे- कनेय समागम सुरक्षा, चपले चंचले आयते दीर्घे च नेत्रे प्रस्पा: तत्कामुकता, विपुलस्तन इव अविरला निविडा विलोला: सर्वदिक् संचारिणो जलदा: मेघा: यत्र एवंविधोऽयं काल: प्रावृट् समय: समुपागत:॥ इत्यादि काव्यस्य यत् अनुसन्धानं साक्षादिव करणं, तेन नयनीनामपि रसास्वादु: उपपन्न: तस्य बलात् सदभ्यासात् शिक्षया उपदेशेन अनुभवेन पुन: पुन: अनुशीलनेन च निर्वर्तितं सम्पादितं यत् स्व- कार्यसाधिनयस्य प्रकरणं प्रकाशनं तेन। करणधार्म- सदृक्षीभि: कृत्रिमैरपि वस्तुतोऽसदृशिरपि, तया अनाधिकृत- भावै: कृत्रिमत्वेनागृहीतैरित्यर्थः। विभावादि शब्दोपदेश्यै: संयोगात् सम्बन्धात्, अनुभूयमानोऽपि सहृदयैरिति शेष:। तच्चानुभवनमेव रामोऽयं सीताविषयकरतिमान् सीताविषयक- कटाक्षादिमत्वात् अहमेवं तत्रैवं प्रवर्तेति।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

वस्तुतो ऽनुभूयमानाभा। रतेः, सौन्दर्यं चमत्कारिता

तद्बलात् रसनीयत्वेन आस्वाद्यमानत्वेन अन्यो योऽनुभूयमानो

विषयः तस्मात् विलक्षणः स्थायित्वेन तत्र नटे अनुसन्धीयमानोऽपि सम्भाव्यमानो सामाजिकानां

सहृदयानां वासनया इच्छया चर्व्यमाणः पुनः पुनः पुनः

अनुसन्धीयमानः आस्वाद्यमान इति यावत् रसो भवतीति इति।

इतन्मतस्य अन्यं सारः। यथा कुज्झटिकाकुलिते देशे

अग्नेरनुपलभ्यमानात् धूमस्योपलभ्यमानात् धूमनिष्पत्तस्य वह्नेरनुमानं

तथा नटेनैव अभिनेये विभावादयः इति प्रक्रियातः तत्र

अनुसन्धीयमानविभावादिभिः तन्निष्ठा रतिरनुभूयमानाऽपि

निजसौन्दर्यबलात् सहृदयानामास्वाद्यतया चमत्कारमाधत्ते

रसतां प्राप्नोतीति रतेरनुमितिरेव रसनिष्पत्तिरिति। परमेत-

त्किन्तु व्याख्यानेऽपि प्रत्यक्षमेव ज्ञानं चमत्कारजनकं नानुमित्यादि

रिति लोकप्रतीतिं विरोध्य। इत्यरुचिं मनसि निधाय

भट्टनायक मतमुपन्यस्यति- * न तावत्स्येति।

अत्र मते प्रत्यस्मात्प्रभृतयः पदार्थाः। नटो रामादिनामक

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सहृदयश्चेति / तेषु विभावत्वेन कृतमात्मनं रसः प्रतीयतां

मित्यांशकम ग्राह्य / न तटस्थेनेति / तटस्थः उदासीनः स च

नटो रामादिश्च तात्सम्बन्धित्वेनेत्यर्थः / नात्म गतत्वेन

सामाजिक सम्बन्धत्वेन न प्रतीयते ग्रनुभूयते तदानीं

रामादेरभावेन तद्रत्यादेरप्यभावात् / ग्रनुमितौ ऽनुमाना-

विषयत्वात्, वस्तुतो रामगतया नटगतत्वेनानुमितमपि

रत्या सामाजिके ग्रनुभूयमानतया तत्समत्वात् जननासंभवाच्च

नोत्पद्यते न जन्यते, विभावादीनामभावात् नाभिव्यज्यते

न व्यंजनयोपस्थाप्यते, सिद्धस्यैव तत्सम्भवात्, ग्रभिधातः

तत्क्षणातस्य द्वितीयेन भिन्नेन विभावादि साधारणीकरणात्मना

भावकत्व व्यापारेण, भाव्यमानः साधारणीक्रियमाणः

स्थायिभावः सत्त्वोद्रेक प्रकाशानन्दमयी या संवित् तया,

या विघ्नान्तरैर्यान्तर सम्पर्क रहितं, तत् सतत्वेन तत्स्व-

रूपेण भोगेन भोजकत्व नामक व्यापारेण, भुज्यते विघ्नी-

भूयते इति / सच्चोद्रेक [illegible] रूपेण

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarayagya Sharada Peetham

प्रमाणाभावो ज्ञानमविरीति। श्रीमदाचार्याभिनवगुप्तपादा-

मतमुपन्यस्यति- लोके प्रमदादिभिरिति। लोके

काव्यनाट्य भिन्नस्थले प्रमदादिभिः प्रमदोद्यानकटाक्ष निर्वेदादिभिः,

ज्ञाने ज्ञानालम्बनो दीपन कारण कार्य सहकारिभिरित्यर्थः।

स्थायिनो रत्यादेरनुमाने, ज्ञानाभ्यासस्य पुनः पुनरनुशीलनस्य, यत्

पटुत्वं नैपुण्यं तद्वतां काव्ये दर्शनादिरूपे, नाट्ये ज्ञभिनयकुशले

नटकर्मणि, तैरेव प्रमदादिभिरेव, कारणत्वादि व्यापारेण कारणत्व-

कार्यत्व सहकारित्व व्यपदेश वीत्यागेन, विभावनादि व्यापारवत्त्वात्

ज्ञानादिपदेन ज्ञनुभाव व्यभिचारिणोर्ग्रहणम्। ज्ञलौकिक विभावादि-

शब्दव्यवहार्यैः लोके हर्षशोक कारणेभ्यो हर्षशोकावेव जायेते,

काव्ये पुनः सर्वेभ्य एव हेतुभ्यः सुखमित्यलौकिकत्वम्।

यत्ते विभावादयः त्रयेव प्रमदसम्बन्धिनः, ज्ञमुकस्येवेति विशेषः

न त्रयेव ममुकस्येति वीप्सा तेषामनवधेयत्वसामात्

ज्ञनिर्णयात्, साधारण्येन कामिनीत्वादिना प्रतीतेः सामान्यैः

ज्ञभिव्यक्तैः [illegible]

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

संस्कार शब्देन स्थितः स्थायी स्थायिभावो रत्यादिको

~~भट्टनायक~~ नायकः निश्चयतो यः ज्ञाता रसप्रतीतिकर्ता च

तद्गतत्वेन तत्सम्बन्धित्वेन साधारणीकरणबलात् साधारणः

य उक्तो विभावादिः तद्बलात् तत्कार्यं रसास्वादकालं

निर्वर्तितो यः चर्वणाभिधः प्रमातृभावः, अमुनैतेन ग्रन्थेन रसास्वा-

दयिता रत्नेवं रीत्या योऽनुभूयमानो व्यक्तिविशेषसंबन्धः

तद्वशेन उन्मीलितः चातुर्वर्ण्यः वेद्यान्तरस्पर्शसम्पर्कशून्य ज्ञान-

रूपसम्बन्धेन शून्योऽपि चर्वणाभिधो भावः चित्तवृत्तिविशेषो

यस्य तेन प्रमात्रा रसास्वादयिता, सकलसहृदयसंवादभाजा

सकलसहृदयसम्मतिशालिनेत्यर्थः। साधारणेन कारणेन-

विभावत्वसामान्येन, स्वकार्यत्वेन व्यक्तितोऽपि गोचरी-

कृतो विभीकृतः चर्व्यमाणैकतानः चर्व्यमाणता

ग्रास्वादः यः ग्रलौकिकः ग्रात्मा निर्वर्तिष्यमाणस्य स

विभावादि जीवितावधिः विभावादि मात्रमात्मा यस्येति

चरमार्थः। यावत्करसत्वापेक्ष चर्व्यमाणः ग्रास्वाद्यमानः

पुरइव चारुचक्षुरगं वेतीप्रमाणः; हृदयमिव ग्रावेशन्

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Siddhanta eGangotri Gyaan

सर्वांगीणमिव आलिंगन् सर्वांगव्यापारं कुर्वन् आक्रमत्

सर्वं विभावादितिरिक्तं तिरोदधत् आच्छादयत् बुद्धात्मा-

मिव अनुभावमनुकुर्वन् अनुभवं कारयत्, अलौकिक चमत्कारी

शृंगारादिको रसः । स च रसश्च, न कार्यः विभावादिनाशेऽपि

विभावाद्यभावेऽपि तस्य रसस्य सम्भवप्रसंगात् अवश्यंभाव-

नियमात्, नापि ज्ञाप्यः विभावादिभिरिति शेषः। असंभवात्

ज्ञानात् इत्यर्थः। [redacted] तर्हि विभावादिभिः

किं क्रियते तत्राह उत्पत्तिरिति विभावादिभिः हेतुभिः

व्यंजित- चर्वणीयः। पुनः पुनरास्वाद्यमानः, कारकज्ञापकाभ्या-

मन्यत् व्यंजनारूपं कः इष्टमिति चेत्न क्वचित् दृष्टमिति

अलौकिक सिद्धेः रसस्य भूषणत्वेन न दूषणं कर्तुं युक्तं

उत्पन्नो रस इति व्यवहारः तत्राह चर्वणानिष्पत्ता तस्य

रसस्य निष्पत्तिः उत्पत्तिर्व्यवहारः इत्यर्थः। एवं

कार्यमुच्यतां लौकिकं यत्प्रत्यक्षादि ज्ञानं तत् तादात्म्येन

औदासीन्येन अवबोध्यः ज्ञानं तच्चालिनां मितभोगिनां

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

प्रत्यक्षपदवाच्यानां, यत्सामं वेद्यान्तरस्य सम्बन्धेनरहितं

स्वस्वरूपविषयकं यावदितरयोगेषु अक्षयोगेषु घट-

पदाभिधेयानां, संवेदनं ज्ञानं इतरत्रितयविलक्षणं अत्रैव

च लोकोत्तरं यत्स्वात्मसंवेदनं तस्य गोचरः विषय इत्यर्थः।

इति हेतोः प्रत्येषो ज्ञेयो ऽर्थः अभिधीयमानः उच्यमानः, तद्-

ग्राह्यं च रसग्राह्यं च, निर्विकल्पकं ज्ञानं न भवति, विशेषाद्य-

परामर्शप्रधानत्वात्। ज्ञानं सविकल्पकं पश्यतोऽस्य अलौकिक

शब्दजन्यस्य स्वसंवेदनविरुद्धत्वात् स्वात्मकप्रतीतिभाव

रोधकत्वात्, अभावस्वरूपस्य अभिलप्यस्य, अभावात्मकत्व-

रोधकत्वात्, अपि पूर्ववत् कारकत्वज्ञापकत्ववत्, लोकोत्तरतामेव

गमयति बोधयति, शब्दविशेष्यं अनुभवबलेन तथैव

स्वीकारात् इति भावः। अत्र पाद इति बहुवचनं पुरुष्या

रतमतस्य स्वसम्मतत्वमुक्तम्।

व्याख्यादप इति। मूलक एकस्य, अनेकार्थितत्वात्

अर्थाच्यात्वात् सूत्रे भाष्यसूत्रे मिलिता एव निर्दिष्टाः कथिताः।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

एवंच दण्डचक्रादि न्यायेन निमावादीनां सम्भ्रमेन क्रमत्वं नतु

मृणालीजालादि न्यायेनैकस्मेति भावः। ननु यत्रैकस्मादपि रसो

ऽनुभूयते इत्याशंक्यते- विषादिति त्यादिना। केवलानामेवा त्रोक्तिति-

रित्यत्तेन। हे मुग्धे विवेकरहिते क्षणतिये क्षीणते प्रेमपात्रे

नतु स्वोत्तमात्रे प्रसीदु प्रसन्ना भव, बहुतरादीपक सत्त्वान् भावभंगा-

दसावरसं भविष्यतीति भावः। भावभंग सामग्रीमाह- विगत

ऽवकाशं, ऽत्रलग्नो भ्रमराः तद्वत् गलिताः ऽत्रत्यन्त कृष्णाः

ऽत्रम्बुगर्भाः प्रेक्षा यत्र तादृशं मधुरकोकिलयोः कूजितैः

दिशां श्रीः शोभा ऽत्रास्ति। चरणाभूमिः ऽत्रकिसलया नूतनाः अंकुराः

यस्यां तादृशी, एवं चोर्ध्वमधः तिर्यक् चेद्दीपक सत्त्वात् [illegible]

[illegible] भावरक्षणाय [illegible] ऽत्रसम्भव

दसेति भावः। पीमृदितेति। ऽत्रस्याः भालत्वा. [illegible] पीमृदिता

कामं शिथिलीकृता या मृणाली कमलिनी तद्वत् म्लानसंगं

जातमिदानीं प्रकाशनं, विगतास शोषमात्र चारणोपयोगिबीजु

जीवात्मन स्तिन समूहस्य जर्जरतामिः कथमपि ऽत्रतिचन्दनत्वाप

बलात्कारेण उद्भिन्नः अंकुरः येन विधय वैतृष्ण्यं

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

व्यज्यते / अस्याः कपोलः अस्मिन्वस्य कारणात्, यो दन्तच्छेदः

तद्वत् कान्तः तेन औत्वोत्कर्षः / इदमोऽपि निष्कलंकस्य

हिमांशोः चन्द्रस्य लाञ्छनं शोभां कलयति धारयति अनेन कारणेन कान्तता

व्यज्यते / दृश्यते // अग्रगत सतीर्थः / चक्षुः उत्सुकं अग्रतः /

सम्भाषणं सम्भाषणं कुर्वति, विवलितं तिर्यक् कृतं संकुचितं वा

उपरि स्मीतं दृष्टोदगात् विकोकेतं संश्लिष्यति आलिंगनेच्छया

आलिंग्यं चाटुनति, अग्रकं उपरि आधैव मां स्पर्शं क्षिप्तीति

क्रोधानिमित्तात् आरब्धं, गृहीत वक्त्रेव किंच किंचित्

उंचितभ्रूलतं उन्नमिता कुटिलीकृता भ्रूलता येन तत्तथा, अजानति

व्यतिक्रमे अपराधे: प्रणामे, आलम्ब्य हस्तेकदेशं बाहुमूलं उपरि भुजं

तेन हस्तेन इकदेशं पस्य तत्तथा, एवं मानिन्याः चक्षु जानाति

जातापराधं ज्ञात्वा क्षिपे अग्रहे उपरि चनुं जातम् / अत्र यद्यपि

अग्राह्ये विषदत्तीति पक्षे, विभावानां मुग्धा दयित प्रेक्षादि रूपाणां

आलम्बनोद्दीपन कारणं, द्वितीये पीमृदित मृणालीति पक्षे,

अनुभावानां अङ्गगलानि विषय वैतृष्ण्य पाण्डुता क्षामक्षादि-

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvasva Sharada Peetham

रूपाणां कारणं, तृतीये इत्यादुत्सुकोमन्त पक्षे उत्सुकाक्षिणं,

ग्रैवेयसुक्ष्मबीजादिरूपाणां, सहकारिणां नेत्यर्थः। केवलानां

ग्रत्र उदाहरणत्रये, स्थितिकल्पत्वं; तथापि एतेषां

नानैकान्तिकत्वं [illegible]

[illegible] रसनिष्पत्तिहेतुत्वमभिप्रेत्य।

सङ्घातश्चेत् विभावादेः द्वयोरेकस्य वा भवेत्।

भट्टनायकस्य समाधेये तदा दोषो न विद्यते॥ इति सिद्धान्तात्।

[illegible]

प्रत्र रूक रूव निर्दिष्टः तत्रापि ग्रन्यथा द्वेषो राक्षसेषु रसनिष्पत्तिः।

इदानीं रसस्य विशेषभेदानाह। ग्रङ्गारहास्यकरुणेति।

[illegible] रसपदं शब्दस्य वर्त्तते तथा

रसत्वजातिरिति। [illegible] इमं कारिकां [illegible] नाट्य

शास्त्रे षष्ठेऽध्याये पठिता सैवात्र सम्मत्या

[illegible] संगृहीता। तत्र रत्यादि स्थायिभाव रूव

सामाजिके इच्यमाणो रसपदं [illegible]

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

रतिस्थायिभावकः कान्ताद्यालम्बनकः सदुद्दीपनाद्युद्दीपितः कटाक्षाद्यनुभावितो व्रीडादिसंचारीतः शृंगारः । हासस्थायिभावकः विकृताकारालम्बनको वैकृताद्युद्दीपितो गडतादुल्लसनाद्यनुभावितः श्रमादिसंचारीतो हास्यः । शोकस्थायिभावको मृताद्यालम्बनकः तदुणाद्युद्दीपितो रोदनाद्यनुभावितो दैन्यादिसंचारीतः करुणः । क्रोधस्थायिभावको दृष्टयालम्बनकः तदपकाराद्युद्दीपितो विकत्थनाद्यनुभावितो गर्वादिसंचारीतो रौद्रः । उत्साहस्थायिभावको दृष्टयालम्बनकः उग्रपकाराद्युद्दीपितः प्रहर्षणाद्यनुभावितो हर्षावेगादिसंचारीतो वीरः । भयस्थायिभावको विकृताद्यालम्बनकः तद्विकृतचर्मद्युद्दीपितः पलायनाद्यनुभावितो जडतादिसंचारीतो भयानकः । जुगुप्सास्थायिभावको विण्मूत्राद्यालम्बनको दुर्गन्धाद्युद्दीपितो निष्ठीवनाद्यनुभावितो ग्लान्यादिसंचारीतो बीभत्सः ।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

विस्मय स्थायिभावको विस्मयजनक कर्मकर्तृलिप्सनको विस्मयकर्मेषु द्योतित। अकिंचाद्यनुभावितो हर्षोद्भिन्नांगादि अद्भुत इति। अश्रुपातानिति। [illegible] अश्रुपातानेवेत्यर्थः। स्नेहे भक्तिः वात्सल्यमिति रतेरेव विशेषाः। नाट्ये अभिनयात्मके काव्ये, श्रव्ये काव्ये तु शान्तोऽपि नवमो रसः। ननु रसस्य सुखात्मकत्वेन करुणादि-रसस्य दुःखमयत्वेन कथं रसत्वं रसत्वे सुखरूपतापत्तिः दुःख कार्यश्रुपातादेः तादृशनापत्तेश्च। अरसत्वे तु [illegible] सहृदयानां तत्र प्रवृत्तिर्न स्यादिति चेत्। लोके तथात्वेऽपि काव्यादौ करुणादेरपि अलौकिक सुखरूपा [illegible] दिदिक्। [illegible] दिदिक्षित। [illegible] अश्रुपातानेवेत्यर्थः। [illegible] अत्र दुःखत्वं नाट्ये दुःखनिवृत्त्यैव अश्रुपातादयः अगत्या वर्णनाद् अस्माभिः तदुपेक्षात् तत्र दुःख-[illegible] इत्यस्मन्मतमेव [illegible] त्वं चेत्।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

त्रीति। तेषु रसेषु मध्ये इत्यर्थः। [illegible]

[illegible] मुखं [illegible]

[illegible] इङ्गारस्य [illegible] इति।

[illegible] सम्भोगो विप्रलम्भश्च। संभोग-

कालावच्छेदत्वे सति विप्रयोगकालावच्छेदत्वे सति रति

आश्रयत्वं वा। तत्राद्यः परस्परावलोकनादिनागतत्वात्

सम्भोगः,

अप्रयोच्छेद्यः रूपं रूपं गण्यते। सम्भोगोऽपि त्रिविधः

नायिकारब्धो नायकारब्धश्च। तत्राद्यमुदाहरति शुभ्रांशोरिति।

अप्रसक्तमशनं पद्मोदकम्। वासगृहं शयनागारं, शून्यं निर्जनं

सम्भ्रमाद्धीनं वा विलोक्य दृष्ट्वा, शयनात् पर्यङ्कात् अनु सर्वतः

शनैः मन्दं उत्थाय अनुरागजिज्ञासया निद्रायाः व्याजं मिषं

आगतस्य [illegible] पत्युः मुखं प्रियस्य, सुचिरं बहुकालं

निर्वर्ण्य दृष्ट्वेत्यर्थः। विश्रब्धं विश्वासयुक्तं यथास्यात्तथा,

पीत्वा जातपुलकां, उपलरोमाञ्चां गण्डस्थलीं आलोक्य लज्जानम्रमुखी

हासं कुर्वता, लज्जावनतोत्तमाङ्गः। इसता प्रियेण चिरं सम्भोगस्वीकारात्

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

पुम्बिता ∧ शून्यसित्यनेन पुम्बनप्रवृत्तियोग्यता व्यज्यते।

~~तत्र स्तनमृदनेत्यनेन स्तनचन्दनादि सूच्यते। अलुलितत्वेन~~

~~मुखानुलिप्तत्वं विश्रब्धमित्यनेन तु शय्यातिसमाधिविशेषत्वादि~~

~~सेति व्याख्यते~~। अत्र नायकः शय्यालम्बनं शून्यगृहं नायकनिद्रादि

उद्दीपनं, मुखविवर्तनचुम्बनादि अनुभावः। लज्जा हर्षादिः

व्यभिचारिभावः। रतिः स्थायिभावः तज्ज्ञैः सामाजिकैः रस-

निष्पत्तिः। ९ द्वितीयं नायकारब्धं उदाहरति + त्वं मुग्धेति। हे मुग्धाक्षि

शोभननयने, त्वं कंचुलिकया चोलिकया निबद्धेन मनोज्ञाक्षीं

तन्वीं शोभां धत्से धारयसि। ~~कञ्चुकेन शरीरमेवसीव्यत~~

~~इत्यतस्त्वं कंचुलिकावैमर्थ्यमुखमित्येवं~~ इत्येवं

व्याभाषमाणे प्रियतमे प्रीतिपात्रे नायके, तस्याः कंचुलिकायाः

ग्रन्थिकां ग्रन्थेः तां मोचनाय संस्पृशि संस्पर्शं कुर्वति,

सति, शय्यायां उपान्ते समीपे निविष्टा संलग्ना सस्मित्व-

या सस्मेरा तस्याः ~~हे नेत्रस्य~~ नेत्रयोः कृतसवः उत्फुल्लता

तेन व्याकुलित, संजातानन्दः व्याप्तिजनः सखीसमूहः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

श्लोकानां मिश्राभूतानां, शुक्लो मया पाठनीयः सारिक्ष
मया भोजनीया, इत्यादिवचनानामुपन्यासो यास्मिन् कर्मणि
तत् यथा स्यात्तथा शनकैः मन्दं निर्यातः तद्गृहान्निर्गतः।
श्लत्र मुग्धदृष्टिः। श्लालम्बनं, नयन सौन्दर्यांग शोभादि उद्दीपनं
श्लाभाजो वीक्षा स्पर्शानुभावौ। उत्कण्ठादयो व्यभिचारिणः
रतिः स्थायिभावः तज्ज्ञो सामाजिके रसनिष्पत्तिः।
श्लपरस्तु विप्रलम्भ इत्यर्थः। श्लभिलाषादि हेतुतया
पंचविधः पंचप्रकारकः। कामनोद्भवः।

[illegible]

[illegible]

नाभिलाष हेतुकमुदाहरति - प्रेमार्द्रेति। मुग्धदृशः
मालत्याः तास्ताः श्लनुभूताः चेष्टा दर्शनहसितालापरत
मोदे भवेयुः। श्लाशंसायां लिङ्। कीदृशः श्लयं जन
श्लहमस्पेत्याकारकः पक्षपातविशेषः प्रेम तेन श्लर्द्र
स्निग्धा प्रणयस्पृशः प्रणयमुग्धा उद्गाढः श्ले

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

रागस्योदयो यासु तथाभूताः पीचियात् दृढासंगात् निसर्ग-

मधुराः स्वभावमनोहराः यासु चेष्टासु, ग्रशंसमा मनोरथेन

पीवरितत्वात् किं पुनरनुभूतासु क्षणात् बाह्यकरणस्य

चक्षुरादेरिन्द्रियस्य, व्यापारं विषय ग्राहित्वं रुणद्धीति

तादृशः ग्रन्तः करणस्य मनसः ग्रानन्देन सान्द्रः निबिडः

लयः तन्मयत्वं भवतीत्यर्थः। ग्रत्र माल्ती ग्रालम्बनं,

तद्विलासानुस्मरणमुद्दीपनं. ग्रशंसानुभावः. तद्व्यंग्यो-

त्कण्ठादैन्यमिचारिभावः इति। स्थायिभावः। विरहेदानु-

क्रमुदाहरति- ग्रन्यत्रेति। ग्रन्यत्र मामिकान्तगृहे व्रजति

गच्छति, मम प्रिय इति शेषः। इति कथापि का कुत्सिता

ग्रपलोका वा किमुत गमनमित्यपि ना द्योत्य, नापि ग्रस्य मम

प्रियस्य. तादृक् कोऽपि सुहृत् मित्रं यो मां नेच्छति

ग्रपितु इच्छत्येव। तर्हि हेत्वभावे ग्रत्र नागमनसंभाव्यं

तत्राह नागतश्च ग्रागतस्तु नेत्यर्थः। कारणाभावेऽपि

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

कार्यमिति विस्मये इहेति। दैन्यबोधकमिदं विच्चेः

दैवस्य कोऽपमनुभूतपूर्वः चक्रमः उन्नारम्भः उन्नेतुक-

कार्योत्पादः इत्यर्थः। ~~विच्चे मम विमनस्कमिति भावः~~ इति

एवं प्रकोष्ठ उल्लेतनाभिः बहीभिः कल्पनाभिः

वितर्कैः कलुषितं मुषितं स्वान्तं मनो यस्याः तथा-

भूता बाला निशान्तान्ते शयनगृहे मध्ये वृत्त-

संजातो विवर्तनानां ~~वैपरीवर्तनानां~~ व्यतिकरः

सम्बन्धो यस्याः तथाभूता, सती चित्तस्वास्थ्याभावात्

शय्यां मुहुर्लुठति ~~[illegible]~~ निद्रां निशि

नाप्नोति। उन्न उन्नागतपतिशल्यचक्रं। उन्नाजमनाडि-

रुद्दीपनम्। विवर्तनाडिरनुभावः। इहेत्यादि सूचितो

विस्मयो दैन्यं ना व्यभिचार्यभिमानः रतिः स्थायिभावः।

हृहर्षाडेनुकमुदाहरति। सापत्नपुरेति। सा बाला पत्युः

न नु प्रियस्य, कैः प्रकृतो प्रोज्झराद्यः उन्नम्रांगना संगम रूपः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तस्य समये सरन्योपदेशं सरिक्तर्तृकोपदेशं विना

सविभ्रमं यथा स्यात्तथा भ्रूभंगस्य भ्रुकुट्याः वलना

चालना वक्रीभाव इति यावत् | यासां वक्रोत्कम्पः तासां

संभूयनं भ्रूलतानां मानस्य प्रकाशनं यो जानातीत्यर्थः |

नाट्ये किं करोति इत्यत्राह स्वच्छेति | स्वच्छेतरनिर्मलैः

कपोलमूलगतिभेदैः भ्रूभ्रुवोः रोदनमेव करोति | कीदृशी

बाला पर्यस्तनेत्रोत्पला परदर्शने लीला लज्जया वक्रिभूतनेत्रेत्यर्थः |

तथा लुठन्तो लोला चंचला ये भ्रूलताः तैरुपलक्षिता |

भ्रूत्र पतिरालम्बनम् | भ्रूपराधः उद्दीपनम् | रोदनाद्यनुभावः

तद्व्यंग्या भ्रूसूचा व्यभिचार्यभावः इति स्थायिभावः |

प्रकाश इतु मधुकरइति | प्रस्थानमिति | हे जीवित प्रियतमे

नायके यातुं निश्चिते सति न तु गन्तुमुद्युक्ते, सर्व

एव सुहृदः समं प्रियतमेन सह, भ्रान्तिताः भ्रमयुक्ता तथा च

त्वयापि गन्तव्ये सति गमनावश्यंभावे प्रियस्य नायकस्य

सुहृदां च सार्थः समूहः किमु नपद्यते विलम्बनकृते

वृथेतिभावः | के के भ्रान्तिताः | तत्राह | बलयः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

कंकणैः प्रस्थानं कृतं प्रियतम गमन वार्तया ~~[illegible]~~.

बलवदंशात् प्रियसखैः अस्मेरमुखि जनं गतं मानमस्यां

निर्गतं, धृत्या चैर्येण कार्यं कालमात्रमपि नास्तीतं न स्थितं,

त्वितेन पुरः पूर्वमेव गन्तुं समर्थितं उद्युक्तं जनं गतम्,

अत्र प्रियतम। आलम्बनम्। तत्प्रयाणादि उद्दीपनम्।

कार्श्यादयो अनुभावाः। तद्व्यंग्या चिन्ता व्यभिचारिभावः

रतिः स्थायिभावः। शृंगारः उपदेहुकमुद्दाहरति त्वामिति।

हे प्रिये, प्रणयेन प्रेमातिशयेन कुपितां त्वां त्वत्प्रतिकृति-

मित्यर्थः। शिलायां शिलापट्टे धातुरागैः प्रालिख्य लिखित्वा ~~[illegible]~~

आत्मानं स्वप्रतिकृतिं, ते तव चित्रगतायाः प्रणयिनीं कर्तुं

यावदिच्छामि तावत् इच्छासमकालमेव मुकुलयति: भवति

अस्मेरमुखिः मे मम दृष्टिः आलुप्यते आच्छाद्यते दृष्टि-

प्रतिबन्धात् लोचनं न जायते इति भावः। क्रूरः कृतान्तो

दैवं तस्मिन्नपि अप्रालब्धे इति अत्यर्थः। यो अन्यस्य

संगमं सहभोगं न सहते। अत्र नायिका आलम्बनं तत्प्रणयकोपः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

उद्दीपनं त्रणमातेत्यादि अनुभावः। कृतान्ते अन्तसूया व्यभिचारिणी।

रतिः स्थायिभावः। हास्यरसमुदाहरति। आकुंचेति।

मंत्राम्भसां आपो हिष्ठादि मन्त्र प्रतानां, अम्भसां पृषतैः

विधुभिः पवित्रिते कृतसंस्कारे मम मूर्धनि मस्तके

वेश्या नारांगना अन्तर्भुवि भ्रुवोर्मध्ये पाणिं हस्तं आकुंच्य

मुष्टीकृत्य, नासे दीर्घः स्वनः शब्दो यत्र तं तथा

प्रकिरो विस्तीर्णः धूर्विति शब्दो यत्र तथाभूतं अन्नदात्, हा हा हतोऽस्मि इति शब्दमुच्चार्य कश्चित्

विष्णुशर्मा विप्रो रोदिति शर्मान्तनाम ग्रहणं हास्यजी-

पोषाय। अत्र विष्णुशर्मा आलम्बनम्। रोदनमुद्दीपनम्।

स्मितादयोऽनुभावाः। हर्षावेगादयो व्यभिचारिणः। हासः

स्थायिभावः। करुणमुदाहरति। हा मातरिति। वैराणां

पुरे भवानांगनानां, हतं चर्वरस्वरः तथा मध्य-

रुद्ध करुणः गिरः चित्रस्थानपि प्रकृपान् रोदयन्ति

रोदनं कारयन्ति, किमुतेति शतरुपज्ञः कुर्वन्ति

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

किं पुनः अचेतनानां, क्रान्ताः गिरः, उच्यन्ते भो मातः कुत्र

गन्तव्ये त्वरितामि संजात त्वरोसे, येन अस्माकमपि

नापेक्षितव्यतीत्यर्थः। किमिदं अद्यास्मिकं, ज्ञातमित्यर्थः। इति धिक् देवताः

प्रदक्षणादितिभावः। आशीर्वादाः कुत्रगता ब्राह्मणानां इति क्वाशिषः

भावः। अस्माकीनान् प्राणान् धिक्, यैवदभावेऽपि तिष्ठन्तीतिभावः।

ते तव अंजेषु अशनितुल्यो कृतवद्भिः पतितः

प्रतिः

हा दृशौ नेत्रे दृग्धे, प्रस्वाङ्गवाद् तन्निर्देशः। यद्वाऽस्माकं हृदौ दग्धौ दग्धतुल्यौ जाते।

अत्र मृतराजमाता आलम्बनम्। तद्दाहादुद्दीपनम्। शोदनमनुभावः

दैन्यमूर्च्छोदयो व्यभिचारिणः शोकः स्थायिभावः। अत्रोभयो

सामाजिके करुणो रसो व्यज्यते। रौद्रमुदाहरति।

कृतमिति। इदं गुरोः द्रोणस्य वधरूपं पातकमेव गुरु-

पातकं महापातकं मैः मनुजादैः मनुभिः धर्मधिज्ञैर्वा ज्ञातमिति

भावः। अतएव निर्मर्यादैः समीक्षारहितैः उदायुधैः उद्यतास्त्रैः अस्त्र

अत्रैः इदं कर्म अनुष्ठितं अनुमतमनुज्ञातं, दृष्टं वा नास्मोपुना ?

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

श्रीकृष्णेन, सार्द्धं तेषां वधाधिकर्तृणां धृष्टद्युम्नादीनां सर्वेषां किरीटिनां भीमार्जुनसोदराणां भवतां अग्रसृङ्मेदो-ऽशैः अग्रमहं अग्रनन्दश्रवाः, अग्रश्वत्थाम्ना दिशां दिग्देवतानां बलिं पूजोपहारं करोमि। अत्र अग्रधन्विनो अर्जुनादयः अग्रालम्बनम्। पितृहन्तृत्वं मत्वा युध्यमान-मुद्दीपनं प्रतिनायकभावः। अग्रनन्दैरेषः एषः गम्भीरो गर्वो व्यभिचारीभावः। क्रोधः स्थायिभावः। अग्रिमे सामाजिके क्रोधप्रकृतिको रौद्रो रसो व्यज्यते। वीरमुदाहरति। क्षुद्रा इति। भोः क्षुद्राः, जात्या पराक्रमाभावेन च नीचाः, हृष्टाः वानराः रटन्ते प्रधोषन्ति शेषः। संत्रासं भयं विजहत त्यजत। भयत्यागे हेतुमाह। क्षुण्णो पूर्णितो शक्रास्त्रस्य ऐरावत गजस्य कुम्भो यैः तादृशा, अग्नी सायकाः बाणाः राक्षसानुद्दिश्य पातयमाना अपि दैववशात् पुष्पवृष्टय इव पतन्तः निष्पतन्तः परं लज्जां व्रीडां इयन्ति धारयन्ति तत्क्षणं पतन्तः हे सौमित्रे सुमित्रायाः पुत्र, त्वं तिष्ठ मुह्येयमात्

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

विराम, यतः त्वं मम खेदनादस्य क्रोधानां पात्रं विषयो नासि न भवसि, अतोऽहं खेदनादोऽस्मि अन्यं तु किमपि भ्रूभंग लीलया निर्मितो वशीकृतो जलधिर्येन तथाभूतं राममन्वेषयामि । [illegible] अत्र राम आलम्बनम् । तत् समुद्र-बन्धनमुद्दीपनम् । जुगुप्सा नामेरभूपेक्षा रामे प्रतिस्पर्धा त्यनुभावौ । ऐरावत कुम्भस्थल भूर्णन स्मृति [illegible] गर्व: व्यभिचारी । उत्साह: स्थायिभाव: । अभिन्नो वीर रसो व्यज्यते । ननु विभावादि साम्ये वीरौद्रयो: को भेद। इति न शंकनीयं स्थायिभाव भेदात्। [illegible] अयमन्यमुदाहरति गोवेति । अन्यं प्रति दृश्यमानो मृग:, उद्ग्रप्लुतत्वात् विमाने अन्याकाशे बहुतरं प्रयाति उर्व्यां भूमौ स्तोकमल्पं प्रयाति । कीदृशो मृग: अनुपतति धावति स्यन्दने यम्? रथे गोवामा भंगेन वक्रीभावेन अभिरामं सुन्दरं प्रधानस्थान-

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

मुहुः वारम्वार वहुहर्षः दत्तहर्षः तथा शरपतनभयात्

मृपसा पश्चार्द्धेन पूर्वकायं प्रविशुः प्रवेशुमारब्धवन्तः तथा

श्रमेण वेवृतं वेवीयितं यन्मुखं तस्मात् गंडेभ्यः भ्रष्टैः

ग्रन्थिवलीढैः ग्रन्थिचर्वितैः वर्मैः कोणं व्याप्तं तत्र मार्गो

यस्य तथाभूत इति त्वं पश्य । ग्रत्र पश्चात्गच्छत्-

स्मद्दनो राजा वालम्बनम् । शरपतनभयमनुगमनं चोद्दीपनम् ।

ग्रीवाभंग पलायनादयो ग्रनुभावाः । शंका त्रास श्रमादयो व्यभिचारिणः ।

भयं स्थायिभावः । तच्छे भयानको रसो व्यज्यते ।

ग्रातः ध्रुत्पीडितः

ग्रीमत्सम्युदाहरति । उत्कृत्योत्कृत्य । प्रेतेषु एकः कृपणो । ग्रयमं

ग्रन्यो कृमिभिः भक्षितं उत्कृत्योत्कृत्य उत्पाट्योत्पाट्य पृथुना

महता उत्सेधेन उच्चूनतया भूमौ बहुलानि ग्रंसौ स्कन्धौ

स्फिक् ग्रकमूलं कटिः सन्धिभागश्च पृष्ठपिण्डौ जंघोरुभागः

इत्यवयवेषु सुलभानि उग्रगंधीनि उत्कटदुर्गन्धानि

मांसानि जग्ध्वा भक्षयित्वा ग्रंकस्थात् क्रोडात् प्रेतशरीरात्

ग्रन्त्रिक संस्थं स्वपुटं निर्गोलनभागः तत्र गतं स्थितमपि

क्रव्यमपक्वं मांसं ग्रन्यग्र शनैर्यथा स्यात्तथा ग्रतिशये

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

९१ शवो वा

भञ्जयति । अत्र त्रेतरंकः आलम्बनम् । मांसादयं तत्कर्तनं च उद्दीपनम् । तद्रक्षुः नासाकुंचनादयो अनुभावाः । उद्वेगादयो व्यभिचारिभावाः । जुगुप्सा स्थायिभावः । ताभ्यां बीभत्सो रसो व्यज्यते । अद्भुतमुदाहरति । चित्रमिति । भगवतोंऽशेनानुद्दिश्य बलेकोत्सेपिमम् । चित्रं आश्चर्यं रूपः पुरुषः अहन् अत्र हर्षे रूपः अवतारः सदाचारवर्तकः च कान्तिः ईक्षा रूपा दृश्यमाना आकृतिः कं न कमपि लोकोत्तरं एव त्यजं भवति । भंगी गमनादिप्रकारविशेषः अभिनयेन एव । अभिनयेनैव । रूपकोषे वैलक्षण्यं व्यंग्यम् । अहो अलौकिकः चेष्टा लोकोत्तरश्च प्रभावः कापि अनीदृक्षचमत्कारा आकृतिः दृष्ट-अनवसंस्थानं रूपः सर्गः सृजन रूपं अहं विलक्षणः इति भावः । अत्र वामनः आलम्बनम् । कान्तेर्गुणाति-शयाद्धि उद्दीपनम् । स्तवादयो अनुभावाः अतिधृतिहर्षादयो व्यभिचारिणः । विस्मय स्थायिभावः । तस्मादयं अद्भुतो रसो

Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham.

व्यज्यते । ननु के ते स्थायिनो भावा, इत्यपेक्षायामाह

रसां स्थायिभावान् इति । रसा० शृंगारादि रसानाम् ।

रतिर्हासश्चेति । मनोऽनुकूलेऽर्थे मनस उत्कटः प्रवेशः

रतिः । वागादिविकारात् नेत्रस्य मुखविकासो हासः । इष्टनाशादिना

चित्तस्य वैकल्यं शोकः । प्रतिकूलेषु रोषः क्रोधः । कार्यारम्भेषु

उत्साह्य औत्सुक्यमुत्साहः । रौद्रवस्तुदर्शनजन्यं चित्तस्य ।

वैकल्यं भयम् । दूषितवस्तुदर्शन

जन्मा ग्लानिः जुगुप्सा । अलौकिकवस्तुदर्शनजन्यो-

चित्तद्रुतिर्विस्मयः । व्यभिचारिणः प्राह-निर्वेदग्लानीति ।

तत्त्वज्ञानात् सांसारिकपदार्थेषु वैतृष्ण्यं निर्वेदः ।

निषिद्धवस्तुस्वरूपचिन्तनादिः । अन्यस्य गुणेषूत्कर्षा-

सहिष्णुता असूया । मदिरापानादिजन्यमौद्धत्यं मदः ।

रत्यध्वगत्यादिजन्यः खेदः श्रमः । श्रमादिजन्या कार्यप्रवृत्ति-

रालस्यम् । दौर्गत्यादिना स्वावमानं दैन्यम् ।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ध्यानमोहितत्व ज्ञात्या शून्यता वा चिन्ता । वैचित्यं मोहः ।

स्वनिश्चितविषयज्ञानं स्मृतिः । सत्यपि कारणे मनो विचलनं

धृतिः । दुराग्रहादि जन्यो मनस्संकोचः धीः । मनोऽनव-

स्थितिः चापल्यम् । मनः प्रसादो हर्षः । अनिवृत्ते ज्ञात्वा

मनःसंभ्रमः आवेगः । क्रियास्वपाटवं जड़ता । ऐश्वर्यादि-

जन्यो मदो गर्वः । मनो वैक्लव्यं विषादः ।

वांछित ज्ञाप्तौ आलस्यादेरनुता औत्सुक्यम् । नेत्रनिमीलनं

निद्रा । चित्तानवस्थानं अपस्मारः । निद्रानुभवः

सुप्तम् । चेतनागमः प्रबोधः । अनधिज्ञेपायमानादे-

रहस्य रसहननमर्षः । आत्मारणुद्विरवोक्तित्वम् । अचल-

चित्तत्वमुग्रता । अवर्णितार्थात्मं मतिः । शरीरसंतापो व्याधिः

चित्तविभ्रमः उन्मादः । शरीरेन्द्रियमूर्च्छा मरणम् ।

मनःक्षोभः त्रासः । संदेहाक्रान्तं जायमानो विमर्शः शंकितः ।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvodaya Shramadan Foundation

समारब्धाता: कवितां: । निर्वेदस्य स्थायिभावस्य

ग्रन्थसंगलप्रायस्य वैराग्यप्रवर्तकस्य, तत्समभावे ग्रन्थनुपादेयत्वे ग्रन्थग्राह्यत्वेन

ग्रन्थनुपयोगित्वेऽपि उपादानं स्वीकारः व्यभिचारित्वेऽपि

व्यभिचार्यन्तर्गतत्वेऽपि, ~~स्थायिता स्थायित्वं निर्वाता~~

स्थायितानिर्वाहार्थं स्थायित्व प्रतिपादनायैव । ~~निर्वेदस्थायिनि~~

शान्तमुदाहरति । ग्रन्थहानिति । ग्रन्थे सर्पे हारे मुक्ताद्यो

कुसुमशयने पुष्पास्तीर्णपर्यंके दृषदि शिलायां मणौ रत्ने

लोष्ठे मृत्पिण्डे बलवति रिपौ शत्रौ सुहृदि मित्रे तृणे चाके

स्त्रैणे स्त्रीसमूहे मम कदोचित् पुण्यारण्ये नैमिषादौ शिवशिव.

शिवेति प्रवदतः समदृशः सर्वत्रसमानबुद्धेः ~~मम~~ दिवसाः

दिनानि कदा यान्ति यास्यन्तीत्यर्थः । वर्तमानसामीप्ये

वर्तमानवद्वेति लट् । ग्रन्थत्र निर्व्याजत्वेन पश्यन्प्रमाणं जगत्

ग्रन्थालम्बनम् । तपोवनाद्युद्दीपनम् । ग्रन्थहाराद्योऽनुभावदर्शनम् ।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अनुभावः । मतिधृतिहर्षा व्यभिचारिणः । तेनैवंदक्षादिभावः

तज्ज्ञे शान्तरसे [illegible] तिष्ठोक्तेः ।

[illegible]

[illegible]

[illegible]

मुने: स्वतंत्रेच्छत्वेन नियोगपर्यनुयोगानर्हत्वात् ।

मुनेविषयां रतिमुदाहरति । हरतीति । हे मुने भवदीय दर्शनं शरीरभाजां देहधारिणां प्राणिनां कृते कालत्रितयेऽपि योगपदं इष्टसम्पादकत्वरूपं, अनिष्टनिवारकत्वरूपं वा अनन्तं प्रकटयति इत्यर्थः । सम्प्रति वर्तमानकाले उत्पाद्य. अनागतिष्यतः अनागतिष्यतं च पापं हरति नाशयति । शुभस्य इष्टस्य कारणं पूर्वार्जितैः पूर्वजन्मार्जितैः शुभैः सुकृतैः कृतं जनितम् । अत्र मुनिविषया या: श्रीकृष्णरतेः मुनिरालम्बनम् । दर्शनयोग्यता व्यंजनमुद्दीपनम् । श्रीकृष्णस्य प्रभुतिरनुभावः । तद्व्यंग्यो हर्षो व्यभिचारी । तज्ज्ञे भावनिष्पत्तिः । एवं अत्रापि गुर्वादिविषयारतिरपि उदाहर्तव्यम् । व्यंजित व्यभिचारिणमुदाहरति । जाते सति/ हे भ्रात: प्रियतमा कोपेन क्रोधेन पराङ्मुखी सती मां मा संस्पृश, इति पाणिना हस्तेन आपीडयेत्यर्थः/ रोदिति रोदनं कुर्वती पुरो अग्रे गन्तुं अवृता सती मया स्वप्ने दृष्टा

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

53

तत: त्वां प्रेम्णा परिष्वज्यालिंग्य शतकैः शिववाक्य-

शतैः आश्वासयामि तावत् शैवेन पराहन्ताविष्ट-

विधिना देवेनाहं निद्रादीक्षीकृत: निद्रादीक्षित:

कृताहं यावत् जाने निश्चिनोमि, ज्ञास्यति, एतादृशमकार्यं

शठस्यैवचरेदिति जाने इति भाव: । अत्र विधिं प्रत्यसूया

प्राधान्येन व्यतीयते । विधिस्त्रालम्बनम् । विधिर्वोर्जन्मसुद्दीपनम्।

शठत्वोक्तेरनुभाव: । प्राधान्येन व्यंजितो ऽत्रसूयाक्षेपो

व्यभिचार्यनुभाव: । रसाभासं भावाभासं च लक्षयति । तदा-

भासा: इति रसाभासा: भावाभासश्चेति शारीरार्थ: ।

रसाभासमुदाहरति

स्तुम: इति । हे वम्मीकि पुनरत्रभवते तं कं पुरुषं स्तुम: यं

विना त्वं कथमपि न रमसे हृष्यसि तथा रणमुखे संग्रामे कः

प्राणान् त्यक्तुमे दक्षवान्, ज्ञास्यति, यं त्वं मृगयसे

अन्विष्यसि । ज्ञप्त हे शीघ्रमिव चन्द्रवदने क कः पुमान् मुखे

वलात् ज्ञोलंगसि ।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

हे मदननगरि कामभवने रम्भा तपःस्थी: ~~[illegible]~~ कस्य पुरतस्य

चिन्तयसि।

~~[illegible]~~ यं त्वं ध्यायसि। ~~[illegible]~~ रसस्याभासत्वं दर्शयति।

अन्यानेकेति। अन्यपदे बहु कामुक विषयो ~~[illegible]~~ रति: व्यज्यते। अत्र अन्येन

कामुक विषयत्वेन अनुभवनिष्ठत्वेन च रतेराभासत्वं बोध्यम्।

उदाहरति
भावाभासे ~~[illegible]~~ राकेति। सीतामुद्दिश्य रावणोक्तिरियम्।

राकायां पूर्णिमायां य: सुधाकर: चन्द्र: तद्वत् मुखं यस्या:

तादृविधा, तरले चंचले आयते दीर्घे अक्षिणी यस्या: तथाभूता,

स्मेरं ईषत्प्रकाशं मत्तयौवनं नवयौवनमिति यावत् तेन

तरंगिता: विभ्रमा: भावा: येषु तथाविधान्यंगानि यस्या: रम्भादेवी

सीता अस्ति इति शेष:। तत् तस्मात् किं करोमि तल्लाभाय

किमाचरामीत्यर्थ:। तथा सह मैत्री क्रियतां तत्राह- अत्र

सीतायां मैत्री० मित्रतां कथं केनोपायेन सिद्धे करोमि

मैत्रीकरणे नकश्चिदुपाय इत्यर्थ:। एवं सति तत्स्वीकृति-

व्यक्तिरूपे कोऽभ्युपाय: [illegible] इत्यर्थ:।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

~~भावस्य एवंरूपस्य~~ व्यभिचारिणश्च चिन्तया: उद्बोधनं।

~~अनौचित्यादि~~ अननुरक्तायां रतिवर्णनादनौचित्यप्रवर्तितत्वम्।

निरूपणत्वात् भावत्वम्। एवं उदाहरणे रसान्तरभासा।

भावान्तराभासश्च उदाहरणीयः। भावशान्त्यादिरिति। भावस्य

शान्तिः प्रशमः उदयः उत्पत्तिः सन्धिः समकालमेव

निरूढयोरपि तुल्यकक्षयोरास्वादः। शबलता एवं पूर्वोत्तरमर्दनेन

परपरोदयः। ~~स्थायिभावानां~~ स्थायिभावानां त्वेते न संभवन्ति तेषां

सन्ततप्रवृत्तेः। भावस्य शान्तिमुदाहरति- तस्या इति।

तस्याः सपत्न्याः उन्मूलितशमानामानिर्देशः। सान्द्रं निबिडं

स्तोरवक्षसि विश्लेषणं यत्र तथाभूतस्य स्तनतटस्य यः प्रश्लेषः

परिरम्भः तेन या मुद्रा तेन ~~मुद्रितं~~ शान्तिमित्यर्थः। वक्षः/

वक्षस्थलं

परिजनेति ~~सपत्नीजनेन~~ किं गोपायते गुह्यं क्रियते,

इति तस्य नायिकया उक्ते सति मया तन्मुद्रा विहितं मत्प्रमार्टुं

सहसा तामप्रज्ञायैव, ह तत् इत्युदीर्य स्मरेण भ्रान्तेति स

नायिका उन्मीलिता। तत्क्षणे वशात् उन्मीलनज्ञान-

जनकारणवशात्, तन्मा, तत् मुद्रांकितत्वं विस्मृतमित्यर्थः।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

उत्तरत्र क्रोधरूपभावस्य शान्तावेव चमत्कारनिधानम्।

तदाह यत्र कोपस्येति शान्तिरिति शेषः । भावोदयमुदाहरति

एकस्मिन्निति । एकस्मिन् शयने शय्यायां विपक्षा मा सपत्नी

तस्याः नामग्रहे नाममात्रग्रहणे कृते, यत्रति नामग्रहेण रुषो

क्रोडेति मानग्रहगलग्रहितया मुग्धया स्वधैर्यमजानत्या

चाटूनि कुर्वतापि नायक, यत्रावेगात् यत्रधीरितः तिरस्कृतः

स वृष्णी यत्रालापरहितः त्रिमतमः मुहो माभूत् इत्यमन्द-

वलितग्रीव° यथा स्यात्तथा पुनर्वीक्षितः कांक्षितं वीक्षितः इति

यावत् । यत्र सुरतविलयोत्सुकस्यापदः भवत्करोति । यत्र

सत्यपि कोपकारणे । भावसन्धिमुदाहरति । उत्सिक्तस्येति ।

उत्सिक्तस्य

यत्रहंकृतस्य तपःपराक्रमयोः निधेः परशुरामस्य,

यत्रभागमात् यत्रागमनेन रुक्तः रुक्तस्यां दिशि, सत्संग-

त्रिमता यत्रमत्र च वीररसोद्दीप्तः वीरोचितोत्साहेकः

रसौ द्वावपि भावाकर्षतः । यत्रन्यत्रः यत्रन्यस्यां दिशि, रुक्ष

वैदेहीपरिरम्भः सीताश्लेषः मां कृपाहि-मुनिपार्श्वगमनं

यत्रिबन्धनात्तत्पर्यः । चेतनप्रभीलयन्, कीदृशः यत्रानन्दी यत्रानन्दजनकः

किं कुर्वन्

हारिचन्दनेन्दुशिशिरः

स्निग्धश्च । यत्रावेगहर्षयोः सन्धिः । भावशबलतामुदाहरति

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तेनात्यन्तानुचितमुच्यते।

कार्यमिति। शशलक्षणः पतुस्य कुतः वंशः क्व इदमकार्यं क्व, ऽइदं भ्रष्यते

SS

पुनरपि सा उर्वशी दृश्येत, दृग्गोचरा भवेत्, ~~[illegible]~~

~~[illegible]~~ बः

ऽअस्माकं दोषाणां प्रशमाय श्रुतं शास्त्रमिति। ऽइहो कोपेऽपि

शक्ति मुक्तं क्षान्तं पुण्यं ऽअपकल्पना: निष्पापा:

कृतधियो विद्वांस: भवंति कथयंत्यन्ति, सा

उर्वशी स्नेहेऽपि दुर्लभा। हे चेत: स्वास्थ्यमुपैहि

आयुष्मन् कः खलु पुनरहः चलो चन्द्रवाताः, ऽअस्या ऽअस्थाः

धास्यति पास्यति। ऽअत्र चित्तमौत्सुक्य मतिकारण

शंका देन्य धृति चित्तानां शबलता ऽएकत्रपाठे:

भावास्थिति रूपा कथिता उदाहृता च। भुज्येरसेऽपीति

रसे भुज्ये सत्यपि ते भावा: शान्त्यादयश्च, ऽअंगित्वं प्राधान्य कदाचन रसांपत्त्यानुमानकरेसीति

प्राप्नुवन्ति, राजानुगत निवाह प्रवृत्तभृत्यन्यायेन। यथा निवाह-

प्रवृत्तो भृत्यो राज्ञा ऽनुगम्यते तथा प्रवृत्तेऽपीति भाव:। ~~[illegible]~~

ऽअत्रन्यायेऽनुग्राह्यकाऽयं राजा यद्भूयात्रायामपिप्रेतस्य सम्मिलितोऽभूदितिपर्यन्तयोजनीयम्ऽअयं पर्यवसानार्थ।

~~[illegible]~~

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by eGangotri Sarvagya Sharada Peetham

[illegible]

[illegible] रसादिध्वनिं निरूप्य संलक्ष्यक्रम

व्यंग्यध्वनिं विभजते- अनुस्वानेति। व्यज्यमानां वाच्यमानां

मुख्यं शब्दं प्रतीत्यनन्तरं प्रधा [illegible] प्रपरश [illegible]-

[illegible] प्रतिध्वन्यादि पदाभिधेयः शब्दविशेषः प्रतीयते

तत्सदृशः संलक्ष्यक्रमध्वनिः [illegible] सः

शब्दशक्त्यर्थशक्त्योभयं वा तेषां यः शब्दो व्यंजनाः तत्तः

उक्तेतिमूलार्थः।

उक्तेष्टतीति तदुत्थः त्रिधा त्रिप्रकारकः कथितः शब्द-

परिवृत्तिसहत्वेन शब्दशक्तिमूलत्वं, शब्दपरिवृत्ति सहत्वेना

शब्दपरिवर्त्य

र्थशक्तिमूलत्वं, [illegible] सहत्वसहत्वाभ्यां

उभयशक्तिमूलत्वमिति। [illegible] शब्दशक्तिमूलानु-

रणन [illegible] व्यंग्यस्य द्वैविध्यमाह- तत्रेत्यादि। तत्र

त्रिविधेषु [illegible] [illegible]

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Shastra Peetham

अथवा वस्त्वेव अवभासते प्रकाशते स ध्वनिः शब्द-
शक्त्युद्भवः द्विधा अलंकारध्वनेः वस्तुध्वनिश्च
वस्त्वेवेति आह। अनलंकारमिति। अलंकारेण नित्यसम्बन्धः।
एवं च गोबलीवर्दन्यायेन वस्त्वलंकारयोः भेदः अभेदेऽ
पि भेदः। शब्दशक्तिमूलमलंकारध्वनिमुदाहरति-उल्लासेति।
येन देवेन जरढं कबंधं अर्जितं गर्जितं सिंहनादो यस्य
त्यागिनेन कालो यः कृपालः खड्गः, तत्र यत् अम्बु
धारा जलं तस्य वाहः प्रवाहः भ्रमणं तदुल्लास्य
तीक्ष्णीकृत्वा, विजयते त्रिभुवने रिपूणां शत्रूणां ज्वलितः
प्रतापः रणे रणभूमौ निर्वापितो [redacted] शमितः। अत्र वांकपस्य
अप्रस्तुतार्थाभिधायकत्वं [redacted]
[redacted] मा भवसंजीवत् मा
प्रसन्नं भवतु, इति शाकरणिका प्राकृतेऽनयोः राजेन्द्रयोः
उपमानोपमेयभावः साहश्यात् सम्बन्धः कल्पनीयः।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

[redacted] इति हेतोः अत्र काव्ये उपमालंकारः

[redacted] व्यंग्यः। [redacted]

विरोधाभासालंकारध्वनिमुदाहरति-तिग्मरुचिरिति।

हे विभो स्वामिन् भवान् रक्षलेषु तिग्मः तीक्ष्णः

सुजनेषु रुचिरः शतधा दुर्जाड्यजनितं तेजो यस्मात्स

तथा विधुराणां शत्रूणां निशामणं तत्कर्ता, तथा

मधुरा मनोज्ञा लीला चेष्टा यस्य सः। मतिः बुद्धिः यस्य

चित्तसमुन्नतिः तदनुसारेण वृत्तिः वर्तनं यस्य प्रतिपदं

प्रतिस्थानं, पद्मानां निजानां अग्रगुणीः। तथाहि अत्रैकस्य

पक्षस्य द्विधा कल्पने विरोधाभासालंकारः। तथा अमित इति।

शत्रुमित्रयोः हर्षं/द्यति रक्षयति. ददाति येति हे हर्षद शत्रु.

हर्षरक्षण मित्रहर्षदायक प्रभो, त्वं समितः संग्रामात्

प्राप्तैकत्वर्ष: अमितः अपरिच्छिन्नः अत्रस्तां रक्षतां

अमितः दुर्जविधायकत्वेन शत्रुः, अतएव साधुभिः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

उत्कृष्टैः यशोभिः श्लाघितः व्याप्तः संमितः प्राप्तः

उत्कर्षैः श्लाघितः। अत्र निलयदत्वेऽपि प्राधान्येन

विशेषाभासो व्यज्यते। व्यतिरेकालंकारध्वनिमुदाहरन्ति

निरूपादोलेति। शूलिने महादेवाय नमोऽस्तु कीदृशाय?

निरूपादानं यः शंभोः तं अग्निमावेव शून्ये एव तन्वते

विस्तारयते। चित्रं नानाकारं जगदिति शेषः। तस्मै

अग्निर्निर्मातीव स्वरूपाय कलाभिः चन्द्रस्येति शेषः। शलाघ्याय

प्रशंसनीयाय। अत्र व्यतिरेकालंकारो व्यज्यते।

अन्यतादृशायामलंकारत्वस्याभावेऽपि

अलंकार्यस्यापि। ब्राह्मणस्य इत्यादौ षष्ठ्यर्थे ब्राह्मणत्वा-

भावेऽपि पूर्वकालिक ब्राह्मणत्वमादाय ब्राह्मणत्व व्यवहारः

तथा

वाच्यता दशायां विद्यमानमलंकारत्व मादाय-

अलंकारत्व व्यवहारः वस्तुमात्र उदाहरति पंचिम इति।

दूतैर्दैवैः पटैः पिशुनयेच्च रहस्य वस्तु इति कामशास्त्र-

मनुसृत्य कंचन पाण्डवं प्रति दूतैः पटैश्चेदं रहस्यं

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

कथयति ।

"पथिन नात्र सन्तरमीति मनाक् प्रान्तस्थले ग्रामे ।

उन्नत पयोधरं ग्रेक्ष्य यदि वससे तदा वस ॥

इति संस्कृतम् । हे पथिन प्रस्तराणां पाषाणानां स्थले तस्मिन् ग्रास्मिन् ग्रामे न तु नगरे मनाक् ग्रल्पमपि सान्त्वं कदाचास्तु नास्ति । तस्मात् शमनसाम्यं ग्रक्षभावेऽपि उन्नत पयोधरं वर्षुकं मेघं ग्रेक्ष्य दृष्ट्वा यदि वससि वस्तुमिच्छसि तदा वस । ग्रर्थात् न विश्रामार्हं ग्रयं ग्रामः इत्यभिप्रायः । ग्रयंभावार्थस्तु पाषाणानां क्रूराणां ग्रामे शास्त्रं कामशास्त्रमित्यर्थः । मनाक् ईषदपि नास्ति ग्रयं पुनः सौरूपं केवलं ग्रनुपभुक्तं स्तनं ग्रेक्ष्य यदि उपभोगक्षमोऽसि तदा ग्रास्स्वेति । ~~[illegible]~~ वस्तुद्यौनुदाहरति शनीशनि ।

हे नरेन्द्र त्वं यस्मै कुप्यसि तं पुरुषं शनिः शनैग्रहः ग्रशनिवज्रं च उच्चैरतिशयेन निहन्ति अत्र त्वं ग्रसीदसि स पुरुषः उदारः महान् दाता ग्रनुदारः ग्रनुगतदारः ग्रत्र विरुद्धावपि द्वौ त्वदनुवर्तनार्थं रङ्कं कार्यं कुरुतः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

इति वस्तु ध्वन्यते । ननु विशेषालंकाराः शब्दार्थविशेषयोः सामानाधिकरण्याभावात् । ~~अतो विशेषालंकारे एव विशेषौ~~

~~[illegible]~~ रत्वं शब्दशक्तिमूलं द्विविधं ध्वनेः निरूप्य अर्थशक्तिमूलं द्वादशविधं विभजते । अर्थशक्त्युद्भवे ~~[illegible]~~ । अर्थः स्वतः सम्भवी लोके हृद्यः कविप्रौढोक्ति-सिद्धः; तथा कविप्रतिभामात्रोन्मितः कल्पितः इति त्रिविधो ध्वनिः । सोऽपि वस्तुरूपो अलंकृतिरूपो वा इति ~~[illegible]~~ षड्विधः । षड्विधोऽपि वस्तुमात्रं अलंकारं वा व्यनक्ति व्यंजयति । तेनायं अर्थशक्त्युद्भवः अर्थशक्तिमूलो ध्वनिः द्वादशात्मकः द्वादशविधश्चेत्यर्थः । अभिनवभारती-निष्पन्न इति प्रौढोक्तिमात्रेण कल्पितः इत्यर्थः । अत्यन्तासत्यमपि ह्यर्थं शास्त्रं शब्दः करोति हि इति न्यायादिति भावः । बीद्दरसन्नपि लोके अविद्यमानोऽपि, औचित्येन योगपतया निर्मितः कल्पितः वक्त्रा नायकादिभेदेनेत्यर्थः ।

व्यंजकः । तत्र षड्विधस्य वंजकस्य, वस्त्वलंकारोवाव्यङ्ग्य इति

बोद्धा षड्विधः । द्वादशात्मकः ~~[illegible]~~ द्वादश भेदोऽर्थशक्त्युद्भवे ध्वनिः ।

~~[illegible]~~ क्रमेणोदाहरणम् । अस्तीति । ~~[illegible]~~

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ग्रन्नलसोशेशमणिर्धूर्तानामग्रेसरः पुत्रि धन्यसमूहेऽसि ।

इति भणितेन नतांगी प्रफुल्लविलोचना जाता ॥ इति संस्कृतम् ।

हे पुत्रि ग्रन्नं वरः यो ग्रन्ना त्वदर्थं इषः ग्रन्नलानां ग्रन्नालस्य

पुत्रानां शिरोमणिः धूर्तानां ग्रग्रगण्यः ग्रन्नधन्यसमूहेऽसि ।

[illegible] इति भणितेन [illegible] लज्जया नतांगी

सा कुमारी प्रफुल्ले हर्षविकसिते लोचने यस्याः ताइशी

जाता । [illegible] प्रफुल्लविलोचनत्वेन हर्षातिशयो व्यज्यते ।

[illegible] ग्रत्र ग्रन्नलत्वादिना

वस्तुना ग्रन्नन्यासां ग्रन्नानर्घणीय इष इति ग्रन्नैवोपभोग्य ।

इति वस्तु व्यज्यते । स्वतः सम्भविना वस्तुना ग्रन्नलंकारस्य

ग्रीस्मुदाहरति । धन्यासीति । हे सखि या त्वं प्रिय-

संगमे रतान्तरेष्वपि विस्रब्धानां विश्वासयुक्तानां पाटवानां

प्रियवाक्यानां शतानि कथयसि सा त्वं धन्यासि । हे

सखे: प्रियेण नीविं प्रति करे गृहीते संकल्पविषयीकृते

ग्र त्वीयते यदि कैश्चिदपि स्मरसि तदा शपामि शपथं

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

केशेति, [redacted] अत्र च

अधन्यो [redacted] गाढ्येत वस्तुनेति शेषः। अत्र इन्द्र

महानन्दापि सूचनद्वारा अन्या इति व्यतिरेकालंकारो व्यज्यते।

[redacted] स्वातःसंभविना अत्रालंकारेण वस्तु-

[redacted] व्यज्यते।

इवेनमुदाहरति। यस्य राज्ञः [redacted] कोऽस्ति तं० कृपाणः खड्गः

युधि युद्धे कोपकषायकान्तिः काली दुर्गा तस्याः कटाक्ष

इव वीरैः [redacted] व्यलोकि दृष्टः। कीदृशः कृपाणः दर्पेण मदेनान्धो

यो गन्धगजः तस्य कुम्भयोः कपाटमिव मध्यभागः तस्य

कूटमग्रभागः [redacted] तत्र संक्रान्त्या संबन्धेन घनं निबिडं यत्

शोणितं रुधिरं तेन शोणं रक्तं शोणिः कान्तिर्यस्य तादृशः।

अत्र कालीकटाक्ष इव कृपाणो व्यलोकि इत्युपमालंकारेण

सकलरिपुबलक्षयः क्षणात् क्रीड्यते इति वस्तु व्यज्यते।

[redacted] अत्रालंकारेण अत्रालंकारस्य इवेनमाह-गोकर्णेति। योराजा

युधि युद्धे रुषा क्रोधेन निजाधरं निर्दशन् दन्तैः खण्डयन्

सन् अत्रेषां शत्रूणां वधूजनस्य अत्रेषु समीपेषु निबुनदलानि

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तद्वधात् संकटात् अन्यमोचयत् मोचितवान् / अन्यत्र क्रोधात्
वैरिवधे तद्वधूनां रतिक्रीडाविरहात् कृन्तकताभावः /
अत्र विरोधाभासालंकारेण यो हि निजाधं दर्शति स
कथं परेषामधरान् मोचयति इत्येवं रूपेण अन्यनिर्देशेन
समकालमेव शत्रवो व्यापादिता इति तुल्ययोगितालंकारो
व्यज्यते / मम नृपस्य क्षतमपि अन्यस्य वैरिवधूजनस्य
क्षतिः निवर्तनामिति नृपबुद्धिः उत्प्रेक्ष्यते इति उत्प्रेक्षा च
व्यज्यते / एवं अनयोः उदाहरणयोः स्वतः सम्भवी व्यंजकोऽर्थः /
वस्तुना वस्तुनो ध्वनिमुदाहरति कैलासस्येति /
कैलासस्य कैलासनाम्नो गिरेः प्रथम शिखरे मूलोशीरवे
वेणूनां वंशवाद्यानां सम्मूर्च्छनाभिः रागविशेषैः
विबुधानां देवानां रमणीभिः अप्सरोभिः गीयमानां
यस्य राज्ञः सम्बन्धिनीं कीर्तिं श्रुत्वा सरसस्य स्निग्धस्य
बिसिनीकाण्डस्य कमलिनीमृणालस्य संजात शंका
भ्रान्तयेषां रक्तंश्यताः सस्ताषंगाः स्खलित वेत्रयन्त्राः
येषां नाट्यशाला दिङ्मातंगाः रेवारोधस्तादृशो अन्यत्रो देशराजाः

CC-0. Lal Bahadur Shastri University Delhi. Digitized by Sarvagya Sharada Peetham

श्रवणपुटिते कर्णसमीपे हस्तं शुण्डदण्डं ग्रहवतिधन्ति मुहुर्मुहुः चालयन्ति। अत्र कविप्रतिभामात्र निष्पन्नात् यशसः श्रवणप्रवेशात् येषां दिग्गजानां जडानामपि उत्पत्तिधिगमः संगीतज्ञानं जातिति तेषामपि एवमादिबुद्धिजननेन चमत्कारं करोति त्वत्कीर्तिरिति वस्तु व्यज्यते। अत्र कविसम्प्रदायात् सिंहशिशुरिति कविप्रौढोक्तिसिद्धेन वस्तुना उत्कारस्य ध्वनिमुदाहरति- केशेष्वित्ति।

"केशेषु बलात्कारेण तेन च समरे जयश्रीर्गृहीता।
यथा कन्दरागिर्विधुरा तस्य हठं कण्ठे संस्थापिता॥ इति संस्कृतम्। तेन राज्ञा समरे युद्धे जयश्रीः निजपतत्वजनी: बलात्कारेण केशेषु गृहीता यथा कन्दरागिः तस्य राज्ञो विधुराः शत्रवः हठं संस्थापिताः तेन पराजिताः शत्रवः गृहस्वेव तिष्ठन्नीति तात्पर्यम्। अत्र कन्दरागिः कण्ठे स्थापिता इत्येवं रूपेण कविप्रतिभामात्रसिद्धेन वस्तुना कन्दराः कामेद्दीपितमदना इव राज्ञः शत्रून् कण्ठे गृह्णन्ति उत्प्रेक्षा व्यज्यते। यद्वा रणैकत्र संग्रामे विजयदर्शनात्

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तस्यारव: पलाय्य गुहासु विशन्ति इति काव्यहेतुरलंकार: ।

यद्वा न पलाय्य गता: तथैव; अपितु ततः पराभवं

सम्भाव्य तान् शत्रून् कन्दरा न त्यजन्ति इत्यपह्नुति-

रलंकारो व्यज्यते । ~~अनिष्टोदीप्ति मात्र सिद्धेनालंकारेण~~

~~वस्तुनो ध्वनिमुदाहरति- गाढेति ।~~

"गाढालिंगन रभसोच्यते दीप्ते त्वरु समपसरति । मनस्विन्या: मान: ।

पीड़नभीत इव हृदयात् ॥ इति संस्कृतम् । गाढालिंगनाम

रभसेन हर्षेण वेगेन वा दीप्ते प्रिये उच्यते सति

~~मनस्विन्या~~ वशीकृत मनसाया: अपि मान: पीड़नात्

भीत इव हृदयात् त्वरु शीघ्रं अपसरति गच्छति ।

अत्रोत्प्रेक्षया पीड़नभीत इव इत्येवंरूपया उत्थालिंगनादि-

तत्र विजृम्भते / इति वस्तु व्यज्यते । अलंकारेण

अलंकारस्य ध्वनिमुदाहरति- जोहदिति ।

या स्वविरमिव हसन्ती कविनवनाकुरुह बहुविनिवेशा: ।

दर्शयति अननमज्जन मन्यदिव जायति सा वाणी ॥

इति संस्कृतम् । या वाणी काव्यरूपा कविवाक्

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स्थविरं वृद्धं ब्राह्मणं इसन्तीव वैदग्ध्यादिति भावः।

कवेः वदनमेवाम्बुरुहं तत्र वक्त्रे शोभेति विशिनष्टि:

स्थितिप्रिया तादृशी। भुवनमण्डलंगन्धीव दर्शयति

या वाणी जगति सर्वोत्कर्षेण वर्तते। यत्र इसन्तीव-

त्युत्प्रेक्षया चमत्कारैकाणं गं० तं० जगत्

यत्र जङ्घासनस्था कविवदन शोभास्थिता निर्मिमीते इति

व्यतिरेकालंकारो व्यज्यते। यत्र चतुर्थ उदाहरणेऽ

यंजको ऽर्थः कवि शैोदालि मात्र निष्ठत्वात्। कविनिबद्ध-

वक्तृ शैोदालि मात्र सिद्ध त्वेः चतुर्थ भेदेऽ अर्थे वस्तुना

वस्तुध्वनिमु दाहरति- जो लंकेति।

ये लंकागिरि मेखलासु स्खलिता शैोणीवलोरगो

स्फारोत्फुल्ल दल प्रभावलीकवलने व्यग्राः दीप्तच्छवि।

ता इदानीं मलयानिलाः निरयेणा निश्वासशैोपमेयो

जाताः झटिति शिशुत्वेऽपि बहलाताम्रच्छवयश्च इव॥

इति संस्कृतम्। ये वाताः लंकागिरि: हेमकूटः

तस्य मेखलासु गतस्खलितत्वात् शोणन विलास

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

प्रपीडितानां उष्णी उरगीणां ~~सर्पिणीनां~~ सर्पिणीनां

स्फारा विततता उत्फुल्लता ऊर्ध्व जृम्भता ईदृशी या

जृम्भावती जृम्भांसि: तया कवलते भक्षणे सति

दीर्घत्वं क्षीणत्वं प्राप्ता:त्वल्पा वशिष्टा इति यावत् ।

ते इदानीं° मत्पसम्बन्धात् मत्समानिता: विरोहिणी

निश्वासै: सम्वर्धिता: प्रापैश्वर्या: अतिति शीघ्रमेव

शिशुत्वेऽपि तारुण्येन पूर्णा इव बहवा: पुष्पवपवा

विरोहिजन हृदय पीडने समर्था जाता इत्यर्थ: । अत्र

नि:श्वासै: प्रापैश्वर्या वायव: किं कि° न कुर्वन्ति

इति वाच्यार्थनिषेध वस्तुना वस्तु व्यज्यते । वस्तुना

अलंकारस्य ध्वनिर्भूय इति । सहीति ।

"सखि विरच्यमानस्य अस्य धीरत्वेना श्वासं प्रदर्शनि

विश्रंभेवत क्षणे सहेसेति तेनाप्रसृतम् ॥ इति संस्कृतम् ।

~~अस्मात् ज्ञानदेवाद्वयं दीर्घं रुदितेन किमिति~~

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

62

[illegible] ते सति औत्वेन तद् दत्तयैर्यो

मान मानस्य ग्रहणात् समाधानं विरुध्य विधाय

प्रियदर्शनं विसंस्थुलं अपे प्रियतमावलोकन कौतुक

तरलितं सत्पे तेन धैर्येण सहसा ग्रस्तं चलायितं-

मित्यर्थः ॥ ग्रत्र औत्वेन वस्तुना ग्रकृतेऽपि प्रार्थने

सा ग्रसत्या जातेति विभावनालंकारः प्रियदर्शनि सौभाग्य-

बलं धैर्येण सोढुं न शक्यते इत्युक्तेः काव्यलिंगं च

व्यज्यते । ग्रत्र लिंगेन वस्तु [illegible] ध्वनिमुपाददाति ।

ग्रोल्लोलेति ।

ग्रार्द्राई कर कर ज रचनप्रतं तेन लोचनयो र्मध्यगतम् ।

रक्तांशुकं प्रसादः कोपेन पुनरिमे नाकार्षीत् ॥ इतिसंस्कृतम्

[illegible]

[illegible]

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

प्रिय इमे मयोल्लोलते कोपेन न ग्रकारीत्

नखक्षते ग्रपितु तव ग्रंगे विद्यमाने, ग्रग्रेईङ्गितकरजानां
नखानां दन्तानां च क्षतेः ग्रक्षतवाचिकाकृतेः व्रणेः क्रम
लोचनयो। रक्तांशुकंप रक्तवस्त्रौंग्रताद: दत्त: ।
ग्रत्र किमिति कुपिते लोलते वर्हसि इति ग्ररनस्योलापनात्
उत्तरालंकार: । तेन च नकेवलमार्द्रतानि गोपापसि
किन्तु तेषामहं क्रमादपात्रापि जाता इति वस्तु व्यज्यते ।
ग्रत्रालंकारेण ग्रलंकाच्चनिमुद्दाहरति मोहेलेति ।
मोहेला सहसाभीते तव हृदये सुभग सा ग्रधमानी ।
ग्रनुदिनमनन्यकर्मा ग्रङ्गं तन्वपि तनयति ॥ इति संस्कृतम् ।
हे सुभग सौभाग्यभुक्त सा ग्रकृत्रिमस्नेहा साध्वी
नायिका मोहेला सहसाभीते धूर्तस्त्रीसहसा व्याप्ते तव
हृदये ग्रधमानी ग्रवकाशमलभमाना सती, ग्रनुदिनं
प्रतिदिनं ग्रनन्यकर्मा त्यक्तान्यकार्या सती
तन्वपि स्वतः कृशापि ग्रङ्गं शरीरं तनूकरोति ।
कथमपि प्रवेशनाय कृशं करोतीत्यर्थः । ग्रत्र

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

हेतुलंकारेण तनोः स्तनुकरणेऽपि न हृदये नवतां

इति विद्रोषालंकारो व्यज्यते। यच्च वस्तु

कविनिबद्धं वस्तु यौवनसमान्तरेणेष्यमाणशरीरो व्यंजक इ

इति॥। एवं उन्मत्तशब्दस्य द्वौ शब्दौ दशधा भेदाः

ज्ञाताः। [illegible] शब्दार्थोभयभेदेन इति।

शब्दश्च उन्मत्तश्च शब्दार्थौ तद्रूपं यदुभयं तद्भूः तच्छब्द-

वाचकः। [illegible] उदाहरति- उन्मत्तेति। उन्मत्तभूः भेदा-

घनावृतः मन्दः रागाभाषं भूषणं यस्याः सा। सम्यक्

उद्दीपितो प्रबलीकृतो मन्मथः कामो यया सा। तारकाः

नक्षत्राणि। तारला उज्ज्वला यस्यां सा श्यामा रात्रौ मं

जनं सानन्दं न करोति। उन्मादयतु सर्वथैवानन्दयति इति

रात्रीपक्षे उन्मत्तः। पक्षे- उन्मत्तभा सुरतादावालस्यमोहता

सा भासो सुवर्णनिर्मित शिशोर्भूषणविशेषः। उन्मत्तं यस्याः

समुत् मुद् सोहतः दीपितश्च मन्मथो यया सा तारका

उज्ज्वलिका तारला चञ्चला यस्याः सा श्यामा

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

बोधशक्तिरूपकी नायिका, कं पुरुषं सातत्यं न करोतीति

नायिकापक्षे व्युत्पत्तिः। एवं उपमालंकारो व्यज्यते। इयमुपमा

केषाञ्चित् शब्दानां परिवृत्त्यसहतया केषाञ्चित् तत्सहतया

व्यंजकत्वात् शब्दार्थोभयशक्तिमूला। एवं एतस्य द्वयोः

एकादशभेदाः भवन्ति। तद्यथा— एतन्निबन्धिनो वाच्यस्य

द्वौ भेदौ— एतत्संकलितं वाच्यम् एतदन्तर्निरस्कृत-

वाच्यश्चेति। निबन्धिनोऽपि वाच्यस्य रसादिरेव एक एव भेद

इति त्रयो भेदाः। शब्दशक्तिमूलो द्विधा एतदलंकारोऽपि

वस्त्वेति। एतदेकादशस्फुटभेदस्य द्वादश शब्दार्थोभयभू-

रेकः वस्त्वलंकाररूपद्वयार्थः। इति पञ्चदशभेदाः। पूर्वो द्वौ त्रिभिर्भेदैः

एतद्द्वादशेति। ननु रसभावादीनां बहुत्वात् कथमेतद्द्वादशत्वमित्याह

रसादीनामिति। जनरमाः शृंगारादयः तत्र शृंगारस्य

द्वौ भेदौ सम्भोगो विप्रलम्भश्च। सम्भोगकालावच्छिन्नत्वेव

प्रथमः। विप्रयोगकालावच्छिन्नत्वे द्वितीय इति सादृश्य-

विन्दो। सम्भोगस्यापि एतदेके भेदाः परस्परावलोकनादयः।

विप्रलम्भस्य वियोगस्यापि एतदेके भेदाः तथापि

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

विभावानुभाव व्यभिचारीणां वैचित्र्यं तत्रापि उत्तम मध्यमाधम प्रकृतित्वं तत्रापि देशकालावस्थादिभेदा इति हेतोः एकस्यैव रसस्य अनन्तत्वं का गणना व्यतिरेकभेदानाम् ॥ असंलक्ष्यक्रम भेदस्तु रसादिध्वनिः एव एव भण्यते ॥ [illegible] वाक्ये ह्यर्थः प्रतीयते । शब्दार्थोभयशक्तिमूलोध्वनिः वाक्य एवभवतीत्यर्थः । [illegible] पदेऽप्यन्येति । [illegible] अन्ये व्यवहरन्ति- संक्रमित वाच्यादयः सप्तदशभेदा । वाक्ये पदेऽपि भवन्तीत्यर्थः । एकावयवत्वेन तेन औक्तिकादिभूषणेन कामिनीव पदैकदेशेन व्यंग्येन वाक्यव्यंग्यापि भारती भासते चमत्कुरुते । तथा ध्वनिकारेण [illegible] एकावयवसंस्थेन भूषणेनेव कामिनी । पदव्यंग्येन सुकवेः ध्वनिना भाति भारती ॥ [illegible] एकेनोदाहरति । अस्य मित्राणीति । अन्य पुरुषस्य मित्राणि मित्राणि विश्वरूपाणीत्यर्थः ।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

शत्रवः द्वेषिणः शत्रवः कुमतीया इत्यर्थः । अनुकम्प्यः

अनुकम्पां कर्तुं योग्यः अनुकम्प एव स्नेहपात्रमेव स पुरुषः एव जातः स एव च जीवति श्लाघ्यजीवन शाली त्वमसि। अत्र द्वितीयभिन्नाद्यशब्दा। अनुपयुक्तत्वात् अनिर्वचितवाचः सन्तः आश्वस्तत्वादिकं लज्जयन्ति तेन नायकस्योचित व्यवहारित्वादिकं व्यंग्यं उपादान-लक्षणया व्यङ्ग्यं। अत्र वाक्यार्थानां प्रत्येकविश्रान्तत्वेन नैक वाक्यता; तेन पदसंघेन व्यंजकता नतु वाक्यस्येति पदप्रकाशयो ध्वनिरयं पदप्रकाशत्वे इत्यन्त निरस्तं वाच्यमुदाहरति। रत्नेति। रत्नव्यवहारा दृश्यन्ते दाक्षण्य यद्यपि तथापि चौराणां हृदय वयस्य बहुमता न रत्नं व्यवसायं विमुञ्चन्ति॥ इति कंकृतम्। यद्यपि रत्नानां चौर्यनिं व्यवसायः चौर्यादि दाक्षण्यं दुःखदा; दृश्यन्ते प्रसिद्धा। इति भावः। तथापि हृदयमेव वयस्यो मित्रं तेन बहुमता। अनुमोदिता: चौराणां महतां व्यवसायं उद्योगा। न रत्नं

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

विमुह्यन्ति। न विरामं आप्नुवन्तीत्यर्थः। प्रत्युत तेषां उपकारमेव कुर्वन्तीत्याशयः। अनाचेतने व्यवसाये मुख्यो निमोहे बाधितः सन् इति वत्स्वरूपं विरामं वा अर्थं तात्पर्यमति। तेनैषां कार्यकारित्वं व्यर्थं [illegible] अत्र विमुह्यन्तीति एकस्यैव पदस्य व्यंजकेति पदद्वयकाशयो ध्वनिः। अलक्तकक्रमव्यंग्यमुदाहरति- इत्यवधार्यमिति। तत्, अनुभवैकगोचरं लावण्यं सौन्दर्यं अनुभवैकगोचरा कान्तिरुज्ज्वलता अनुभवैकगोचरं रूपम्। स अनुभवैकगोचराः वचक्रमः वचनपादेषादौ सकलमिदं तदा तत्- सन्निधाने सुधास्पदमनृतस्थानमभवत्। अधुना तद्विरहयोगात् स्मृतिदशायां महज्ज्वरः सर्वांगीणतापहेतुत्वादेतत्पदं। अत्र तत्पदादिभिः पदैः अनुभवैकगोचराः अर्थाः प्रकाश्यन्ते व्यज्यन्ते। तत्पदे बुद्धिविषयता वच्छेदकत्वेति शक्त्या तत्पदार्थानां अनुभवैकगोचरत्वेन [illegible] प्राधान्य- मेतेते पदव्यंजकत्वं [illegible] विप्रलम्भपोषकत्वञ्च। संभोगेऽपि तेनैव ध्वनिमुदाहरति मुग्धे इति। हे मुग्धे उपदेशाग्राहिणि त्वया अनालक्ष्यः अलक्तके [illegible] कान्तो मुग्धतयैव प्रथान्वितानाच्छेदेनैव

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

नेतुं यावनितुं किमेति उपारभ्यते। तां किं कर्तव्यं तदाह

मानं धत्स्व धारय धृतिं धैर्यं बधान। [illegible]

[illegible] प्रेयसे प्रियतम विषये ऋजुतां स्वभावसरलतां

इरे कुरु त्यजेत्यर्थः। एवं सख्या वयस्यया प्रतिबोधिता मुहुर्मुहु-

रुपदिष्टापि भीतानना भयजनित विकलत्व वदना सती, तां

सखीं प्रति वचः उत्तरमाह। हे सखि त्वं नीचैः मन्दं शंस

कथय यस्मात् मे मम हृदि स्थितो विद्यमानः प्रणेश्वरः

श्रोष्यति आकर्णयिष्यति। अत्र श्रोतानेनेति उक्त्या नीचैः

शंसनविधानस्य हेतुतां प्रकाशयत् आधानेन रागातिशयं

व्यनक्ति। भावादीनां तदाभासादीनां च प्रतिपत्प्रकाशमत्वे अधिकं

वाक्यापेक्षया वक्तुं वैचित्र्यं चारुत्वं उत्स्वादजनकत्वंवा

नास्ति। अतः तत्तद् तत्तद्भेदान्दाहरन्ति। पदप्रकाश्यत्वे

वस्तुनालंकारध्वनेरुदाहरति रुधिरेति। हे भीम भयंकर नृप,

त्वं किमसि शोभसे। कीदृशस्त्वं रुधिरस्य विसरो धारा

तेन प्रसाधितो रञ्जितः यः करवालः खड्गः तेन करालो

भयजनकः रुधिरस्य भुज एव चारुः उन्नतिः यस्य

तादृशः। एवं झटिति शीघ्रं भ्रुकुट्या भ्रूभंगेन चिह्नितं

यत् ललाटं भालं तदेव पट्टः विस्तीर्णत्वात् तथाभूतः

यः न तथा रुचिरः। अत्र भीषणीयस्य नृपस्य भीमसेनो-

पमा व्यज्यते। वस्तुना वस्तुध्वनिमुदाहरति भुक्तेति।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सदागमः सन्नुपागमो यः कस्य विसस्य उत्तानद्यानन्दन्दु

प्रमोदप्रवाहं न विदधाति अपितु सर्वस्वापीत्यर्थः। कीदृक्
भुक्तिः स्वर्गादिभोगः मुक्तिः कैवल्यं मोक्षेति भुक्तिमुक्तम्
तथा रङ्गान्तर नियमेन सम्यक् अनादेशने हितोपदेशने तत्परः
अंगमपक्षे तु मतः सुन्दरस्य वल्लभस्य आगमः आगमनं
अस्य तस्योजनस्य आनन्दनिबन्धनं न विदधाति। कीदृशः।
भुक्तिः सुरतादिभोगः मुक्तिः चिरहादिदुःखत्यागः गृहकर्मणो मोक्षः
ते कोतीति तथोक्तः। रङ्गानस्य संकेतस्थानस्य समादेशने
तत्परः इत्यर्थः। अत्र नायिकोपनायिका संकेतदायिनमुपनामकं
प्रकृतार्थस्य रङ्गलजन संवेदने रङ्गस्थभंगनिधा मुखमया वृत्या
अंजनमेवत्यर्थः। शंसति स्तौति। अत्र सदागमपदेन स्तुतिरूपं
वस्तु व्यज्यते। इति सदागमपदस्य षड्प्रकाशपदध्वनित्वम्। तत्रैव
षड्प्रकाशमत्वे अविवेकमूलध्वते: हृदयादेव स्वतः संभवन्नर्थो
अंजने वस्तुना वस्तुध्वनिमुदाहरति साधीमिति। हे सखि
तव सौकुमार्यं कोमलत्वं आश्चर्यं जगद्विलक्षणत्वमित्यर्थः। येन
सौकुमार्येण अद्यत्व क्रमसामग्र्यभावेऽपि अन्तरं
क्लान्तासि श्रान्ता भवसि। ते तव नेत्रद्वन्द्वं उन्मीलनव्यतीकं
मुद्रणव्यापारोद्यतं आसितुं स्थातुं न शक्नोति। अत
कथमिव साधं रङ्गे अस्ते स्नानमुपासितं कृतं मलमंजन
अंजनेन अंगं समालेपितं कुंकुम सम्यक् देवोपतं
ननु एकस्मिन्नेवांजने अंजनस्य आकाशस्य मणीविमणीः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अहि: सूर्य: अस्ताचलस्य मौलिं मस्तकं यात:। तेन रात्रि र्जातेति भाव:। तेनच लेशतोऽपि उष्णाभाव: व्यज्यते। अत्र ते तव गति: विश्रब्धं नि:शंकं जाता, तेन मार्गे त्वरमाचलतोऽपि न श्रम इति भाव:। अत्र वस्तुना वाच्यार्थरूपेण कृतपरिश्रमा क्लान्तासि इति वस्तु अम्बुनेति पदेन व्यज्यते। वस्तुना अलंकारध्वनिमुदाहरति- तदधीति। कापि गोपकन्यका निरुद्धश्वासतया बुद्धिं परब्रह्मस्वरूपिणं सच्चिदानन्दघनं जगत्सूतिं जगदुत्पादकं श्रीकृष्णं चिन्तयन्ती भावयन्ती मुहिं मोहं गता तस्य श्रीकृष्णस्य अत्रात्मा वियोगेन यन्महादु:खं तेन विलीनानि नष्टानि अशेषाणि पातकानि यस्या: तथाभूता पुन: कीदृशी तस्य श्रीकृष्णस्य चिन्तनया ध्यानेन यो विपुलो महान् आह्लाद: आनन्द: तेन क्षीण: नष्ट: पुण्यस्य चय: समूहो यस्या: तथाभूता पाप-पुण्ययो: अल्पभोग नाश्यत्वात्। अत्र श्रीकृष्णवियोगदु:ख-चिन्तात्मादयो: अशेष अशेषपापपुण्य अल्पत्वेनाध्यसितयो: अवगतिरित्यनिशमासिद्धरूपमशेषत्वमपरु प्राधान्येन व्यज्यते। अत्रैव जन्म सहस्रैकफलभोग्यानि दुष्कृत सुकृतयो: अल्पानि कथानि द्रोण्या वियोगदु:खचिन्तात्मादाभ्यां शीघ्रमेव नाशितानि इति भाव:। न चोक्त वंगस्य वाच्यसिद्धंगतया गुणीभूत वंगत्व माशंकनीयम्। प्रकृते भगवद्विषयक रत्युत्कर्ष प्रयोजकत्वेन वाच्यादति शयितत्वेन तदप्रसंगात्। अत्र अशेषत्वपदयो: प्राधान्यात् पदद्वयप्रकाश्यता। स्पष्टं सम्भवति। अत्र ध्वनिमुदाहरति- कृष्णेति।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvadya Sharada Peetham

भो वीर नवरुषितां शत्रूणां त्वयि पराङ्मुखे विपरीते सति
सर्वं पराङ्मुखं विपरीतं जातमिति शेषः। कथं यत्रसौ सुरतारंभे भोगक्षमा
क्षणदा रात्रौ यत्क्षणदा तद्विना वनमरण्यं यत्र तत्
तादृशं एतादृक् व्यसनं यत् एतादृक् व्यसनं यत्रवीनां भेजानां उपसर्गं प्रेष्ठं
जातमिति शेषः। यत्र शब्दशोन्मूलस्य क्षणदा यत्क्षणदे-
त्यादि विरोधस्य यत्नेनोपपादनेन [illegible]
[illegible] पराङ्मुखे त्वयि
पराङ्मुखं सर्वमित्यर्थान्तरन्यासेन विधिरपि त्वामनुवर्तते इति
वस्तु व्यज्यते। एवतः सम्भविनालंकारेणालंकारस्य ध्वनिमुदाहरति
नुदति।

नव वल्लभस्य प्रभाते म्लानो ऽधरो म्लान कमलदलम्।
इति नववधूः श्रुत्वा करोति वदनं मसी सम्मुखम्॥ इति संस्कृतम्।

हे सखि
नव वल्लभस्य दयितस्य प्रभाते प्रातःकाले यत्र यो यत्रोद्गूढः
म्लानं यत्कमलदलं तादृशः आसीत्, इति सखि वचनं श्रुत्वा नववधूः
नवोढा वदनं मुखं लज्जयेति शेषः/ मसी सम्मुखं यत्र मुखमिति
यावत्/ करोतीत्यर्थः। यत्र सप्रकाशंकारेण त्वया स्वपत्युरधरोष्ठस्य
मुहुर्मुहुः चुम्बनं तथाकृतं येन तस्य म्लानत्वं जातमिति काव्य-
लिंगालंकारो म्लानकमलदलादि [illegible] वाक्यार्थत्वेन व्यज्यते। यत्रत्यान्
पदवाक्यार्थता म्लानत्वे [illegible] इति भावः।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Siddhanta eGangotri Gyaan

शब्दचतुष्टये उदाहरणेषु स्वतः सम्भवी व्यंजकः। वस्तुना

वस्तुनो ध्वनिमुदाहरति सार्द्धविवेति।

रात्रीषु चन्द्रधवलासु ललितमास्फाल्य पश्चात्पदम्।

एकच्छत्रमिव क्रोशति भुवनराज्यं विजृम्भमाणः॥

इति संस्कृतम्। पः स्मरः कामः चन्द्रधवलासु ज्योत्स्नी

ज्योत्स्नीषु रात्रीषु ललितं कुसुममयं चापं धनुरास्फाल्य ए

बाणादि सत्थाय भुवनानां राज्यं एकच्छत्रमिव करोति। अतएव

विजृम्भमाणः अत्यर्थं क्रोधेन वर्तमानः इत्यर्थः। अत्र कविप्रौढोक्ति-

सिद्धेन वस्तुना स्वशासकानंगपार्वश्येन कुशलैः कोविदैः

उपभोगपरैरेव निशातिवाह्यते इति वस्तु प्राधान्येन व्यज्यते। भुवन-

राज्यमिति पदस्य प्राधान्यात् पदप्रकाश्यता। कविप्रौढोक्तिमात्र-

सिद्धेन वस्तुना अलंकारस्य ध्वनिमुदाहरति कीर्तिशेखरेति।

अनंगः कामदेवः निशितशरधिषु तीक्ष्णबाणबृन्देषु शुद्धशः कामिनां

दृशि दृष्टौ स्वस्य बलं सामर्थ्यं मर्षयति ददाति कुड्मल

अरालेषु कुटिलेषु अपाङ्गेषु उद्भवते सति अर्पितबला

दृक् यत्र यस्यां दृशि तत्सम्बन्धिनि पुरजने पतति

तत्र सर्वे अवहित्था हसित रोदित अलपित मूर्च्छित यहा

दशानंग दशा व्यतिकरं मिश्रीभावं रत्न बाष्प समुन्मिषन्ति

युगपद् भवन्तीत्यर्थः। अत्र वस्तुना युगपदवस्थाः परस्प(

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अ विकृष्टापि एककालानवच्छेदेन भवन्ति इति विरोधाद्भ्रान्तो व्यज्यते। व्यतिकरपदस्य बाधान्नात्र पदध्वनिरत्र। 68

अलंकारेण वस्तुध्वनेन मुदाहरति- वापिरुद्धेति।

वापिमाणोऽपि पुनः संतापकदर्थितेन हृदयेन।

स्तनभरवपुस्थेन विशृङ्खलाति न चलति हारः॥ इति संस्कृतम्।

हारस्य गाढालिंगनान्तरायतया यः संतापः तेन कदर्थितेन पीडितेन हृदयेन वापिमाणोऽपि मुहुर्मुहुरुपसर्पमाणोऽपि अस्याः नायिकायाः हारो मौक्तिकमाला स्तनभरवपुस्थेन हृदयेन न चलति नापगच्छति। मित्रस्य प्राणा मोहेति अस्मोभयत्रापि स्तना- नापसरतीत्यर्थः। अत एव विशृङ्खलाति: उत्कटक्लेशेऽपि मित्रं न त्यजन्तीति भावः।

अत्र च स्तनभरवपुस्थेन विशृङ्खलातित्वात् हारो न चलतीति इत्यलंकारेणानवरतं कम्पमान एवासौ रतिवस्तु न चलति इति पदेन व्यज्यते। अलंकारेण अलंकारस्य ध्वनिमुदाहरति सोमुह्यति।

अ मुग्धः श्यामलांगो धम्मिल्लः कलितललितनवजपदः।

तस्याः स्कन्धाद् बलं गृहीत्वा स्मरः सुरतसंगरे जयति॥

इति संस्कृतम्। अयं धम्मिल्लः केशपाश एव स्मरः कामः तस्याः नायिकायाः अस्याः स्कन्धो अंस एव सेनानिवेशः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तस्मात् बलं सामर्थ्यमिव बलं सैन्यं गृहीत्वा सुरतसंगरे सुरतरूपे संग्रामे जयति सर्वोत्कर्षेण वर्तते। कीदृशः मुग्धं सुन्दरं श्यामलमंगं यस्य स तथा कलितः ग्रासादितः ललितो मनोज्ञो निजदेहः स्वशरीरं चन्द्रिकाल रूपं येन तथाभूतः इत्यर्थः। अत्र रूपकालंकारेण मुहुर्मुहुराकर्षणेनापि केशपाशः तथा स्कन्धयोः जातुः प्रभा रतिविरतावपि ग्रनिवृत्ताभिलाषः कामुकोऽभूत् इति स्कन्धपदद्योत्यो विभावनालंकारो व्यज्यते ग्रत्र रूपकं स्वतोऽसम्भवीति कविप्रौढोक्तिमात्रसिद्धं स्कन्ध पदस्य प्राधान्यात् पदप्रकाशता। रस भ्रनुर्ध्वादाहरणेषु कविप्रौढोक्तिमात्रो व्यंजकः। वस्तुना वस्तुध्वनिमुदाहरति णवेत्ति।

नवघूर्णिमा मृगांकस्य सुभग कस्त्वमसि मह्यमसतम्।
का सौभाग्यसमग्रा प्रदोषरजनीव तवच ॥ इतिसंस्कृतम्।

हे सुभग नवः प्रबन्धोदितः घूर्णिमा सम्बन्धी मृगांकश्चन्द्रः तस्य त्वं कः सखा भ्राता वासि तन्मम सत्यं मह्यं वद तथा चन्द्रस्य प्रदोष रजनीव का नामिका सौभाग्यं नायकानुरागाद्धि समग्रं पूर्णमस्यां तथाभूतेत्यर्थः घूर्णिमा चन्द्रः प्रदोष एव रज्यते ग्रनन्तं तु विरज्यते पश्चात् रागापसरणात्। ग्रत्र घूर्णिमन्पदो वस्तुना प्रभीव ग्रनन्यस्यापि ग्रत्यमनुरक्तस्त्वं नानुरज्यसि त्वं न तात: इति नवेति पदद्योत्यं वस्तु व्यज्यते। नवेत्यादि पदप्राधान्यात् पदप्रकाशता। वस्तुना ग्रलंकारस्पदध्वनिमुदाहरति।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सखि नवनिधुवन समरे श्लथकपाली सख्या निविड़या।

हारो निवारित एवोच्छ्वसमाणः ततः कर्षं रमितम्॥

इति संस्कृतम्। हे सखि नवं नूतनं, निधुवनं सुरतमेव समरः संग्रामः, तस्मिन् निविड़या दृढया प्रगलभया, वा श्लथकपाल्या सख्या श्वालिंगन सख्या, उच्छ्वसमाणः हृदयाभिघातं कुर्वन्, हारः मौक्तिक-माला, निवारित एव गाढालिंगनेन त्रोटित एव ततो हारच्छेदानन्तरं त्वया नवोढया कर्षं रमितं क्रीड़ितमित्यर्थः। प्रौढांगनारतादपि विलक्षणं नवोढायास्ते सुरतमित्यर्थः। अत्र प्रश्नोत्तर वाक्यार्थं रतेन वस्तुना हारच्छेदानन्तरं कीदृशी रीतिर्जातेति कथयेति कर्त्रा पदेन व्यज्यते। अत्र कर्त्रा पदं प्रधानमिति पदप्रकाशपता। अलंकारो वस्तुध्वनिमुदाहरति। प्रोव श्रन्तीति।

प्रोवशन्ती गृहद्वारं निमीलित वदना त्रिलोकयन्त्यन्यम्।

स्कन्धे गृहीत्वा घटं हा हा नष्टं इति रोदिति कोमलो॥

इति संस्कृतम्। जलानयन व्याजेन संकेत स्थानं दत्वा शून्यं तोटलक्ष्य जलघटं स्कन्धे गृहीत्वा गृहद्वार पर्यन्तं समागतां पश्चात् संकेत-स्थान प्राप्तिं स्व कामुकमवलोक्य पुनर्जलानयन व्याजात् संकेत-स्थानं गन्तुं त्रिमीलितं वदनं कृत्वा द्वारस्खलन व्याजेन घटं पतित्वा लोकवञ्चनायै रुदती सखी प्रतीयते इति:।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

[illegible] हे सखि गृहद्वारं व्रजन्ती त्वं स्कन्धे

घटं गृहीत्वा विवर्तित वदना सती [illegible]

पथि गच्छन्तं कामुकं विलोकय हा हा नष्टो घटः।

इति किमिति शेषिति इत्यर्थः। अत्र [illegible]

काव्यलिंगालंकारेण संकेत स्थानं गच्छन्तं कामुकमिति शेषः।

दृष्ट्वा व्यवलोकय यदि तत्र गन्तुमिच्छसि तदा शून्यं घटं

अहं तत्र प्रवस्तुमभीप्से सर्वं समाधास्ये

गृहीत्वा गच्छ इति वस्तु किमिति पदेन व्यज्यते। यथा वा।

वेष्टलमिति।

विश्रृंखलां त्वां सखि दृष्ट्वा घटेन तरलतरदृष्टिम्।

हारस्पर्शनिषेण चात्मा गुरुक इति पातयित्वा विभिन्नः॥

[illegible]

हे सखि विश्रृंखलां त्रोटनभारवशात् व्याकुलां

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अतएव तरलतरदृष्टिं त्वां दृष्ट्वा घटेन स्वात्मा

[illegible] स्फोटित: इत्यर्थ:। अत्र नदीकूले कृतसंकेत मत्पार्श्वं गृह-
प्रवेशानन्तरं पश्चात्गतं दृष्ट्वा पुनर्नदीगमनव्याज हारोपघातव्याजेन
त्वया घट: स्फोटित: इति मया [illegible] वेत्थारेतं तत् कथं विश्वासं
न करोषि स्वार्थसाधनाय गच्छ [illegible]
[illegible] इति वस्तु हारस्पर्शनव्याजेनात्यद्भुतत्वालंकारेण व्यज्यते।
अद्भुतालंकारस्य लक्षणमुदाहरति- जोहूति।

ज्योत्स्नया मधुरसेन च विनीतनाकृष्णोत्सुकमना: सा।
वृद्धापि नवोढेव परवधूरहह हरति तव हृदयम् ॥ इतिसंस्कृतम्।
वृद्धा परवधूसख्यं स्वनाम्नमुपदिशन्त्या: तस्या: कोऽभिप्राय:। अहहेति
खेदे। वृद्धापि सा यामिका ज्योत्स्नया चन्द्रिकया नवसन्तरसेन च मधुस्या-
स्वादेन च दुर्नयसुतया यौवनसुलभं यथा तादृशापि मतो हेतो:
परवधू: सा अतो नवोढेव तव हृदयं हरति। अत्रापि परवधूत्वेनैव
हेतुना सा तवचित्तं हरति अतु सौन्दर्यातिशयादिनेति भाव:।
परवधूत्वं हृदयहरणे हेतुरिति काव्यलिंगालंकार:। तेन तदीयसा-
भिप्रेतं वक्तुं न शक्यते इत्याक्षेपालंकारो व्यज्यते। [illegible]
एष अनन्तरोदाहरणेषु कविनिबद्ध यौवनोन्मत्तनिष्पन्नशरीर:
व्यक्त इति शेष:। इदमुदाहृतमिति। त्वामस्मि वचमीत्यादिभि
रित्यर्थ:। शब्दार्थोभयशक्त्युद्भवस्तु ध्वनि; पदवाक्ययो न

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अ भवतीति वाक्यप्रकाश्य। ग्रष्टादश पदप्रकाश्य सप्तदश भेदाणां पञ्चत्रिंशत् भेदा। ध्वनेरित्यर्थः। ग्रन्यान्तर संक्रमित वाच्य, ग्रत्यन्त तिरस्कृत वाच्य, ग्रलक्ष्य क्रमाः त्रयो भेदाः। लक्षणेषु वस्त्वलंकार-भेदेन शब्दशक्ति मूलो द्विविधः। ग्रर्थशक्तिमूलो द्वादशविधः एषां सप्तदशभेदानां ~~वाक्यमूलत्व~~ पदवाक्यमूलकत्वेन द्वैविध्ये पञ्चत्रिंशत् भेदाः। उभयशक्तिमूल, एक, इति मिलित्वा पञ्च-त्रिंशत् भेदा। भवन्तीति भावः। ग्रनन्धेऽपीति। ग्रर्थशक्तिभूः ग्रर्थशक्ति मूलो द्वादशविधो ध्वनिः नकेवलं पदवाक्ययोरेव ग्रपितु ग्रनन्धेऽपि भवतीत्यर्थः। ग्रनन्धश्च संघटित नानावाक्य समुत्कार्य ग्रन्थ रूपः। ~~सकल प्रबन्धानुगत रसोद्बोधक~~ ~~स्वरूपतीकरणात्मके~~।

~~पदैकदेश पदार्थश्च वाक्यार्थ प्रबन्ध~~।
~~विषयेऽपि प्रकृते प्रबन्धश्चमिष्यते~~।

तत्र पदवाक्ययोरुदाहरणं ग्रनन्धे तूदाहरति। येषेति। प्रबन्धे वस्तुना वस्तुध्वनिमुदाहरति- ग्रत्रेमिति। हे जनाः, ग्रस्मिन् श्मशाने क्षिप्त्वा ग्रत्रं न स्थातव्यमित्यर्थः। कीदृशे गृध्रैः गोमायुभिः शृगालैश्च संकुले व्याप्ते तथा कंकालैरस्थिभिः बहुले ग्रतएव घोरे दारुणे सर्वेषां प्राणिनां भयंकरे त्रासजनके इत्यर्थः। ग्रस्मिन् संसारे कालधर्म

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

मृत्युमुपागत: [redacted] मित्रं द्वेष्य: शत्रुर्वा ज्ञाति। न [redacted] न जीवितं शक्नोति। यत: प्राणिनां संसारिणां गति: स्वभाव:

[redacted] रेनेदो न कार्य:। [redacted]

[redacted] त्रिरात्रादिनसे प्रभवत: समर्थस्य गृध्रस्य पुरुषविसर्जन परिभवं वचनमिति। एवं गृध्रसंवादे उदाहृतम् गोमायु संवादे उदाहरति- उन्नमित्योऽयमिति। हे मूढा, उन्नयमादित्य: सूर्य: स्थितो ज्ञात्वा [redacted] उन्नतो यूयं स्नेहं उन्नयति मृतवाले स्नेहं कुरुत उन्नयं सन्ध्यात्मको मुहूर्त: बहुविघ्न: राक्षस-वेलात्वात्, कदोन्नत् जीवति। [redacted] कनकवर्णाभं सुवर्णकान्तिं, उन्नद्धापूर्णयौवनं [redacted]

[redacted] इति रात्रौ विजृम्भमाणस्य गोमायोर्जनव्यावर्तन [redacted] एवं वस्तु व्यज्यते। उन्नये च ध्वनेरेकादशभेदा। ग्रत्पनिस्तरभयान्नोदाहृता: स्वयं तु लक्ष्मेष्वनुसर्तव्या:। पदैकदेशश्लेषेण सम्भोगशृंगारस्य ध्वनिमुदाहरति- [redacted] इति।

रतिकेलिहतनिवसन करिकलभ कटं नमन मृगलक्ष्म
कृष्णस्य चुतपे नमन पातत् पारयुज्यत जयति।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

इति संस्कृतम्। रुद्रस्य महादेवस्य तृतीयं नयनं ललाट लोचनं पार्वत्या। गौर्या। पीयुम्बितं स्पृष्टं सत् जयति सर्वोत्कर्षेण वर्तते। कीदृशस्य रुद्रस्य। रतिकेलौ सुरत क्रीड़ायां हृतं निवसनं वस्त्रं येन गौर्याः करिकिसलयाभ्यां करपल्लवाभ्यां रुद्धं पार्वत्या। नयनयुगलं नेत्रद्वन्द्वं यस्य तादृशः। अत्र शृंगारोभिव्यक्तौ जयतीति धातुरूप-पदैकदेशस्य प्राधान्यम्। [illegible] करीपीड़ितपदेन पा

युम्बनपीड़िते उत्कीर्त्तिर्व्यज्यते। नासत्य पदैकदेशे संभोगशृंगारस्य ध्वनिमुदाहरति प्रेयानिति। प्रेयान् प्रियतमः सशपथं शपथेन सहितं यथा स्यात्तथा पादयोरागतः प्रणतोऽपि प्रणामकृतः निराकृतः सन् उन्मनाः उत्सुकमनाः वासभवनात् क्रीड़ागृहात् द्वित्राण्येव पदानि यावत् न याति न गच्छति तावत् कृतप्रणामं यथा स्यात्तथा धावित्वा धृतः निरुद्धः पाणिसम्पुटे प्रणामार्थं कृताञ्जलौ गलन् स्खलन् नीविकर्त्ये [illegible] यथा स्यात्तथा प्रह्वो प्रणाश्रयं प्रेम्णः स्नेहस्य गीतः स्वभावो विचित्रा विलक्षणेन भवतीति शेषः। अत्र पदानीति न तु [illegible] उच्चारयतीति शेषः। तेनोत्कण्ठातिशयो व्यज्यते।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तेन च सम्भोगो व्यज्यते। प्रत्यभरूप वैदग्ध्य देशभाः तिङ् सुपोः

72

सम्भोग शृंगारस्य ध्वनिमुदाहरति- पीत्वेति। वसन्तवर्णनमिदम्।

पीत्वा पीत्वा नीतमार्गं उन्मुक्तानां ग्राम्य कान्तः शुक चञ्चूनामिव

चारुभिनोदयतीति। एवं दिशि दिशि प्रीतिदेशं वीक्ष्यां लतानां

लास्यको नर्तकः पवमानो वायुश्चास्ति तत्कार्यमाह क्रीणातीति।

प्रीतिपुरुषं, द्राक् झटिति पुष्पं धनुर्यस्य स पुष्पधन्वा कामः

सायकान् क्षणान् किरति क्षिपति। एवं कामोद्दीपने जाते प्रीति पुरुषी

प्रीतिनगं मानिनीनां स्त्रीणां मानस्य चर्वी वार्ता विनिवृत्ता गतेत्यर्थः

[redacted] अत्र किरतीति

क्रियाया क्षेपणस्य साध्यमानत्वं क्रियारूपे वर्तमानत्वं निवृत्तेति

निवर्तनस्य [redacted] क्रिया [redacted] सम्पूर्णत्वनिश्चयः।

तिङन्त सुपन्तेति। [redacted] किरतीति तिङ् प्रत्ययेन निवृत्तेति सुप्प्रत्ययेन

तत्रापि इह प्रत्ययेन अतीतत्वं [redacted] अभिव्यज्यते। सुप् तिङ्-

विशेषेषु विप्रलम्भ शृंगारस्य ध्वनिमुदाहरति। लिखनीति। हे कठिने

निर्दये तव प्राणान् दयितः प्रियः इहगोऽपि अत्रगतः नाट्यः भूमौ न

तु अमौ लिखन् अन्यत्र हृदयतया [redacted] विलिखन् न तु लिखतीति

तेन लिखनस्य अनवधिपूर्वकत्वं द्योत्यते। नाट्यः कश्चिद्देशो न

तु गुहमध्ये अवास्ते अपीवक्षो नीत। न तु अवासीत्। [redacted]

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

~~अपि अवस्थे अवस्थाने~~ सर्वाः सर्वाः नमस्याः

विराजन्ताः सत्यः सततं निरन्तरं मत्स्वरूपं तेनोद्यूने जातशोथे

नयने चक्षुषि यासां तथाभूताः सन्तीति शेषः। तथा पञ्जरस्थैः

शुकैः हसितं हसनं पठितं पठनं यन्मच्च सर्वं शारीरधारणो-

पयोगिभोजनादिकं परित्यक्तं तव पुनः अवस्था इयं ईदृशी

जैतिते। अस्मद्यौजजीनिका जाता। अतोऽधुना मानं विसृज

अवश्यं त्यजेत्पर्यन्तः। अत्र लिखनीति शतृप्रत्ययेन लिखनस्य

अवस्थानस्य प्रसादपर्यन्तता द्योतिता। आस्ते इति वर्तमाननिर्देशप्रत्ययेन

अवस्थानस्य प्रसादपर्यन्तता द्योतिता। भूमिमिति द्वितीयया लेखनीयं

किमपि नास्तीति द्योत्यते। ~~यौ पुरुषौ एवं वेदितुं निश्चितुं शीलतीति~~

एवमत्र तिङ्सुप्तिङन्तानां व्यंग्यत्वम्। सम्बन्धस्य

व्यञ्जकत्वमुदाहरति गोमेति। ग्रामरुहास्मि ग्रामे वसामि

नागरस्थितिं न जानामि। नागरीणां पतीन् हसामि या भवामि

सा भवामि॥ कश्चित् वृषभारूढा ग्रामीणा नागरीभिरुपहसिता सती

ता: प्रत्याह। अहं ग्रामरुहा ग्रामे जातास्मि ग्रामे एव वसामि न

नागरस्थितिं नागरभावं न जानामि ग्रामे एवानिशं वासात्।

परन्तु नागरीणां अनादरे षष्ठी पतीन् हसामि। अत्र

नागरीणामिति षष्ठ्या व्यंजकत्वम्। तेन च

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स्वरूपोत्कर्षो व्यज्यते। पदैकदेशस्य रौद्ररस व्यंजकत्वमुदाहरति रमणीय इति। अत्र क्षत्रियकुमारस्य रामः रमणीय आसीत् इत्यत्र आसीदित्यतीतकालबोधकलङ्लकारमत्क्रोत्थकर्तृत्वस्य क्षत्रियकुमारस्य रमणीयत्वमतीतमिति व्यज्यते। तेन च क्षणादेनं संहरामि इति शक्तीत्या। क्रोधोत्तेजको व्यंग्यः। वचनस्य व्यञ्जकत्वमुदाहरति दाक्षीमिति।

तेषां गुणग्रहणानां तासामुत्कण्ठितानां तस्य प्रेम्णः।
तासां भणितीनां सुन्दर ईदृशं जातमवसानम् ॥ इति संस्कृतम्।

हे सुन्दर तेषां गुणग्रहणानां गुणवर्णनानां तासामुत्कण्ठितानां मम सान्निध्ये जातानां तासां भणितीनां त्वमेव मम सर्वस्वमित्यादीनां वचनानां तस्य प्रेम्णः त्वत्कर्तृकगुणग्रहणादिजन्यस्य मत्कर्तृकत्वीयस्य प्रेम्णः ईदृशं कलुषितं वचनानां परिपाकः जातमित्यर्थः। अत्र गुणग्रहणादीनां बहुत्वं बहुनिष्ठत्वं प्रेम्णश्चैकत्वमेकनिष्ठत्वम्। अत्र प्रेम इत्यनेन ज्ञानात्मकस्य कार्यं प्रेमैकजातीयमेव न कथञ्चिदन्यथाभावं प्राप्तमिति व्यज्यते। तेन च विप्रलम्भोत्कर्षो व्यंग्यः। प्रकृतवचनस्य व्यंजकत्वमुदाहरति रे रे इति। रे रे इति साक्षेपसम्बोधनम्। अत्र त्वत्कुलनायां कामिन्यां उक्तोक्तता गर्भिता कोपगर्भिलोषो मम तापमतनोत्।

CC-0. Lal Bahadur Shastri Sanskrit University, Delhi. Digitized by Sarvagya Sharada Peetham

किं नृत्यसि, किं त्वं रागं मन्यसे मदहं विहरिष्यामि इति
वत दुःखे हतां निन्दितामिमां मन्तरा शं मुञ्च त्यज मतः
रणा स्त्री त्राशा ना संसारः; प्रपञ्च रत्न चारां निधिः
समुद्रः तस्मिन् मज्जनामेति शेषः/कण्ठतटे शिला इषद्
कृता निधात्रेति शेषः। त्रत्र प्रहासो व्यज्यते तेन च
शान्तरसः सङ्कुष्यते/पूर्वनिपातस्य भाव व्यञ्जकत्वमुदाहरति
षामिति। षेषां राज्ञां दौर्बल्येन बाहुबलमेनास्तीति शेषः/
वीतिबलं, ते राजानः दुर्बलतया निर्बलत्वेन सम्मताः
तैरपि उर्वीश्वरैः राजभिः केवल नीतिशास्त्रैः केवल नीति-
नयैः किं कार्यं न किमपीत्यर्थः/तर्हि के समीचीनास्तत्राह/
हे क्षमाशक राजन् ये पराक्रम स्वीकारेण कान्तक्षमाः
कार्य कर्तारः ते त्रिजगती भुवनत्रये ऽपि न स्युरेव/यदि स्युस्तर्हिभवादृशा
द्वित्रा एव द्वौ वा त्रयो वा/ ~~भवादृशास्तु वीराः पराक्रमिणः~~
~~ते केवलं नीतिनयैः वीरतां व्यञ्जयन्ति तेषां~~ त्रत्र पराक्रमस्य
प्राधान्यं ~~व्यञ्जयितुं~~ पूर्वनिपातेन व्यज्यते। उपपदविभक्तेः भाव-
व्यञ्जकत्वमुदाहरति प्रथमेनेति। हे नरप नृप वीराणां वीराणां
यानि चत्वारि तेषां द्वयीं द्वंकां विभर्तीति तादृशे प्रथमाद्यानि

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Siddhanta eGangotri Gyaan

पुरः भागे तस्मिन् तव निषूदः शत्रूणां विशेषतोभिव्यक्तः

स्वरैः यस्य रामस्य यशांसि गायतीव मुद्देश। यस्मै क ~~जायते~~ 74

बाणाहतमा जानानि प्रति श्रेणीभूत विशाल तालानां विवराणि

तैरुद्गीर्णा इवाशिता। ~~[illegible]~~ अत्र उन्नमीति

सर्वनाम्नो भुवनेष्विति गुणैरिति च जातिपरिव बहुवचनयो:

उन्नम्नादिति - सर्वोत्कृष्टो भाग्य विषयमात् इति उन्नम्नता

विनीतानुरक्तेनाभिधानस्य च वीररसव्यंजकत्वम्। शृंगाररस-

व्यंजकत्वमुदाहरति - हरिणिमनीति। ~~[illegible]~~ चकितस्य भीतस्य

हरिणस्य मृगस्य चले चंचले ~~[illegible]~~ नयने यस्या: तत्सदृशा इयं

नायिका सकल ललनानां स्त्रीणां मौलिमधिवसति स्त्रीमात्र-

मूर्धामणीरित्यर्थ:। कस्मिन् सति हरिणिमनि नारुण्ये सत्यां

कटाक्षविक्षेपपटिष्ठां कलयति नायिकायै शिक्षयतीति सतीत्यर्थ:।

भ्रुवोरग्रे भ्रूलताग्रे मदनधनुष: कामचापस्य समीपे कलाप्रवीति

सति। अत्र ~~[illegible]~~ इमनिजादीनां त्वायेजि: तुल्ये वाचकत्वे

अस्ति कश्चित् श्रुतिकटुत्वादि हीनो माधुर्यादि गुणश्च स्वरूपस्य

विशेषो भेदः मनश्चमत्काजनकः स एव व्यंजकः इति।

वर्णरचनानां व्यंजकत्वं गुणस्वरूप निरूपणे उदाहरिष्यते। ~~[illegible]~~

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by eGangotri Sharada Peetham.

बन्धेषु नाटकादिषु रसादयो व्यंग्या इति शेषः। एवमुत्कीर्त्य
पूर्वगणितभेदाभ्यां वाक्यपदप्रकाश्याभ्यां रसादीनां व्यङ्ग्य-
क्रमाणां षड् भेदाः भवन्तीत्यर्थः। पूर्वगणितभेदा इति।
पदैकपञ्चाशत् इति। व्यङ्ग्यनिर्दिष्ट वाच्यस्य व्यञ्जयन्ति संकीर्णता-
मन्तरेण तिरस्कृत वाच्यतया द्वौ भेदौ। तौ च प्रत्येकं पदवाक्यभे-
दैरिति चत्वारः। विवक्षितान्यपर वाच्येषु व्यङ्गलक्षण क्रम व्यंग्यस्य
उत्कीर्त्यमा षड्। अलक्षण क्रम व्यंग्यस्य तु एक चत्वारिंशत् भेदाः।
वाच्यशून्य मूलस्य द्वौ भेदौ। तौ च प्रत्येकं पदवाक्यभेदैरिति
चत्वारः। व्यङ्ग्यशब्दोद्भवस्य दश भेदाः। ते च प्रत्येकं
पदवाक्यप्रबन्धगता इति षट्त्रिंशत्। अभिधाशब्दोद्भव-
स्त्वेकः। इति एक चत्वारिंशत् मिलित्वा शुद्धस्य ध्वनेः
एक पञ्चाशत् भेदाः। संकीर्णभेदानाह-तेषामिति। तेषां एक-
पञ्चाशतो भेदानां त्रिरूपेण संकरेण एक रूपया संसृष्ट्या च
अन्योन्य भोजने परस्पर गुणने सति वेदरवाब्धिविपञ्चभाः
(१०५०५) युद्ध भेदैः सह शरेषुयुगखेन्दवः (१०५०८)।

तेषूदाहरणं दीयते-
उदाहरणमात्र, पदैकमात्र मुदाहृतं, रक्षति।

क्षणप्राच्युतिकादेवं जातमद्य सुभग किमपि ते भीरुता।
शेषस्तिं गृहपश्चाद्भागे बल्लीगृहे ऽनुनीयतां वराकी॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ग्रन्थेऽपि पुङ्खमक्षरि पतन्तु नेत्रे ज्ञापृरिति भाव: । भवांस्तु 75
दिवसेन विधि, ब्रह्मा सिक्ता, देवा: तत्क्षणाद्रूपं ग्रन्थुङ्
पुङ्खं कृतवानित्यर्थ: । ग्रत्र पेङ्खेखेनेति ग्रपवर्गतृतीया फल-
प्राप्तिं पुङ्खरूपेऽप्रधाने क्रियायां द्योतयति व्यनक्तीत्यर्थ: ।
[illegible] विज्ञलम्भशृंगार व्यभिचारीदाहरति भूरिति ।
भवनस्य वासगृहस्य या नद्यो तत्र तुङ्गं महत् मत वातायनं
गवाक्ष: तत्रस्थिता गाढन्ती भूमौ भूमौ वांछां सौकुमार्य नगरी-
सम्बन्धिरूपया ग्रन्वेति, राजमार्गेण पर्यटन्तं इतस्ततो गच्छन्तं
माधवं रति: कामभार्या नवं दाहानन्तरमुत्पन्नं कामदेवमिव न
साक्षात् ग्रत्यक्षं दृष्ट्वा पुन: पुनरवलोक्य गाढोत्कण्ठया लुलित-
लोलैत: ग्रतिभ्लानैरङ्गकै: तामिति ग्लायति । ग्रत्र नवं
कामभित्पनेन प्रसिद्धकामापेक्षया व्यतिरेक: दृष्ट्वा दृष्ट्वेति वीप्सया
रागोत्कर्षं व्यनक्ति । ग्रत्र ग्रनुकम्पा नृचे: ग्रनुकम्पा द्योतकस्य
क्रियारूपतद्धितस्य विज्ञलम्भशृंगार व्यंजकत्वम् । उपसर्गस्य
विप्रलम्भशृंगार व्यभिचारिदाहरति-पीच्छेदेति । कोऽपि ग्रतिविचलनात्मो
विकार: कामजन्यो भाव: मम माधवस्य ग्रन्तः करणं जडयति मोहयति ।
तापं विरहसन्तापं च कुरुते कीदृश: पीच्छेद: इयत्ता तद्रोहित:
तमा सकलानां वाचक लाक्षणिक व्यंजकानां वचनानां

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ग्रहविषयः ग्रहगोचरः, ग्रहाभिधया लक्षणया व्यंजनयापि च

शब्दैः निर्वक्तुमशक्य इति भावः। तथा पुनः ग्रहकात्यान्तरे

ग्रहस्मिन् जन्मनि वा ग्रहनुभवपदं ग्रहनुभवविषयं सो न

गतवान् न प्राप्तः तथा विवेको दोषगुणविभागः तस्य

प्रध्वंसात् ग्रहत्यन्तनाशात् उन्मिलतो वृद्धिं प्राप्तो यो महामोहः,

तेन गहनः प्रकृष्टः इत्यर्थः। ग्रत्र प्र [redacted] रत्युपसर्गस्य

विप्रलम्भशृंगारव्यंजकत्वम्। वीररसव्यंजकत्वमुपहसति-

कृतीति। हे राजन् त्वया मनः चित्तं गर्वस्याहंकारस्य

ग्रभिभवनं सम्भवं कृतं वोऽस्माकं द्विषः शत्रवो निहताश्च।

तत्र दृष्टान्तमाह- तमांसि तावत् तिष्ठन्ति यावत् ग्रंशुमान्

सूर्यः उदयाद्रेः सौमित्तां उदयं नायाति। उदिते तु तस्मिन् न

तिष्ठन्तीत्यर्थः। ग्रत्र तुल्ययोगिता द्योतकस्य चेति निपातस्य

वीररसव्यंजकत्वम्। ग्रथवा रामोसाविति। रामः भुवनेषु

निरुपमगुणैः परां प्रकृष्टांपंक्तिं प्राप्तः। रणे सौमित्तां दानस्मानशक्तत्वं

व्यज्यते। ग्रत्रसाविति। खरदूषणादिनिहन्तृत्वेनातिप्रसिद्धः परं

ग्रस्मद् भाग्यविपर्ययात् ग्रस्माकं भाग्यस्य ग्रन्यथा

विपरीतजातात्, यदि तमपि देवो भवान् न जानाति तत् किमु

वक्तव्यं रघुः स्मरत्ति प्राप्तः वन्दीव वैतालिकः इव सन्धिं

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

इति संस्कृतम् । हे सुभग देवर ~~[illegible]~~

76

~~[illegible]~~ तव यः जयः उत्सवः तत्र अजमात्रं व्याघ्रीकाः अतीतोपः सा ते तव जाया पत्या किमपि अन्नपानं भोजिता सती गृहस्य पश्चाद्भागे ~~[illegible]~~ वत्सभीगृहो यत्री ~~[illegible]~~ सोपविशेत् । सा वरारोहा दैना अनुनीयताम् । अन्नानुनयः किमुपभोग लक्षणे अन्नलीन्नो संकुचितः अन्नपना अन्नरक्षनन्यायेन उपभोगे सर्व अंगे अपंगक । इति सन्देहः । अथवा उपभोगे सर्व तात्पर्यपर्यवसानात् सन्देहस्य नदोषत्वम् । संसृष्टेरुदाहरणमाह- स्निग्धेति । स्निग्धा श्लक्ष्णा श्यामला कृष्णा या कान्तिः तया लिप्तं निपदाकाशं यैः तथाभूताः । वल्गन्तः रेवलन्तः बलाकाः बकपंक्तयो येषु तथाभूता । ये मेघाः ते कामं प्रेयसः सन्तु शीकाः शम्बूकणशीलनः वाता । अपि कामं सन्तु । पयोदे मेघः सुहृन्मित्रं येषां तेषां प्रभूताणं कलः मधुरा अन्नानन्दकेकाः ~~[illegible]~~ वाणः कामं सन्तु । इदं कैकेयीहृदये अन्नं रामोदन्तम् । सर्वं सहे वैदेही सीता तु स्त्रीत्वात् सुकुमारत्वाच्च कथं भविष्यति कथं जीविष्यतीत्यम् । तज्जीवनं न संभाव्यते । हे देवि सीते त्वं धैर्यम् अव

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

धैर्यं कुर्वित्यर्थः। अहं हे सर्वं सहे पृथ्वी देवि त्वं

वीरमत्र दुष्टनृशंकेन मा विधैर्या भवेत्यर्थः॥

अत्र लिप्तेति पयोऽमुहयामिति च अत्यन्त

तिरस्कृत वाच्ययोः संसृष्टिः ताम्यं सहे अहं तु सर्वदः सवपात्रं रामोऽस्मीति

अत्रार्थान्तर संक्रमित वाच्यस्य ध्वनेरनुग्राह्यानुग्राहकभावेन

रामपदलक्षणैक देशाकानुप्रवेशेन च

अत्रार्थान्तर संक्रमित वाच्य रसध्वन्योः संकरः पूर्वेभ्य

अत्यन्ततिरस्कृत वाच्याभ्यां सहे त्यर्थः। एवं अत्रान्यदपि

उदाहर्यमिति। इति काव्यप्रकाशे कारिकाणां ध्वनिभेदप्रभेद-

निर्णयो नाम चतुर्थ उल्लासः।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

एवं भेदे प्रभेदानाह ध्वनौ उत्तम काव्ये निर्णीते प्रदर्शिते

सति इत्यर्थ:। गुणीभूत व्यंग्यस्य मध्यम काव्यस्य प्रभेदान्

प्रबान्तर भेदान् प्रक्रमा संगत्या इत्थं दर्शयतीत्यर्थ:। अगूढमिति

अगूढं अप्रकटैरपि कोटिति संवेद्यं, अपरस्य प्रधानस्य अंगं

वा उपस्कारकं वाच्यसिद्ध्यंगं वाच्यार्थस्य सिद्धे: अंगं निदानं

अस्फुटं सहृदयानामपि कुरस संवेद्यं, संदेहवत्तुल्य प्राधान्ये संदिग्ध-

प्राधान्यं तुल्यप्राधान्यमिति क्रमेणात्मर्थ:। ~~संदेहवत्तुल्य वाच्यस्फुटं~~

~~अंगमेवास्फुटं वा प्राधान्यं सहृदय [illegible] तत्काल तुल्ये~~

~~संदेहितत्वं [illegible]~~ अत्रेति वाच्यस्फुटो अत्र

चमत्कार: व्यंग्यस्फुटो वेति सन्देह:। एवं चमत्कार जनने वाच्य-

व्यंग्ययो: द्वयोरपि समर्पकत्वेन तुल्यत्वं ~~[illegible]~~

ध्वनिना कोटिति प्रकाशितम्। ~~[illegible]~~

अस्फुटं चमत्कार जनने वाच्यमुखवीक्षकं, ~~[illegible]~~

~~[illegible]~~ एवं अतं व्यंग्यं गुणीभूत व्यंग्य काव्ये भवतीत्यर्थ:। एवं

गुणीभूत व्यंग्यस्य मध्यम काव्यस्य अष्टौ भिद: भेदा: स्मृता:

कथिता:। अष्टाविति न्यूनाधिक संख्या निरासाय। इदं च

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

काव्य कोपनो कुपैक देशवत् चमत्कारात्। अगूढ

स्फुटतया वाच्यायमानं वाच्यसदृशमिति गुणीभूतमेवेदमपि।

प्रगृह्यमुदाहरति यस्येति। यस्य मम प्रसुप्तस्य शत्रुः

तेन कृता तिरस्कृतिः तिरस्कारः रण्ये प्रागत्य तप्तया

सूच्या लोहशलाकया यो वक्षः वेध्यः तस्य व्यतिकरः।

पौनःपुन्यं तेन मुनेरुक्तम्/ प्रसुप्तात् शरणागतस्य शत्रोः तप्त-

लोहशलाकया कर्णवेधः क्रियते/ स एषः प्रसुप्तं सम्प्रति

कान्त्यौदार्यगुणस्य प्रथनं तद्रूपस्य कर्मणो भाजनं पात्रमस्मि

~~[illegible]~~ प्रसुप्तो जीवन्नपि न भवामि

प्रसुप्तलाक्ष्यजीवनोऽस्मीत्यर्थः/ परन्तु किमावहामि किं

तरोमीत्यर्थः/ अत्र जीवनोनीत पदेन प्रसुप्तलाक्ष्यजीवित्व रूपे

प्रसुप्तान्तरे संक्रमितवाच्यं तस्य च मज्जेन शेषः इति

व्यंग्यम्/ तच्च प्रसुप्तपदेनापि वाच्यवद्गम्यमित्यप्रगृह्यं

गुणीभूतव्यंग्य काव्यम्। ~~[illegible]~~

~~[illegible]~~

~~[illegible]~~

प्रगृह्यमेव व्यंग्यमन्यनिरस्कृतवाच्ये उदाहरति-

उन्मेषेति। उत्तिष्ठं विकसितं यत् जीवनष्टं रक्तकमुकं

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagyan Sharada Peetham

वेडणुका पराजेण [illegible] पिसंगिताणि पिसंगवर्णानि अङ्गानि

येषां ते मधुपः भ्रमराः गृहदीधिकासु गृहवापीषु 78

मनोहरं मधुरस्वरं यथा गायन्ति गुञ्जनं कुर्वन्ति। एतत् रवेः

बिम्बं सूर्यमण्डलं प्रकाशते प्रकाशेत। कीदृक् ? उदय-

पत्तपुन्निव उदयाचलसम्पर्कपुञ्जं, अतएव नवस्स नूतनस्य

कन्दुजीवपुष्पच्छदस्य प्रभा कान्तिर्यस्मिन् [illegible]

तत्। अत्र पुम्बतेः वक्त्रसंयोगो भ्रूभेदोऽर्थः स चा-

क्षेतने रवीबिम्बे क्षीप्तः इति संयोगमात्रं लक्ष्यमेतो

त्पत्ना निरस्कृत वाच्यत्वं, व्यंग्यस्य उषः मालारूपः

स च वाच्यायमानतया अवरुद्ध इति [illegible]

[illegible]

[illegible]

[illegible] व्यंग्यं

[illegible] व्यंग्ये अर्थशक्तिमूलध्वनौ उदाहरति अत्रासीदिति। अत्र

अस्मिन् स्थले क्षीणोपाये नागपाशे। तेन यद् वक्ष्यमाणयो

रिति शेषः। तस्य विधिरासीत्। भवद्वैरे लक्ष्मणे वधीसे

उरसि जाटं लोडिते सति हनुमता अत्र द्रोणाद्रेरेव नतु

तदधीन औषधमात्रमहृत। आनीत। इति तत्परा क्रो[illegible] अन्यो।

[illegible] लक्ष्मणो [illegible] व्यंग्यं

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

नर्म क्रीडितः। इन्द्रजिदि त्युक्त्या लक्षणयाऽत्र नर्मोच्यते।

अत्र हे मृगाक्षि, केवलम् शब्दोऽधिकृत्य नाम्नैवेत्यवधेयम्।

राक्षसपतेः रावणस्य कण्ठस्य ग्रहत्वं कृत्वा स्थिता।

[illegible] मेवोत्पद्यते केनापीत्युक्ते [illegible]

[illegible] रामस्य वक्षः पश्यतः तस्याप्यत्र

इति पाठे तु गूढतया ध्वनित्वेन स्थादिति भावः।

ग्रहपरस्य रसाङ्गः वाच्यस्य वा वाक्यार्थीभूतस्य वाच्य-

तात्पर्यविषयतया प्रधानस्येत्यर्थः। शृङ्गं शृङ्गारोत्कर्ष-

कारकं रसादिः शृङ्गारः तस्य रसस्य शृङ्गारोत्कर्षकमित्यर्थः।

एवञ्च द्विविधमपराङ्गं व्यङ्ग्यमिति भावः। उदाहरति

शृङ्गं यस्येति। स पूर्वानुभूत रसनोत्कर्षणादि प्रश्नः कः?

हस्तः शृङ्गं दृश्यमान दूरवस्थः रसनोत्कर्षी रशनां

उत्कर्षतीति रशनोत्कर्षी मेखलाकर्षकः पीनस्तननिर्मर्दनः

पीनयोः स्तनयोः निर्मर्दकारी नाभिश्च ऊरू च जघनं च

तानि स्पृशति तच्छीलः नीव्या, नाभितलवसनग्रन्थेः

विस्रंसनः मोचकः इत्यर्थः। शृङ्ग नायिकाविषयो

मकाक्षपः शृङ्गारः कृष्णस्य नायिकाश्रयस्य शृङ्गं जातमिति।

षः।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

प्रसंगं प्रसंगमुदाहरति कैलासेति। गिरिसुतः पार्वत्याः सा पांडुनलानां पुनः कान्तेः वः युष्मान् त्रायतां रक्षतु कीदृशी? कैलास। प्रालेयः स्थानं यस्य तथाभूतस्य शंभोः भालसम्बन्धिनो लोचनस्य नेत्ररूपस्य रुचा प्रभया कान्त्या निर्वर्तिता सम्पादिता प्रत्यग्रस्य नवीनस्य लाक्षारक्तस्य व्यक्तेः प्रसरणं यस्यां तथाभूता मालिन्याः पादपतने लाक्षाकृष्णललाटेनेव प्रभासम्पर्कादिति भावः सा का? यया नखक्षत्या सुहृदं मम स्मरस्य रुद्धा कोकनदस्य रक्तोत्पलस्य अनुकारः सादृश्यं यस्यां ताहशी कोकनद-सदृशीत्यर्थः। प्रत्यग्रेव सरसा प्रतिशोभिता नेत्रयोः कान्तेः कामजनिता प्रीतेः सख्युः तत्क्षणं समुत्सर्पते विशेषं दर्शयति। प्रकृत पार्वतीविषयक रत्यारूयभावस्य कविनिष्ठस्य महादेवनिष्ठः पार्वती-विषयकः सम्भोगरूपः शृंगारोऽङ्गमिति शेषः। प्रसंग-प्रसंगमुदाहरति-प्रत्युच्चा इति। हे पृथ्वीति इतिपूर्वार्धे प्रत्युच्चाः प्रत्युन्नताः गिरयः पर्वताः पीताः सर्वतः स्फुरन्ति [illegible] वेतिष्ठन्ति। एवं [illegible] प्रतिविस्तृताः प्रकाशमयाः समुद्राः स्फुरन्ति तान्[illegible] रोगे-समुद्रान् विभ्रत्यपि धारयन्त्यपि एवं किमपि न क्लान्ता-

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Siddhanta eGangotri Gyaan

प्रत्यग्रेति। प्रत्यग्रा नवीना या सुरा मदिरा तस्याः [illegible] मुखं [illegible] [illegible] [illegible]

यावत् मुहुर्मुहुः बारम्बारं प्रस्तौमि करोमि तावत् हे राजन्

इमां रुदन्तं सर्वनिःशेषां भुवं बिभ्रत् धारयँस्तव भुजः स्मृतः।

ततः अन्यः पृथ्वी स्मृतिरूपाः मुद्रिताः संकुचिताः इत्यर्थः।

अत्र भोविषयकः कोपोत्थो रतिभावो राजाविषयकस्य रति-

भावस्यांगमिति शेषः। रसाभासभावाभासयोः भावांगतायाम-

प्यंगांगभावमुदाहरति-बन्दीकृत्येति। हे नृप ते तव सैनिकाः

भटाः येषां द्विषां शत्रूणां मृगदृशः मृगसदृशदृशः स्त्रियः

बन्दीकृत्य हठादाहृत्य परयतः तत्प्रयत्नमाननादित्यर्थः।

श्लोकार्थम् । हे राजन् प्रतिभटाः शत्रवः त्वामाजौ संग्रामे समालोक्य स्वाभिधान विकल्पात् संशयान् निरं बहुकान्तं विदधति कुर्वन्ति किमयं भूलोकगतः मार्तण्डः सूर्यः चरन्तु सूर्यैः स्वतु सप्तभिः तुरंगैरितः मुक्तो भवति प्रथमसंख्य उरगयुक्त्वात् नसूर्यः इति भावः नहि कृशानुः अग्निः किमयं रुक्षः सर्वाः दिशः प्रसरति परभक्षनुनतया सर्वदिक्प्रसरणात् नहि साक्षात् हुताशगोचरतां गतः कृतान्तो यमः किमयं परं स नु मोहवाहेन मोहवाहेन अर्थात् प्रथं नु मोहं नामोहति । अत्र प्रथं किं मार्तण्डः तदन्यो वेति संशयात्मकः अत्र प्रतापेन दुर्निरीक्ष्यत्व साम्यात् मार्तण्डत्व संशयः दुरधर्षत्व साम्यात् कृशानुत्व संशयः अनेन सकलहन्तृत्व साम्यात् कृतान्तत्व संशयः सप्राश्च सम्बन्धादेक मुपमेय शेष न वर्तते किन्तु उपमान सामान्येन वर्तते इति भेदोस्तीति भेदात्तो सन्देहालंकारोऽयम् । निश्चयान्तं सन्देहमुदाहरति इन्दौरिति । नायिकां प्रति कस्योचद्वैरियम् । हे हरिणाक्षि मृगनयने रुदत् मुखं इन्दुः किं नहि कलंकः वन तेनेन्दुर्नेति भावः सरोजं पद्मं किं नहि जलं कुत्र गतं जलाभावान्न पद्मामिति भावः लोलते रम्ये सविलासैः विलास सहितैः वचनैः भाषणैः परतः पश्चात् पुरः स्थिति निश्चयतः । अत्र लोलत सविलास वचनरूप नेत्रस्य -

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvasva Sharada Peetham

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

दर्शनात् गुरुत्वेन रूपेण गुरुस्य निश्चये पुनः केनापि रूपेण
न संशयः इति निश्चयाक्षोऽयं ससन्देहालंकारः। काव्यलोका-
सारसंग्रहे भट्टोद्भटेन क्रमभेदोक्तोऽयं निश्चयान्तभेदः इत्यत।
ग्राह किन्त्विति ~~किन्तु निश्चयगर्भं~~ ग्रत्रानिश्चयान्ते न
चतोमयान: इति व्यंग्यो नेत्यर्थः इति हेतोरुक्तो भट्टोद्भटेन
निश्चयस्य व्यंग्यत्व एव चमत्कारित्वात् सूत्रकृता तु निश्चयस्य
वाच्यत्वेऽपि चमत्कारानुभवात् स्वीकृतः। भेदानुक्तौ ससन्देहमुदाहरति।
ग्रस्याः इति। चिबुकेऽर्भशीर्षे पदोमिदम्। ग्रस्याः उर्वश्याः सर्वनिर्मो
निर्माणसम्पदेन यः ग्रजायत ग्रभूत् सः स्वयंजातः स्वनाम्नः
चन्द्रो नु चन्द्रः किं
रताद्दशकान्तः चन्द्रतः एव सम्भवादिति भाव, किं वा शृंगार:
ग्रधानो रसो यस्य स मदनः कामदेवः स्वयं किं रताद्दशरूपलावण्यादे।
मदनतः एव सम्भवात् ग्रथवा पुष्पाकरो वसन्तः किं ग्रथवशनादि-
रूप पुष्पाणां वसन्ततः एव सम्भवात् ननु चोक्तो ब्रह्मा कुतो न
कुतो नमोक्तदा ग्रत्राह वेदाभ्यासेत्यादि। वेदाभ्यासेन जडः
कुण्ठितधीः विषयेभ्यो वनितादिभ्यो व्यावृत्तं निवृत्तं मौनव्रतं
यस्य तादृशोऽ प्राणः वृद्धः मुनिः मननशीलः ब्रह्मा इदं मनोहरं
रूपं निर्मातुं स्रष्टुं कथं नु ग्रभवेत् नैव समर्थो भवेदित्यर्थः। ग्रत्र
ग्रस्याः सृष्टौ यः ग्रजायत: ग्रभूत् सः किं चन्द्रः किं वा मदनः
किं वा वसन्तः इति ग्रजायति धामिकः चन्द्रत्वादि रूप

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

विकल्पवानाभावकोटिकः संशयः। एवञ्चात्र एतद्व्यावर्तो यत्रादेः सन्देहः तस्यापि वैधर्म्यं नास्तीति भेदानुस्यूतो सामान्यो सन्देहोऽयम्। रूपकमनामानमलंकारं मुक्तरसो लक्षयति तद्रूपकमिति। रूपयति एकतां नयति इति रूपकमिति व्युत्पत्तेः। उपमानोपमेययोः यो अभेदारोपः तद्रूपकमित्यर्थः। एतेनोपमाया इदमस्माद् एतीतिसामान्यात् धर्मबाहुल्यात् एतत्पदबहुत्वभेदयोः एकत्वमुखत्वादिप्रकाशितवैधर्म्यापोहेनैव उपमेदः एकोऽभेदः यथा मुखं चन्द्रः इत्यादौ मुखत्वचन्द्रत्वरूपपरस्परविकल्पधर्मनिचया उपोत्पतयोः मुखचन्द्रयोः अभेदारोपः इति बोध्यम्। रूपकं तावत् त्रिविधं सांगं निरंगं परम्परितं चेति। तत्रापि सांगं समस्तवस्तुविषयं एकदेशविवर्ति चेति त्रैविध्यम्। समस्तवस्तुविषयं लक्षयति समस्तवस्तुविषयमिति। यस्मिन् रूपके एतारोपविषया उपमेयाः एतारोप्यमाणाः उपमानानि यदा शब्दोपात्ताः शब्दप्रतीयमानाः नत्वार्थाः तदा समस्तानि वस्तूनि एतारोप्यमाणानि विषयः शब्दप्रतीयमानो एतस्य तत् तत्समस्तवस्तुविषयमेव। समस्तवस्तुविषयं रूपकमुदाहरति उन्मत्तेति। इयं एतनुभवारूढा रात्रिरेव कापालिकी योगिनी द्वीपात् द्वीपं भ्रमति यथेच्छं सर्वद्वीपेषु गच्छतीत्यर्थः। कीदृशी? ज्योत्स्ना एव इन्दुकैव भस्मः तस्य शुभ्रसंगलेपनं तेन धवला शुभ्रा तरलाः नक्षत्राण्येव एतानि विभ्रती दधाना एतन्तर्धानं तिरोभाव एव व्यसनं कौतुकं तत्र

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

रसिका चन्द्रः एव मुखं कपालं दीक्षाकाले गृहीतोपकरणं तत्र लाञ्छनस्य कलंकस्य छलेन व्याजेन न्यस्तं स्थापितं सिद्धाञ्जनस्य परिमलं चूर्णं एतावेवाभिनवतिरोभवसाधनं वस्तु इत्यादिदोषत्यर्थः। अत्र शौवैरेव कापालिकी ज्योत्स्नैव भस्म इत्यादिरीत्या समस्तवस्तुविषयकं रूपकालंकारः। अत्र पादत्रये अन्तर्धानव्यसनरसिकत्वमारोपितं धर्मरूपं आरोपितस्य कापालिकीपदार्थस्य धर्मरूपं ननु आरोपविषयभूतायाः रात्रेरिति हेतोः पादत्रये मद्रूपकं तत्परिग्रहे साध्यकमस्तीति तत्संकरः उपमया सह संदेहसंकरः इति तस्य आशंका न कार्या। एकदेशविवर्तिरूपकं लक्षयति द्वौता इति। यत्रैकदेशे ते आरोपिताः आरोप्यमाणाः द्वौताः शब्दगम्याः अर्थाः अर्थाक्षिप्ताश्च स्युः तत् एकदेशविवर्तिरूपकमुच्यते। एकस्मिन् देशे विवर्तनात् विशेषेण वर्तनात् एकदेशविवर्ती। तदुदाहरति जयन्ति।

यस्य रणान्तःपुरे कं कुर्वतो मण्डलाग्रलताम्।
रसिसम्मुखीमपि सहसा पराङ्मुखीमकीर्तिरिपुसेना॥ इति संस्कृतम्।

यस्य राज्ञो रणरणान्तःपुरं तत्र मण्डलाग्रः खड्ग एव लता तां नायिकां च कं चाङ्गं कुर्वतः गृहीतवतः मुक्तार्थं रतार्थं चेति भावः। रिपुसेना शत्रुसेना द्वौतनामिका च रसिसम्मुखीं वीररसाभिज्ञामपि पक्षे शिरःसमा शृंगाररसाभिज्ञामपि सहसा झटिति पराङ्मुखीं भवति भयेन मुक्तात् कोपेन प्रियसंगमाच्च निवर्तते इत्यर्थः। अत्र रूपे [illegible] लक्षणा:

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

नायिकात्वं रेपुसेनायाश्च प्रीतनायिकात्वं चोद्यमानं न शब्दो-
पात्तं किन्तु श्रवन्तः पुरत्वारोपादे सामर्थ्यादवसीयते श्रवन्तःपुरे
तासामेवोचित्यात् अन्यथा श्रवन्तःपुरत्वारोपादेरनुपपन्नत्वं स्यात्
श्रवतः एकदेशे रणान्तःपुरे शब्दमुखेन स्फुटतया वर्णनात् एक-
देशविवर्तिरूपकमिदम्। उक्तमेवदृपमुपसंहरति समस्तवस्तुविषयं
एकदेशविवर्ति चेति भेदद्वयं यदुक्तं तत् सांगं सावयवं रूपक-
मित्यर्थः। निरंगं दर्शयति निरंगमिति। श्रंगानामारोपरोहितं केवल-
एवांगिनो यद्रूपणमित्यर्थः तदेव रूपकान्तरमिश्रणात् शुद्धं केवल-
मित्युच्यते। तदुदाहरति कुरंगीयेति। किंशोर्याः वृत्तान्तं चारीकोचत्
निवेदयति हे सखि इयं बाला यत् यस्मात् साक्षात् गीतध्वनेः
कुरंगीव मृगीव श्रंगानि निश्चलयति निश्चलानि करोति यत्
यस्मात् श्रुतमपि कान्तस्य पेशलरूपं श्रवन्तं वार्तां सार्तां याति पुनः
भूमोऽपि प्रश्नयति प्रश्नगोचरं करोतीत्यर्थः यत् यस्माच्च श्रोतुं
नेत्रारोहितं यथास्यात्तथा श्रवन्तर्गृहमध्ये एवमिति विषयं न गृह्णाति
तत् तस्मात् साक्षात् श्रद्दृष्टं वीक्ष्य जाने मनोभवः कामः श्रवस्याः
बालायाः हृदि श्रीमतां प्रेमलतिकां रोढुं प्रवृत्तः। श्रत्र प्रेम-
मात्रे लतिकात्वमात्रारोपः। ननु तत्पीरपोषकत्वेन कथंचिदपि श्रवस्था-
रोपः इति निरंगं केवलं रूपकमिदम्। मालारूपं निरंगं दर्शयति
मालतीति। मालोपमायां इव रूपकेऽपि बहवः श्रवयवाः
मालारूपं निरंगमुदाहरति सौन्दर्यस्येति। कोश्चन निरङ्कुशो प्रेयसो
परामृशति सौन्दर्यस्य लावण्यरूपं तरंगिणी [illegible]

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Satyagya Sharada Peeth

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

22C

त्कर्षस्य तरुण्यतिशयस्य हर्षादुद्गमः आनन्दोद्भेदः कान्तेः
अवयवशोभायाः कार्मणकर्मवशीकरणमन्त्रः मर्मरहस्यां क्रीडा-
रहस्यानां रहस्यघोरहासानां वा उल्लासनायाः विद्रुमलतस्य
अवासभूः नवीनस्थानं वक्रोक्तेः साकूतवचसां विद्या उपदेशिका
विधेः ब्रह्मणः अवनाद्य निर्मीयं यत्नवत्तीव्रं निर्माणकौशलं
तस्य साक्षात् क्रिया पञ्चेषोः शम्भुस्य मन्मथस्य बाणः तरुणानां
ललनानां स्त्रीणां भ्रूजगीः शिरोमणिः सा मदनुभूता प्रिया
प्रेयसी अस्ति। अत्र एकस्यां उपमेयभूतायां प्रियायां तरङ्गि-
ण्यादीनां बहूनामुपमानानां आरोपात् मालात्वं यथैकस्मिन्
सूत्रे बहूनां पुष्पाणां प्रियामात्रे नद्यादेमालारोपो न तु तत्तीरोषकं
रूपान्तरमिति निरंगत्वम्। परम्परितं रूपकं लक्षयति नियतेति।
नियतं वर्णनियतया अवस्थयापेक्षणीयं यद् आरोपणं तस्य उपायः निमित्तं
यः परस्य अवयवस्य आरोपः तत् परम्परितं रूपकम्। तद् भेदावाह
श्लिष्टेत्यादिना। वाच्ये शब्दे श्लिष्टे श्लेषयुक्ते सति भेदभाजि भिन्नरूपे वा
सति तत्परम्परितं द्विधा परम्परितं श्लिष्टपरिश्लिष्ट शब्दभेदेन द्विविधत्वात्।
तदुदाहरति नैषधीयेति। राजन् इति केवलोऽयं सम्बोधनम्। हे वरवीर वरेषु
राजन् त्वं वैरिस्त्रियं शत्रुस्त्रियं वत्सरशतं यावत् उच्चैः महत् साम्राज्यं
क्रिया कुर्याः। कीदृशः त्वम्? विदुषां पण्डितानां मानसं चित्तमेव
मानसं मानससरः तत्र हंस हंसरूप वैरिणं शत्रूणां कमलायाः लक्ष्म्याः
संकोच एव कमलानां पद्मानां अवसंकोचः विकासः तत्र दीक्षितः
सूर्यरूप दुर्गाणां कोष्ठानां अवमर्दनं अवनेनैव दुर्गायाः पार्वत्याः
प्रागेव अवहसनं तत्र [illegible] संग्रामाजं

CC-0. Lal Bahadur Shastri University Delhi. Digitized by Sarvagya Sharada Peetham

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स्वीकारो ऽप्यनुपेक्षणमेव सोमिध्यां काष्ठानां स्वीकारः कवलनं तत्र वैश्वानर वोहरूप सत्ये सत्यभाषणे प्रीतिरेव सत्यां दुर्गामग्नीति: तद्विधाने दक्ष दक्षप्रजापतिरूप विजयः परपराभव: रूप वैजयो ऽर्जुन: तस्य प्राग्भाव: प्रथमोत्पत्ति: तत्र भीम भीमसेनेत्यर्थ: । ऽत्र भामरूपिदपदं श्लिष्टं राज्ञ इत्यत्वाद्योरोपे श्लेषबलात् भम: - प्रभृतिषु सरोविशेषत्वाद्योरोपो नैमित्तिकमिति श्लिष्टं परम्परितरूपक - मिदम् । यद्यपि शब्दार्थालङ्कारोऽयमित्युक्तं वक्ष्यते च तथापि प्रसिद्धनुरोधात् भामहादिप्राचीनाचार्यैः [illegible] रोधात् ऽर्थालङ्कार मध्ये उक्त: ऽत्र भैमः भामहादिभिरिदं श्लिष्टपरम्परितरूपकं कथ्यते । भेदभाजं उदाहरति पश्येति उदाहरति ऽज्ञालानीमिति । हे राजन् ते तव भुजो राजति शोभते । कीदृश: ? जय रूप कुञ्जरो हस्ती तस्यालानं बन्धनस्तम्भ: विपत् पेक्षोरेव वारिधि: समुद्र: तस्य दुर्दां सेतु: तरणमार्ग: करवाल: रणरङ्ग: रूप चञ्चन्मज्जा सूर्मि: तस्य दुर्वादिहृदयाचलं: श्री: सम्पोरेन लक्ष्म्या: तस्या: लीलोपधानं उपबर्ह: संग्राम रूप ऽमृत - सागर: तस्य प्रमथनमन्दरीजा तस्या विद्वेषो सम्पादन मन्दरो मन्दराचल: नीरा: ये वैरिण: तेषां या: योनता: तेभ्यो वैधव्यं ददातीति तादृश: । ऽत्र भामादिकुञ्जरयो: पद्मयो: भिन्नत्वात् न भामरूपिदपदवत् श्लिष्टत्वं भुजे ऽज्ञालानत्वाद्योरोप जन्यो कुञ्जरत्वाद्योरोपो नैमित्तिकमित्यश्लिष्टं परम्परितं रूपकमिदम् । [illegible] श्लिष्टं वैक्षत परम्परितरूपकमुदाहरति ऽत्रेत्यादिवाक्यं । हे कुल राजन् ऽत्रेत्यादिवाक्यो ल्लोकाश्रयो यो महालोक: यादृश: तेन ऽलंकारेण तं जगत्सभं येन तादृश: राट्वंशो महत्कुलं तदेव सद्वंश: उच्छ्रयेण: तत्रत्यं गुच्छरत्नं मौक्तिकं श्रेष्ठो भवान् कै: न स्तूयते ऽपितु सर्वैरेव स्तूयते । ऽत्र वंशमौक्तिकविषयऽत्कोरोपणीयमो: सत्कुलसद्वंशयो श्लिष्टसद्वंशशब्देन भेदधानं राज्ञ इत्यत्वाद्योरोपे कुलगतो वंशत्वाद्योरोपो नैमित्तिकमिति श्लिष्टं परम्परितं रूपकमिदम् । [illegible] श्लेषश्लिष्टं कवलं परम्परितरूपकमुदाहरति

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

निरवधीति। निरवधि कालनीरवद्यदुःखशून्यं ग्राम्यदोषशून्यं च ग्रानन्दयति: कौतुकस्य ग्राश्चर्यस्य ग्रपव्ययो निस्तारो येन तादृशं यस्य स्मितं ग्रनल्पानन्दं स: ग्रस्मिन् जगति ग्रपश्य: ग्राद्य: कर्ममूर्ति: कमलाकान्त: भगवान् जयति सर्वोत्कर्षेण वर्तते। कीदृश:? चतुर्दशलोका: रम्भ वल्ली लता तस्या: कन्दो मूलमित्यर्थ:। ग्रत्र लोकवल्लीपदयो: मिलत्वात् ग्रश्लिष्टरूपत्वं तेन वल्लीत्वारोपो वेष्यो कन्दत्वारोपे निमित्तमित्यश्लिष्टं परम्परित रूपकमेतद्। रसनारूपकमुदाहरति किसलयेति। लतानां किसलयकरै: मोचितं कामिनीनां कर: हस्ता: रम्भकमलाभ्यां कामिनां शोभनं मन: चित्तं जयति ग्रशोकशोक मदन: बालवानां कमलमुखै: मोचितं मुखेन्दुभि:। ग्रत्र किसलय करत्वं मुखे कमलत्वं कमले मुखत्वं मुखे चेन्दुत्वमारोप्यते शेत रसनोपमामामिन मुखे मुखेत्यारोप्यमाणानां परस्परन्न ग्रारोपविषयत्वात् रसनारूपकमेतद्। मित्यादे नवैचित्र्यं जनयति शेत न पृथग् लोकृतमस्माभिरिति शेष:। ग्रपह्नुतिमलंकारं लक्षयति। ग्रकृतीगति। ग्रकृतमुपमेयं निषिद्ध ग्रप्रकृतं कृत्वा ग्रन्यदप्रकृतमुपमानं यत्र साध्यते सत्यतया स्थाप्यते सा ग्रपह्नुति:। उपमेयं ग्रप्रकृतं ग्रपह्नुतिश्च द्विधा शाब्दी ग्रार्थी च। शाब्दी यत्र शब्देन ग्रसत्यत्वमाह। ग्रार्थी ग्राक्षेपलभ्येत्यर्थ:। शाब्दीमुदाहरति ग्रवापु रिति। भृगे-मन्दे कलंकं दृष्ट्वा पार्वती जिति महेश्वरस्येति मरियम्। हे शैलतनये पार्वति परिणतरूप: भृगकान्ते: शशांकस्य चन्द्रस्य वपुषि शरीरे नागतत्वं प्रकटत्वमवाप्त:, ग्रयं कलंको नैव विलयति नैव शोभते किन्तु इयं रजनीरमणी चन्द्रकामेव ग्रमुष्य चन्द्रस्य विगलत् द्रवीभूत पदमृतं लब्ध स्यन्द: ग्रस्रवणं तेन शीतले उरसि वक्षस्थले रतिश्रान्ता सती गाढं निश्चेष्टं स्वपिति इत्यहं मन्ये श्यामत्वादिति भाव:। ग्रत्रोपमेय

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

भूत कलंकं निषिद्ध्य उपमानभूता रात्रौ सत्यतया स्थापितेत्यप-

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

हुतीरियम् । अन्यां मुदाहरति । रासो इति अत्योश्यद् विरोहिष्मा: ओम्मीरियम् वेति । हे रासि प्रेमनिर्हेण कृश क्षीणे अतीव मनोहरे आदृष्टो कोमलेन स्मरस्य कामस्य निर्यद् वैरं विद्वेषो अस्तीति शेष: यत्त्वं पश्य अनेन स्मरेण उपनेषु योनिरहंकारोऽत्र पुष्पाणि तेषु उद्भासिन: शोभमाना ये भृंगा: भ्रमरा: तेषां इलेक्ष मधुरेण प्रीतोनोशतं प्रीतिक्षणं क्षणे क्षणे शेतमावत् कालकूटं उद्गिरितं अत्कोशतं उगीरोनोद्गीरीमत्यर्थ: । अन्येषामेव भूतान् भृंगान् निषिध्य उपमानभूतं कालकूटं सत्यतया उपस्थापितोमत्यपह्नुति: ।

उदाहरणान्तरमाह अन्यभ्रोष्मोलेति । वेश्मादासो कोमलं इति वेश्यां वर्णयति । हे रासिक शैवंग हरेण रनुष्टा दग्ध: एव कामदेव: अन्या: मृगदृश: हरिणनयनाया: पृथुजघनभागे अनुष्टिमन् लावण्यामृत सासि नूनं निपीतत: तापशान्त्यै निमग्न: यस्य स्मात्म अंगान्येव अंगारा: तेषां अशमस्य शान्ते: पिशुना: सूचका इव धूमस्योशिरका नोम: कुक्षेर नाभिबिले रोमावलीवपु: पोरजमीत प्रादुर्भवति इति भाव: नग्नांगारस्य जन्तुप्रवेशे धूमोशिरो जायत इति भवतीति स्वभाव: । अत्र धूम-शिरो रोमावलीवपु: पोरजमीत पोजाम शब्दार्थवशात् नेयं रोमावलि: किन्तु धूमोशेति प्रतीयते इत्यापी अन्यपह्नुतिरियम् । एवं अन्यान्योऽपि इयमापी अन्यपह्नुतिर्भवति इति भंगन्तरे उह्यम् । अन्यश्लेषं लक्षयति लक्षयति श्लेषइति । यत्र यत्रिभक्तिवचनो रूपार्थप्रतिपादकानां शब्दानां प्रकरणादेरनियमेन अन्येन सो अन्यार्थ: बुध्यते स: अन्यश्लेष: इत्यर्थ: ।

उदाहरति उदयमयन इति । निशाकर: सूर्य: वेदश्लोलन्धं दिशं अन्धकारं उपद्रवं च निराकुर्वतरां दूरीकुर्वति उदयमयते इनोदयं समृद्धिं च आप्नोति निधनं नाशं नयति प्रापयति निद्रामुद्रां नेत्र निमीलनं विकल्पाहतां च क्रियां गमनागमनादिका प्रतिजेत्राद्याश्च प्रवर्तयति स्वैराचारो

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

उक्तीभिसाधादि वेदोनिषद्वाचणं च तत्त्ववर्तनस्य कर्तनमुच्छेदं रचयति सम्पादयति यत इति लसत्तेजः पुंजो निभक्तः सूर्यः विभाति दीप्यते। अत्र उपमध्वनते इत्यादिषु वाक्येषु उदयोपेत्यादिशब्दानां ज्ञोभ्याभाः संयोगार्थैः सकर्मकधातुभिः नियंत्रणभावात् ज्ञेनकार्यस्य वाच्यतया पर्यायपरिवृत्तिसहितया वाक्यश्लेषोऽयम्। समासोक्तिं लक्षयति परोक्तिरिति। परमन्यकृतं शैल्यैर्वचनं व्यञ्जनया द्योतयदनीति यावत् तत्त्वोतयादक-वाक्येन शैलूषनिशेजणमाहात्म्यात् यत् उपकृतकार्यस्याभिधानं समासेन संक्षेपेण उपलक्षणकथनात् समासोक्तिः। उदाहरति लोहेत्यादिना।

लब्ध्वा तव बाहुस्पर्शं यस्याः सकोटयुल्लासाः।

जयलक्ष्मीस्तव विरहे नवलम् उज्ज्वला दुर्बला नु सा॥ शैलूषस्तुत्यं स्वामिनमनेनकृम नरपत्न्याः श्लोकोपम्। हे वीर तव बाहुस्पर्शं भुजसंगं लब्ध्वा यस्याः जयलक्ष्म्याः कोऽपि श्लोनिर्वचनीयः उल्लासो हर्षो उजृम्भत् सा जयलक्ष्मीः तव विरहे सति नवलम् उज्ज्वला उत्पुत दुर्बला जाता। अत्र जयलक्ष्मीशब्दस्य केवलं ~~वाच्यत्वं व्यनक्ति तस्य~~ जयलक्ष्मीसज्ञं वाच्यसामर्थ्यात् लोहे अणेत्यादिपदानां उपगत बाहुस्पर्शजाड्यादि बोधकत्वात्। अत्र बाहुस्पर्शोल्लासयुक्त-उल्लासादिशब्दानां विशेषणबलात् जयलक्ष्मीवृत्तान्तो नायिका वृत्तान्तं ~~प्रति~~ उपगमयति। निदर्शनां लक्षयति निदर्शनेति। उपमनमिति। न अनतीति उपनम् उपसम्पनम् वस्तुनोः वाक्यार्थयोः पदार्थयोर्वा सम्बन्धो उपनमः उपमां परिकल्पयति उपमामेव परिनमतीति इति सा निदर्शना। एतच्छ्लोकं वाक्यार्थनिदर्शना पदार्थनिदर्शना चेति द्विविधा।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarayya Sharada Peetham

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

पद्यमिदम् । सूर्यः प्रभवो यस्य सः सूर्यप्रभवः वंशः रघुवंशः तम् ।
उन्नम्यनिष्ठा
प्रभ / अति: कन् । द्वौ कनशब्दौ महदर्थं सूचयतः तथाहि
उडुपेन तितीर्षुः तरीतुमिच्छुरस्मि इति अर्थः उडुपति उडुपस्य साधनं शोधकाष्ठम् अथवा
भोक्तुमर्हति । अत्र सूर्यवंशवर्णने उडुपं सागरं तितीर्षुरस्मि इति
प्रस्तुत्वो ऽनुपपन्नः सन् ~~अस्मायां पर्यवस्यति इति वाक्यार्थ निदर्शनेदं~~
उडुपेन सागरतरणसाधनेन मन्मति सूर्यवंशवर्णनमित्युपमायां पर्यवस्यति
इति वाक्यार्थ निदर्शनेयम् । पदार्थ निदर्शनामुदाहरति उदयतीति ।
माघकाव्ये चतुर्थसर्गे रैवतक वर्णनमिदम् । वितताधगौरसरजो
विततात्विस्तीर्णाः अर्धाः दृशयः किरणाः एव रज्जवो यस्य तादृशो
ऊर्ध्वमकर्षो सूर्य उदयति उदयमाने सति दिनश्रीरिव वधूः उडुपं याते सोनेव
पूर्णिमायां उडुपं गिरिः रैवतकाख्यः विशेः विलम्बि विशेषं यथा स्यात्तथा
लम्बमानः अयत यज्ञाद्धयं तेनचोरवारितः प्रस्तुत्वतो मे वारणेन्द्रो
गजश्रेष्ठः तस्य लीलां शोभां अहरीत्य वहति सतीत्यर्थः । अत्र
समानैकपदे बोध्येन वारणेन्द्रलीला पदार्थेन गिरिपदार्थस्यान्वयो
ऽनुपपन्नः उडुपलीलोद्वहनस्य उडुपनासम्भवात् वारणेन्द्र
लीलासदृशीं लीलामिति उपमायां पर्यवस्यतीति पदार्थनिदर्शनमेतत् ।
श्लेषेण लीला पदेन लीलाद्वयप्रतीतेः । मालारूपां निदर्शनामुदाहरति
दोर्भ्यामिति । हे देव राजन् यस्ते गुणान् शौर्यादीन् गदितुं वक्तुं
उद्यमं करोति एषः पुरुषः ध्रुवं निश्चयेन दोर्भ्यां भुजाभ्यां तरंगवतीं
भुजंगं समुद्रं तितीर्षति तरितुमिच्छति किं वाणी हरिणंकविम्बं
चन्द्रमण्डलं ग्रहीतुं ग्रहीतुमिच्छति मेरुं हैमादिं गिरिं लंघयितुमिच्छति
लंघयितुमिच्छेत् । अत्र यस्तव गुणगणान् गदितुमुद्यममादधाति

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

इति रूपो वाक्यार्थः रूपः तरंगवलीभुजंग दोर्भ्यां तितीर्षति इत्यादेः
रूपो वाक्यार्थः। तयोश्च सम्बन्धो ऽनुपपन्नः सन् सागरतरणादेः सदृशं
त्वद्गुणगणभाषणं इति उपमायां पर्यवस्यति इति वाक्यार्थ माला-
रूपेमम्। अन्वयनिधं निदर्शनां लक्षयति स्वरेति। स्वेन कार्येण
स्वस्य क्रियाजन्यस्य कार्यस्य स्वहेतोः स्वकारणस्य च अन्वयसम्बन्धः
कार्यकारणभावरूपः तस्य या उक्तिः रूपं सा अन्वया अन्वया
निदर्शनेत्यर्थः उड्डायते उड्डीयते इति। दृषत्क्षणः पाषाणखण्डः
शैलशैलागतः पर्वतोशिखरारूढः सन् वायुमारुत धुतः प्रभञ्जनेनैव
चालितः ऊर्ध्वः पतति यो लघुः अल्पमिति। उल्लसं पदं उत्कृष्ट-
स्थानं अर्ध्वस्थानं च ऊर्ध्वाद्यप्राप्य हेलयैव लीलयैव पतत्
पदभंशं प्राप्नुयात् इति ध्रुवं स्वदृष्टान्तेन प्रीतिपादयन् इति ध्रुवं
निश्चिनोति। अत्र पतनीति पतनक्रियाजन्येन कार्येण पतत् पदप्राप्ति-
प्राप्यस्य पतनरूप कार्यस्य स्वकारणस्य च लघीयसः उल्लसपदप्राप्ति-
रूपस्य सम्बन्धः कार्यकारणभावात्मकः प्रीतिपाद्यते तथा च
व्याप्ये सति उल्लसपदप्राप्तिः पाते इतुः यथा दृषत्क्षणस्येति दृष्टान्त-
पर्यवसानात् रूपमपि निदर्शना। अन्वयस्तुत प्रशंसां लक्षयति
अन्वस्तुति। या अन्वयस्तुतस्य अन्वयकृतस्य प्रशंसा वर्णना सा अन्वस्तुताख्या
अकृतार्थमतिपत्तिपरा चेत् तदा सैव अन्वयस्तुत प्रशंसालंकारः। अन्वया-
रोपिकस्य अन्वयस्तुतस्येत्यर्थः अभिधयोत्तकथनेन वाच्यीकारकस्य
अन्यस्तुतस्य बुद्धिसाक्षीकृतस्येत्यर्थः अन्वयेन व्यञ्जनं अन्वयस्तुत
प्रशंसेति भावः तां अप्रकृतार्थनिगदने कार्ये इत्यादिना। कार्ये
अन्यस्तुते तदन्यस्य कारणस्य अन्वयस्तुतस्य वचोवर्णनं इत्येकः क्रमः
निमित्ते कार्ये अन्यस्तुते सति तदन्यस्य कार्यस्य अन्वयस्तुतस्य वचः
हितोपः क्रमः। सामान्ये अन्यस्तुते सति तदन्यस्य विशेषस्य

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अप्रस्तुतस्य वचः तृतीयः प्रकारः विशेषे प्रस्तुते सति तदन्यस्य सामान्यस्य अप्रस्तुतस्य वचः चतुर्थः प्रकारः तुल्ये प्रस्तुते सति तुल्यस्याप्रस्तुतस्य वचः ४ पञ्चमः प्रकारः इति पञ्च प्रकाराः ५ अप्रस्तुत प्रशंसा। तत्र कार्ये प्रस्तुते कारणस्य वर्णनमुदाहरति माता इति। अमरुशतके पद्यमिदम्। हे सुन्दरि याताः देशान्तरं गताः किन्न मिलन्ति नायान्ति अपितु मिलन्त्येव त्वया मत्कृते मदर्थं चिन्ता न कार्या नितरामत्यन्तं कृशा क्षीणासि एवं हे भिन्न सर्वाङ्ग साभूणि मोघं रुदितं सति तत्रैवमस्या लज्जया अन्यशः एतद्वक्त्रा कपोलिका अस्य नाट्येन पिशेषेण निपतत् निर्गलदेव पीतं संवृत्तं अश्रुयेन नाट्येन चक्षुषा नेत्रेण मां दृष्ट्वा हीमेतन हास्येन भविष्यतीति भावीति मरणे उत्साहः सूचितः। अत्र प्रत्यानिवृत्तोऽस्मि किमिति प्रत्यागतिनिवृत्तिरूपे कार्ये कृष्णे कारणस्य प्रियागमनेऽरुणोदयादस्य वर्णनं कृतम्। काणे प्रस्तुते कार्यस्य वर्णनमुदाहरति राजन्निति। राजानं प्रति कस्यचिदुक्तिरियम्। हे नाथ राजन् तव प्रीतिभवने अश्वघासैः पाल्यैः पक्षादिबन्धनागारं पञ्जरं तस्मात् मुक्तः दत्तः शुकः शत्रुयुक्तः शून्यायां निर्जनतायां वल्भौ उपरिगृहे चित्रस्थान् अप्रस्तुतगतान् राजादीन् दृष्ट्वा एकैकं एकमेकं इति इत्थं मनसा कोपेन अशब्देन वदति हे राजन् राजसुता मां न पाठयति देवो राजापि तूष्णीं स्थितः न किमपि वदन्ति हे कुब्जे भोजनदात्रि मां भोजय। हे कुमार सोदर्येण त्वयापि किं न भुज्यते। अत्र शत्रुपलायनरूपे कार्ये काणे प्रस्तुते पोषकगुणस्य शुकाभाषणाप्रस्तुतस्य कार्यस्याभिधानम्। काणे शत्रुपलायनरूपे प्रस्तुते कार्यं पोषकगुणः शुकाभाषणरूपमुक्तं कोपेन। सामान्ये प्रस्तुते सति विशेषस्य वर्णनमुदाहरति एतदेति। अमरुशतके पद्यमिदम्। तस्य प्रस्तावात् एतत् श्रुतं किमत अप्रत्यभिज्ञानमत्यर्थः यत् स जडः मूर्खः कपोलभित्तौ स्थितं वारेण जलस्य कणं जलबिन्दुं मुक्ताशोणमितमसंख्य

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

शातकर्ण्यस्मादपि श्लघ्यद् श्लाघ्यिन जडत्व बोधकं शृणु शैवे

श्लादीयमाने नौरिस्मन्मुहुर्मा गृह्यमाणे संगुप्तपत्रयो: तच्चो मा स्पर्श -

रूपा क्रिया तस्या अविलोमनी संगुप्तावेव लोयमाने लोढ़े सीते मम

मुच्चामोऽकुंडोप कुत्र गत: सीते शुचा दुःखेन श्लन्तर्न विज्ञाति

नेत्रोन्मीलनेऽपि कृते चित्तां न त्यजनीत्यर्थ:। श्लत्र जडाना सख्याने

रव समत्व संभावना भवतीति सामान्ये प्रस्तुते जडोविशेषस्य वीरेण

मुख्याधित्व वर्णनम्। विशेषे प्रस्तुते सामान्यस्य वर्णनमुदाहरति

सुहृदीति। श्रीकृष्णेन नरकासुरे हते सीते शान्तं इति तन्मित्रेण।

नेत्रोन्मीलनम्। म: पुरुषो वैरशोधनेन वैरशोधनेन कृतपौरुषु

सुहृद्वधूनां बाष्पजलप्रमार्जनं श्लश्रुप्रोञ्छनं करोति स एव पुरुष:

स एव प्रधान् स एव नीतिमान् तस्यैव सुष्ठु जीवितं तद्भर्या: भाजनं

श्लपि स एवेत्यर्थ:। श्लत्र कृष्णं निहत्य नरकासुर वधूनां यदि दुःखं

प्रशममसि तत्त्वमेव श्लाघ्य: इति विशेषे प्रस्तुते सामान्यमभिधत्ते।

श्लेषहेतुकामप्रस्तुतप्रशंसामुदाहरति पुंस्त्वादीति। भल्लटशतके

पद्यमिदम्। पुंस्त्वाद् पुरुषस्तिहायपि यदि स्त्रीचक्षते तत् चलनं प्राप्नुयात्

श्लध: पातालमपि यदि पातात् गच्छेत् प्रणयेन याचेन यदि न महान्

तदपि तदपि त्रैलोक्यं जगत् श्लभ्युद्धरेत् इयं दिक् श्लकार:। कैटभापि

पुरुषोत्तमेन विष्णुना श्लकारिता श्लदर्शिता भवतापि तादृशभावेन स्वराज्य -

भ्रष्टतामेति भाव:। श्लत्र शतपुरुष वर्णनीयत्वेन प्रस्तुते सीते -

श्लप्रस्तुतस्य श्रीविष्णो: वर्णनं तत्र पुंस्त्वादित्यादि विशेषणानां

पुरुषोत्तमेन इति विशेषणस्य च श्लेषेण शतपुरुषस्याक्षेप: इति श्लेष -

हेतुकाप्रस्तुतप्रशंसेयम्। समासोक्तिहेतुकामप्रस्तुतप्रशंसामुदाहरति

येनेति। हे चन्द्र श्लभ्युदितेन उदयं प्राप्तेन मम रोदसी द्यावा पृथिव्यौ

तेजोहीनतां श्लम्लानिं च गमित: प्राप्तोऽसि तत्र रवौ ते तव

CC-0. Jangamwadi Shastri Digitized by Siddhanta eGangotri Gyaan

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

मुज्यते यदि औणेन कम्बलेनेव धनहीनेन च त्वया एतत् पादग्रहणप्रगृष्टितं तर्हि किं न लज्जसे मत् वेणीकि निर्मूलसे सर्वनुदेवि तत् भवतः जडधर्मेण शीतलप्रभेण नान्यत् कारणम्। अत्र निशेष्य वाचि अनुपयुं न श्लिष्यं इति समासोक्ति हेतुका वस्तुवंशसेयम्। साहश्यमात्र-हेतुकमप्रस्तुत प्रशंसामुदाहरति अवादीयेति। अवेन कुरुविन्देन तत्तप-समुद्रेण परितः सर्वतः सीतां नदीनां मुखेभ्यः संगमस्थानेभ्यः वदनेभ्यश्च वारि जलमादाय गृहीत्वा निर्भर्जितं सम्पादितं न निर्भर्त्सितं आर्द्रीकृतं निष्पन्नमपि कटुकृतं वडवादहेन वाडवाग्नी उत्तं च पातालेन कुक्षिः कुहरं तस्मिन् वेलानेशितं विक्षिप्तं च निरुद्धं जलं वृथा नीशत-मिति भावः। अत्र सर्वतः परेभ्यो धनमाकृष्य अप्रसद्व्यपं कुर्वतो पुंसो यकृते अप्रकृतस्याक्षेपः कथनं तत्र श्लेषाभेदेऽपि अप्रस्तुतक्षेपः इति साहश्यमात्र हेतुका प्रस्तुत प्रशंसेयम्। इयं पञ्चमप्रकारा अप्रस्तुत प्रशंसा वाक्ये वाच्यार्थे उपमाना व्यंग्येत्यर्थः अवबध्या-रोपणा अवतस्मिन् तत्त्वारोपो अध्यारोपः नोद्भटेन मतेन उदाहरणे अवबध्नीति। इह अस्मिन् लोके बहवः भूयांसः उपायाः साधनानि येषां ते पोतोपायाः सांयात्रिकाः अवभो जलं तेन स्थगिताः अवच्छादिताः भुवनस्य भूमेराभोगो विस्ताः पातालस्य कुक्षिः मध्यं च येन ताहशस्य अवधेः समुद्रस्य लंघ्यते उल्लंघ्यते इति अपि धावन्ते शक्ताः भवन्ति यदि दैवात् हेतोः रुषः समुद्रः रिक्तः जलशून्यो भवेत् तदानीमस्य समुद्रस्य अवटेः गर्तः कुहरं वेद्मं तयोराक्रान्ते ~~क्रान्ते~~ दर्शनेऽपि कल्पः समर्थः स्यात् न क्रोडीत्यर्थः लंघनस्य तु वैव कथेति अपिशब्दार्थः। अत्र उपमर्दनशीलस्य उष्णभो दुर्जनेन वर न प्रेम्णा नैसर्गिकेन अवलम्बोपमर्दनापनेरिति प्रस्तुतं

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

उपमानम्। अत्र प्रभुः सम्पदं सुरसेव्यो वैपदं व्यसनसेव्यः इति प्रभुवृत्तान्तः प्रकृतो ऽध्वगवृत्तान्तेन सादृश्यमात्रात् प्रत्यक्षायते क्वोऽहमधमोरोदणैव मया कान्त्वोमिति। द्वितीयोक्ते पद्यमिदम्। भोः कांस्त्वीमिति वृद्धं प्रति चौपकस्य प्रश्नः। कथयामि दैवेन हतं दुर्भाग्यं शरणागतं मां विद्धि जानीहि त्वं वैराग्यादेव वीक्ष्य वदसि साधु सम्यग् विदितं श्रुतं त्वया इदं वैराग्यं कस्मात् कारणात् जातं कथ्यते शृणु अत्र प्रस्तुते उत्तरे वामेन मार्गात् वामभागेन स्थितः वटवृक्षं प्राप्तो तं वटं सर्वोपि अध्वगजनः चौपक-जनः सर्वात्मना छायोदकफलभोजनशयनादिना सेवते तदधो निश्छाया भूमौ स्थित्वा तदाश्रयन्न तत्र स्थितस्यापि मे मम छायापि चौपकाकृतेः न भवतीत्युक्तम्। अत्र सत्त्वेन स्वदत्तस्य प्रतिज्ञाभङ्गात् प्रभुतो निर्विण्णः प्रबुद्धजातीयः कोऽयं पुरुषः प्रभुतः प्रतीयते। क्वोऽयं प्रश्नेषु प्रबुद्धोरोपेऽभवति उदाहरति सोऽपूर्वः इति। अन्यत्र शान्तेः पद्यमिदम्। हे भ्रातः यस्य वाणस्य सः प्रसिद्धः रसनाविषयविधिः तत् तादृशं कर्णयोः श्रवणं प्रक्षालनं सा प्रदेन निस्मृता त्वयादिक् निजपथमार्गः यया तादृशी हरिः भूयसा बहुना उक्तेन जल्पनेन किं न किमपीत्यर्थः सर्वं त्वं निस्मृतवानसि हे भ्रातः शून्यकः शून्यमध्यश्चण्डादण्डः धनशून्यहस्तश्च प्रसिद्धो वाणः राजः प्रबुद्धापि निसेव्यते एजः ते कः प्रत्यग्रहः दुराग्रहः इत्यर्थः। अत्र प्रस्तुतयोः राजभ्रमरयोः सौरभ्यादिना प्रस्तुतयोः सेव्यसेवकयोः पुरुषयोः शैत्येन प्रत्यक्षेपः इत्यप्रस्तुतप्रशंसा। प्रीतशब्दोत्तानां नानालंकारां चतुर्थी

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

लक्षयति विगीर्यैत्यादि। येन उपमानेन विगीर्य पृथक् ज्ञानं दृश्य
मत् प्रकृतस्य उपमेयस्य अध्यवसानं अभेदनिश्चयः सा प्रथमातिशयोक्तिः
यत् प्रस्तुतस्य प्रकृतस्य अन्यत्वं अन्यत्वप्रकारेण वर्णनं सा द्वितीया।
यच्च यद्यर्थस्य यादे शब्देन चेच्छब्देन वा कल्पनं अस्मत्प्रत्ययेनाऽर्थस्य
कल्पना सा तृतीया। यश्च कार्यकारणयोः कारणात्मनयोः यौगपद्यस्य कारणा-
नन्तरं कार्यनिर्देशस्य पूर्वपश्चाद्भावस्य चैपरीत्यं सा चतुर्थी
इति चतस्रो ज्ञातिशयोक्तयः। प्रथमातिशयोक्तिमुदाहरति कमलमिति।
प्रियां दृष्ट्वा तत्समां ज्ञातेत्यध्यवसेयोक्तिरियम्। अन्यस्मिन् अन्यदेके
देशे कमलं कान्तावक्त्रं संचर्य तस्मिन् कमले च कुवलये नीलोत्पल-
द्वयं तोडं त्रोटयित्वा कनकलोलिकायां कान्तातनुरूपायां सा च कनक-
लोलिका सुकुमारा मृदुर्वा यासौ सुभगा सुन्दरी ज्ञेति उत्पातपाल्यरा
केयमित्यर्थः। अत्र चक्रवाकलम्भनानां नायिकाचक्रवाकीनां कमलादे
तादात्म्येन अध्यवसानात् मुखादेरतिशयः ज्ञातेति ज्ञेतेनिगीर्य-
ध्यवसानरूपा अपरा भेदे अभेदरूपा ज्ञातिशयोक्तिरियम्। द्वितीया-
तिशयोक्तिमुदाहरति अन्यगोत्रेति। नायकं ज्ञेति नायिकासख्या :
अन्योक्तिरियम्। अन्यत् सौकुमार्यं अन्येनैव चक्षुषापि वर्तनच्छाया।

श्यामासामान्यप्रजापतेः रत्नेन च न भवेत्॥ शेतेऽसौ कान्तम्।
अन्यदेव लोकत्रयेऽपि सौकुमार्यं भवतेव रङ्कं सौकुमार्यं सौन्दर्यं
अन्येन अन्यैर्वर्णनीयेन वर्तनस्य सोऽस्य छायाकान्तेः रत्नं कान्ता
सामान्यप्रजापतेः छायाया बृहणः एवो निर्मितेः तेनैवेन्द्रेण च
भवतीत्यर्थः। अत्र लोकत्रयेऽपि सौकुमार्यादभेदेऽपि भेदे वर्णितः
इति अभेदे भेदाध्यवसायात्मका ज्ञातिशयोक्तिरियम्।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

चेच्छब्देनोत्साहोत्तेजयोरुदाहरति राकायामिति। राका पूर्ण-

चन्द्रा पूर्णिमा तस्यामसृतांशो चन्द्रस्य वपुर्मण्डलं यत्कलंकं चेत् कलंकरोहितं भवेद् यदि तस्याः नायिकायाः मुखं चन्द्रसादृश्यमवाप्नुयात् प्राप्नुयादित्यर्थः। अत्र चन्द्रेण मुखस्य साम्यं तदैक्यमेव न तु वस्तुतत् तेन मुखस्य द्योतशयः प्रतीयते द्योत यद्यद्योतशयोल्लेखयम्। कार्णस्य शीघ्रकारितां शीघ्रकारित्व द्योतपादनार्थं कार्यस्य तु मुखे कथने सति कार्यकारणयोः पौर्वापर्ये विपर्ययरूपा चतुर्थी द्योतशयोल्लेखः। विषयमश्च द्वैविध्यः कार्यस्य प्राथम्येन सहभावेन च। तत्राद्यमुदाहरति हृदयमिति। कुट्टनीमते काव्ये पद्यमेदम्। हे रमणीवल्लभ कुसुमचाप बाणेन कन्दर्पेण मालतयाः तन्नाम्नः नायिकायाः हृदयं अन्तः करणं ग्रावा प्रथममाधीभूतं आक्रान्तं लोचनावेषयं नेत्रगोचरतां भजता दृष्टेनेत्यर्थः त्वया चक्षं पश्चादाधीभूतम्। अत्र कामस्य रमणीवल्लभाधेयधानस्य शीघ्र-कारितां वक्तुं कार्यस्य कन्दर्पाधेयधानस्य ग्रहणमीरीति कार्यकारणयोः पौर्वापर्यविपर्ययरूपा चतुर्थी द्योतशयोल्लेखयम्। द्योतवस्तूपमं लक्षयति द्योतवस्तूपमेति। एकस्य सामान्यस्य साधारणधर्मस्य वाच्यद्वये उपमान-उपमेय वाच्ययोः यत्र यस्यामलंकृतौ द्वैवारमुपादानं सा द्योतवस्तूपमा। सा च द्विधा ग्रथमालारूपा मालारूपा च। ग्रथमामुदाहरति देवीति। रत्नावल्यां पद्यमेदम्। हे राजन् देवीभावं देवीत्वं गमिता प्राप्ता एषा राज्ञी पौरंदरास्य साधारणकलत्रस्य पदं स्थानं कथं भजतु इत्यनौचित्यं दैवतरूपेण श्लोकेन द्योतितं रत्नं पौलोमाया भूषणाद्यर्थमुपादानाय योग्यं न भवति। अत्र कथं भजतु इत्यनेन पौरंदरपदभजनस्य अनौचित्यं प्रत्याय्यते एकस्यानौचित्यस्य शब्दभेदेन द्वैवारमुपादानं यथा दैवतरूपाङ्कितरत्नस्य भोग्यपात्रत्वमनुचितं तथा देव्याः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

पोरवार पदयोगपत्व मनोरमेति त्यौपम्ये पर्यवसानमिति श्रौतवस्तूपमेय म्।
हेतोर्मां श्रौतवस्तूपमा मुदाहरति यदीति। त्वयात्मातोमेदं पद्यं सपूर्वो-
त्तरार्द्ध। यत्र च यत्नलादेः दाढ्यत्वादेर्न, त्वाभावेवं नाश्यर्यमात्रं
एवं सतामोवणादेस्त्वाभावेवो नाश्यर्याय इत्यौपम्ये पर्यवसानमिति
श्रौतवस्तूपमा एवमन्यत्रापि वैधर्म्यस्थलेज्योत्यर्थः यत्नुसतेवंमूधा

चक्रोर्यः एव चतुराः चन्द्रकपानकर्मणि।
विनावोन्तर्न निपुणा सुदृशो रवतर्कणि॥

यत्रावन्त्यः एव सुदृशो रोतकर्मणिनिपुणा इत्येवं रूपे वैधर्म्य-
विपर्यये साधर्म्यपर्यवसानमिति श्रौतवस्तूपमा। दृष्टान्तं लक्षयति
दृष्टान्त इति। वाक्यद्वय उपमेयवाक्य उपमानवाक्ये च उपमोपमेय
साधारणधर्माणां श्रौतोबन्धं दृष्टान्तालंकारः स च साधर्म्यवैधर्म्या-
भ्यां द्विधा भवति। साधर्म्येण दृष्टान्तमुदाहरति त्वयीति। मनोभवेन
कन्दर्पेण ज्वोलितं तस्याः गोपबालायाः मनः त्वयि दृष्टएव निर्वाति
शाम्यति प्रसन्नं भवतीति यावत् हेनांशोः चन्द्रस्य ज्योत्स्नोदये दर्शने
सति कुमुदत्याः कुमुदिन्याः कुसुमं कुमुदं विकसतीत्यर्थः। यत्र
त्वयीत्यत्र सप्तमीनिर्देशात् हेनांशोरित्यत्र षष्ठीनिर्देशाच्च मनोभव-
ज्वोलित श्रौतोनिर्देश्यस्य रोवोभि(ज्वोलितत्वस्यानुरूपा दृश्यत्वात्
बिम्ब बृम्बद्वयोः गोपिकाकुमुदत्योः मनःकुसुमयोः मनोभवज्वोलित
सूर्यकिरणज्वोलनयोः निर्वापणप्रकाशोश्च बिम्बप्रतिबिम्बभाव-
श्रौत दृष्टान्तालंकारः। वैधर्म्येणोदाहरति नवेति। हे राजन् एवंहेव
पुंहे साहसं कर्म शर्म यस्य तादृशस्य कर्मकृपाणोन्तकं ग्रासिनोवतः
ग्रासेनुमिच्छतः तव भवतः पोजां शत्रूणां भटयोद्धारः विश-
राकृतां पलायमानतां ग्रयुः प्रापुः तव दृष्टान्तमाह पांसवो

CC-0. Lal Bahadur Shastri University Delhi. Digitized by Sarayu Prahlada Peetham and eGangotri

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स्पितं न दर्शति इत्येवं रूपे वैधर्म्य विपर्यये साधर्म्यपर्यवसानमिति दृष्टान्तालंकारः। यांसुभटयोः पलायनशीलत्वयोः वैलक्षण्यतिविलक्षणः। दीपकं लक्षयति सकृत् वृत्तौरिति। वृत्तिरुपादानं उक्तमुपमेयं अप्रकृतमुपमानं तदात्मनां सकृत्तेन तदुपजीव्यानां धर्मस्य क्रियादेरूपस्य सकृत् वृत्तिः एकं दीपकं बहीषु क्रियासु कालस्य जडेषु नानेषु मध्ये कदाप्येकरूपस्य कालस्य सकृत् वृत्तिः द्वितीयं दीपकं उक्तप्रकारकं दृष्टवत् दीपकमलंकारः। प्राकरणिकाप्राकरणिकानां प्रकृताप्रकृत उपमानोपमेयानां धर्मः क्रियादिः एकात्मनाऽन्वयते दृश्यते तत् दीपकसाम्यात् दीपकमित्यर्थः। अप्रकृतैः उक्तैर्वा नहुः समानो धर्मः अप्रकृतमुपकरोति प्रसादयति मनोयित्वा दीपो एकाधिमेवेति दीपकसाम्यम्। उदाहरति कैकवणाद्यानिति।

कृपणानां धनं नागानां फणामणेः केशराः सिंहानाम्।
कुलबालिकानां स्तनाः कुतः स्पृश्यन्ते अमृतानाम्॥

इति संस्कृतम्। अमृतानामिति विशेषणं मनुष्येष्वपि अन्वेति। अमृतानां जीवतां कृपणानां धनं नागानां सफेणं फणारत्नं सिंहानां केसरान्तोमानि कुलबालिकानां सतीनां स्तनाः कुतः स्पृश्यन्ते न कथञ्चिदपि स्प्रष्टुं शक्यन्ते। अत्र प्रकृतानां कुलवधूस्तनानां तदुपमानत्वेन अप्रकृतानां कृपणधनादीनाञ्च स्पर्शनक्रियारूपस्य साधारणधर्मस्य सकृदुपादानमिति क्रियादीपकालंकारोऽयम्।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

कारकस्य बहीषु क्रियासु सकृत् वृत्तिः कारकदीपकोक्तत्वम्। उदाहरति यथा स्विद्यतीति। नवः पतिर्यया विनाद्दो यस्याः सा नवपतिका नवोढा वधूः शयने भर्तृपर्यङ्के स्विद्यति स्वेदं प्राप्नोति दीर्घते परिम्लायते सीदति कृशीभवति संकुचति ततः वेल्लति इतस्ततो वर्तनं करोति विचलति परिवृत्य शेते निमिषति निमिषति मृषा नेत्रे मुञ्चति तिर्यक् विलोकयति नाथस्य वैमुख्यं संभावनया भयात् विलोकयति ग्रन्थमध्ये नन्दति हृष्यति ग्रतएव पुस्तिनीमध्यति न तु पुस्तनीत्यर्थः। ग्रत्र ग्रनेकासु क्रियासु एकस्य वध्वादेः इति कर्तृकारकस्य शयने इत्यधिकरण कारकस्य वा सकृदुपादानमिति कारकदीपकालंकारोऽयम्। मालादीपकं लक्षयति मालादीपकमिति। पूर्वपूर्वेषां वस्तुनां परं परं वस्तु यदि उत्कृष्यते उत्कर्षीक्रियते तत् तदा मालादीपकमलंकारः उत्तरोत्तरस्य पूर्वपूर्वोत्कर्षकत्वेन एकावली इति ततोऽस्य भेदः। उदाहरति संयोगेति। व्याख्यातमिदं पद्यं सप्तमोल्लासे। ग्रत्र पूर्वपूर्वस्य परपरस्योपकारकत्वं प्रतिपादितं। एकस्याः ग्रन्यासाधनक्रियायाः सर्वत्र सम्बन्धात् दीपकालंकारत्वम्। यथा मालायां पूर्वपूर्वग्रथितपुष्पाणां उत्तरोत्तरग्रथनोपकारकत्वं तद्वदत्रापि मालारूपता। तुल्ययोगितानाम मालमलंकारं लक्षयति नियतानामिति। नियतानां वर्णनीयत्वेन प्रकृतानामेव ग्रप्रकृतानामेव वा धर्मः गुणक्रियान्वयनामः सकृत् एकवारमेव यदुपादीयते सा धर्मस्य सकृदुपादानरूपा तुल्ययोगिता ग्रत्र यत् केवलप्रकृतानां केवलाप्रकृतानां वा गुणक्रियादीनामेव धर्माणां तुल्ययोगिता लक्षणं। तुल्या योगिता ग्रत्रेति

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

व्युत्पन्नः तत्र प्राकरणिकानुभवेन धर्मस्य तुल्ययोगितामुदा-
हरति पाण्डुरेति। व्याख्यातोऽयं पद्यं सप्रभेदलक्षणे। अत्र विरहानु-
भावत्वेन सकृतानामेव पाण्डुतादीनां धर्मतया श्लाघनक्रियाकर्तृकः साधारणो
धर्मः सकृदुपात्तः इति तुल्ययोगितालंकारः। अन्यां तुल्ययोगितामुदा-
हरति कुमुदानि। नायिकां प्रति नायकस्योक्तिरियम्। हे कान्ते तस्मिन्विलास-
भुजो नवहृशोः नेत्रयोः पुरो अग्रे कुमुदानि श्वेतकमलानि कमलानि
रक्तकमलानि नीलनीरजानि नीलकमलानि लेभामाली पश्यं: का
कः पदार्थः न मनागपि शोभते इत्यर्थः। किञ्च तवाननस्य पुरः अमृतं
अमृतरोचिः चन्द्रः अम्बुजन्म पद्मं च एकपदे युगपदेव जीतहतं
निर्जितोभवत्यर्थः। अत्र पूर्वार्धे कामिनीनयनोपमानत्वेन अग्रहकृता-
नामेव कुमुदादीनां धर्मतया कापदव्यंग्यो ज्ञोध्यक्षेपः। उत्तरार्धे ज्ञानेन्द्र-
मभेदेन अग्रहकृतानां अमृतादीनां धर्मतया जीतहतत्वं यैव धर्मः
अभवत्र ज्यात: इति तुल्ययोगितालंकारः। व्यतिरेकः व्यज्यते
उपमानादिति। उपमानापेक्षया अग्रकृतस्य उपमेयस्य यो व्यतिरेकः उत्कर्षः
स एव व्यतिरेकनामालंकारः। तदुदाहरति क्षीणः क्षीण इति। क्षीणः
क्षीणोऽपि अत्यन्तकृशोऽपि शशी चन्द्रः भूयो भूयो नवत्वमेति
यातं गतं यौवनं तु न्यूनवर्ति अग्रमावृत्तिशीलं अतो हेतो हे
सुन्दरी मानात् विरम मानं मुञ्चेत्यर्थः। असौ इन्दुसत्का भव
दाननेत्रमात्रं नोद्दिश्यमीति भावः। अत्र उपमानभूतस्य शशिनः
क्षीणत्वेऽपि पुनः नूतनोत्कर्षः उपमेयभूतस्य यौवनस्य तु न पुनरा-
वर्तनमित्युपकर्षः इति उपमेयापेक्षया उपमानस्याधिक्यरूपो
व्यतिरेकालंकारः इति रुय्योज्ज्वलितं तदयुक्तम्। अत्र यौवन-
गतस्यैर्याधिक्यं हे विनोदनं वस्तूद्देश्यविषयीभूतमिति

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ज्ञाप्यं सम्प्रम्। मालाव्याप्तके तु पादान्त [illegible]

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

उपमानादुपमेयस्योत्कर्षाधिक्ययोरित्यनेनोदाहरणं ननु उपमेयोपमान-
मानाधिक्यस्य अत्रापि तुल्यत्वात् नह्यत्र चन्द्रयोर्न्यूनत्वं किन्तु
तत्साधर्म्यस्य। एवं व्योम्नोरेकं धर्मविशेषेण विभजते इत्योरिति। व्योम्नोः
द्वौ इत्यनेन उपमेयगतोत्कर्षनिमित्तं उपमानगतान्यूनत्वं निर्जलं च
तयोर्द्वयोरित्यनेन तयोरेको भेदः एतयोः द्वयोर्वा अनुयोः त्रयो भेदाः
ते च अत्रत्येन त्रित्वेन एते च द्वादशभेदाः यत्रैकस्मिन्श्लिष्टे शब्दे श्लिष्टे
शब्दे च भवति इति चतुर्विंशतिभेदाः सूत्रं नैवदृष्टेति
व्योतेत्यादिना। श्लिष्टभेदेषु इत्योरेतो व्योतेत्यनुदाहरति
अत्रेति। बहाधृतेः औन्नत्यातिशयेन व्याप्तत्वेनोपलक्ष्यत्वं अतएव व्याप्तेः
स्वरूपं एव सहायो यस्य तादृशस्य अस्य वीरस्य राज्ञः बभूवतः
बहवो ऽप्यरयः शत्रवः तेषां पराभवे नयाजेषु सोत्तेषु अन्येषु युद्धजनः
तस्यैव स्वामिनो गर्वो नेत्यर्थः अत्युत्कृष्टजयलाभेऽपि गर्वो न जायते
इति भावः। अत्र श्लेषासत्त्वं राजा उपमेयः अन्यजनः उपमानं
अत्रैव पराभवः समानो धर्मः उपमेये महाधृतित्वं उपमाने युद्धत्वं
द्योत्कर्षापकर्षहेतू उपात्तौ इव शब्दसत्त्वात् शाब्दसाम्यद्योतेति
प्रथमो द्योतेरेकालंकारः। पुरापद्वा अनुपादाने क्रमशः एक-
काले वा अत्रत्यो * शाब्दैक्यभेदत्रयं दृष्टव्यम्। एवमन्येष्वपि
वक्ष्यमाणोदाहरणेषु भेदत्रयं दृष्टव्यम्। अत्र इव शब्दस्य सदृशमात्र
विषयमानत्वात् शाब्दं श्रौतमात्रगम्यं द्योत्यसाम्यमुपमालंकारः।
श्लिष्टभेदेषु व्योतेत्यनुदाहरति अत्रेति। श्लेषमात्रसहायोऽयमिति।
अत्रापि श्लेषासत्त्वं राजा उपमेयः अन्यजनः उपमानं महा-
धृतित्वं युद्धत्वं द्योत्कर्षापकर्षहेतू उपात्तौ न तुल्यं
[illegible] तुल्यार्थे विहितस्य द्योतेत्यनस्य
अत्रार्थं साम्यम्। मालाव्योतेत्यनुदाहरति इत्यादिना।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सत्वात् श्लार्थं साम्यम्। श्लोपमेयभेदेषु श्लोपमेये साम्ये व्योतैक-
मुदाहरति इयमिति। इयं श्लनुभूयमाना पुनयना धामोद्भुता
निर्जिता नामाप्रस्य पद्मस्य श्रीः शोभा येन तादृशेन श्लकलंकेन।
निर्दोषेण श्लाननेन मुखेन कलंकिनं इन्दुं नयति। श्लत्रापि श्लेषा-
सत्वं श्लाननमुपमेयं इन्दुरुपमानं श्लकलंकित्वकलंकित्वे
उत्कर्षापकर्षहेतू उपात्तौ इवादीनां तुल्यादीनां वा पदानामभावेऽपि
जयति पदनोज्झितं व्यंग्यं साम्यम्। श्लेषभेदेषु श्लेषैकस्मिन् शाब्दे
श्लौपम्ये व्योतरेकमुदाहरति जितेन्द्रियेति। जितं इन्द्रियं मनो
येन तस्य भावः तत्ता तया जितेन्द्रियतया सम्यक् विधावृहाः
पोषिताः तान् निषेवते तच्छीलस्य व्योतगोदा गुणा यैर्य-
दिर्यैः तादृशस्य श्लस्य राज्ञः गुणाः पोष्यत्वादयः तत्तायाश्च
श्लब्जवत् कमलस्येव भंगुराः नश्वराः न श्लपितु दृढाः इत्यर्थः।
श्लत्र श्लेषेण गुणशब्दः तदर्थस्य व्योतगोदत्व भंगुरत्वे उत्कर्षापकर्ष-
हेतू उपात्तौ तत्र तस्येति सूत्रेण इवार्थे निपातस्य व्योत-
श्लत्वस्य सत्वात् शाब्दौपम्यम्। श्लेषभेदेषु श्लर्थे साम्ये
व्योतैकमुदाहरति श्लखण्डेति। श्लखण्डं समग्रं पूर्णं च मण्डलं
राजमंडलं बिम्बं च यस्य सः श्रीः शोभा तद्वान् श्रेष्ठ पृथ्वीपतिः
राजा जातु कदाचिदपि निशाकरेण तुल्यं चन्द्रवत् कलानां
नवः षोडशसंख्याकानां षोडशभागानां वा वैकल्यं विकलत्वं
नाशं नागतः न प्राप्तः इति त्वं पश्य इति वाक्यार्थस्य
कर्मत्वम्। श्लत्र कलाशब्दः श्लेषेण पृथ्वीपतिरूपमेयं निशाक
उपमानं श्लखण्डमण्डलत्व कलाविकलत्वे उत्कर्षापकर्षहेतू
उपात्तौ तेन तुल्यमिति तुल्यार्थे निपातस्य व्योतश्लत्वयस्य सत्वा

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

श्लार्थं साम्यम्। मालाव्योतैकमुदाहरति हरबोधिति।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

हे त्रिलोचन राजन् त्वं मदोन्मदीप हरणतुल्यं हरवत् निषमदृष्टिः

त्रिलोचनः शत्रुसमदृष्टिश्च नासीः किन्तु समदृष्टिरेवासीति भावः

हरेण तुल्यं हरिवत् श्रीकृष्णवत् वेधृतः लक्ष्मीः महान् वृषो वृषासुर

धर्मश्च येन एवं नासीः किन्तु सदा धर्मशील एवेति भावः रावण

तुल्यं रावेवत् शत्रुनुत्तहाः कराः वेतण्डाः राजग्राह्य भागाश्च तैः

तापिता भूभृतः अभिरक्ष जनश्च येन एवं नासीः। अत्र तुल्यार्थे

नीतः राजा उपमेयः हरादिरुपमानं निषमादयः शब्दाः श्लेषाः

निषमदृष्टित्व मदकर्षहेतुकपात्रः समदृष्टित्व मुत्कर्षहेतुर्नैत्यः।

श्लेषभेदेषु शब्दैकदेशे साम्ये व्यतिरेकमुदाहरति नैत्यादिनेति।

नित्योदितप्रतापेन भास्वता मोक्षमता मोक्षश्च एवंविधेन शत्रुणा

भूपेन त्रियामा रात्री तत्र्यां मीलिता प्रभा यस्य तादृशः भास्वान्

सूर्यो विनिर्जितः। अत्र भास्वेतिश्लोपिते श्लेषः

भूपः उपमेयः सूर्यः उपमानं नित्योदितत्वं रात्रौ गतप्रभत्वं च

उत्कर्षापकर्षहेतुः इत्यादि तुल्यादि शब्दाभावेऽपि विनिर्जित-

पदेन साम्यमाक्षिप्तम्। यथावत्तुदाहरति स्वच्छात्मेति। यत्र

वासन्ते रजनीषु पिवतां मानकर्तृणां युवतां च मूनां तृष्णां मद्य

पानेच्छां शत्रुपानेच्छां च मद्यु मद्यं जहाति शत्रुगतानां शत्रानं तु

जहाति। श्लेषनिरोधगानाह स्वच्छात्मेत्यादिना स्वच्छात्मता

निर्मलत्वं तेन समुल्लसितं चोतिचोम्बितं इन्दुविम्बं यत्र शत्रु-

पक्षे तथाविधम्। शत्रानपक्षे स्वयमूह्यम्। शत्रुश्रीगतानामानं

मद्यमदृशं हरणत्यादि मत्वात् इत्येवं श्लेषनिरोधेन गौणप्रया

ऽपेक्षापि मद्यु तृष्णां जहाति नानतमित्येतेन वैलक्षण्यात् व्यतिरे

कोपेक्षति स्वातंत्र्येण शब्देऽपि भेदाः वोध्याः। शत्रोरेव नामकर्मत्वं

लक्षयति निषेधद्वयेन। वस्तुनिरूपणं वचनाद्वस्य शत्रुवचनाद्वस्य वा यो

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

निषेध्यः ज्ञोभ्यानिषेध्यः सः ज्ञाक्षेपालंकारः निषेध्यः निषेध्यइत्यर्थः 270
निषेधाभास इति यावत् शब्दगत्या निषेध्येऽपि ज्ञर्थगत्या निषेधैव
शोभपत्तेः । निभन्नते वक्ष्यमाणेति । वक्ष्यमाणश्च उन्मश्च वक्ष्यमाणोसौ
नो निषेधो यस्य निषेध्यस्य तादृश इत्यर्थः सेदवाह स ज्ञाक्षेपो रोदुं
मन इति । ज्ञनुपसर्जनोक्तार्थस्य ज्ञनुक्तमनोभव इत्यर्थः । ज्ञज्ञशब्द -
वन्मत्पत्नीमिति । दुःखोत्तरशमे हेतुत्वेन यत् कर्षितुं न शक्यते
इत्यर्थः । तत्र वक्ष्यमाणनिषेधं निषेध्यमुदाहरति रुरुक्षतीति ।

रु रुक्षे रुरुक्षे येनासौ कस्यापि कृते निष्कृप भणामि अलमथवा ।
ज्ञनेनयोरित कार्यारम्भकारिणी म्रियतां न भणिष्यामि ॥

इति संस्कृतम् । रु ज्ञरे निष्कृप त्वं रुक्षे ज्ञागच्छ कस्याः ज्ञपि
कृते ज्ञर्थे किमपि तत्तीव्रदोषशमरूपं भणामि कथयामि । ज्ञथवा ज्ञलं
न भणिष्यामीत्यर्थः ज्ञनेनयोरित कार्यारम्भकारिणी यदि म्रियेत म्रियतां
नाम न भणिष्यामि । ज्ञत्र निरुद्ध जीवितो नीमिनासंतापातिशयो ज्ञवश्यं
वक्तुमिष्टः न चासौ निरोद्धव्य वक्तुं शक्यः इति निषेधः । उन्मोचयं
निषेध्यमुदाहरति ज्योत्स्नेति । वामकं इति दुष्टमौन्मिथम् । ज्योत्स्ना
चन्द्रिका मौक्तिकदाम मुक्ताहारः चन्दनाम्भः मलयजद्रवः सीतांशु -
कान्तद्रवः चन्द्रकान्तभेदजलं कर्पूरं घनसारः कदली रम्भा
मृणालस्य वलयोन संक्रमणोन ज्ञभोगिनी पल्लवाः कमलिनी -
किसलयोन रुतोन ज्ञन्तर्मानसे मानसमध्ये ज्ञभवता स्थितवता
त्वया तस्याः नायिकायाः स्फुरोलंगोत्कटस्य ज्ञङ्गिकणसमूहस्य
यो व्यापारः दाहोत्पादनं तस्मै तत्पर्यं भवन्ति ज्ञाः इति कोपे
इत्यनेन निषादे ज्ञनेन उन्मेन किं न ब्रूमहे ज्ञनेनशोसेद्धत्वात् ।
ज्ञत्र नियोगिनोनां ज्योत्स्नादि स्फुरोलंगायते इत्योनशोसेद्धत्वं
विरोधं ज्यूहितुं ज्योत्स्नादे ज्योत्स्नादोनपुक्त्वा तत्कथनं

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

0/1-2
241

विभावनं लक्षयति क्रियायाः इति। क्रियायाः कारणत्व ज्ञातेऽपि यत् फलत्वोक्तेः कार्योत्पत्तेः। सः वैभावनालंकारः। उदाहरति कुसुमेति। नायिकायाः विरहावस्थावर्णनमेतत्। सा नायिका कुसुमितलतातेः गृहतोऽपि गृहतोऽपि रजं पौरमध्यत्त धृतवती विरहवशादिति भावः गृहोत्कुलेः भ्रम(समूहैरवधूतापि पौरैर्नर्तने स्म परावृत्य रेत्थूति स्म गोलगोयुक्तालेलद्भौलिः गृहोलितापि गृहचोलितापि गृहधूर्वति भ्रमिमनाय लताहननं पोजहेतु: भ्रम(देशः परिवर्तनहेतुः तरंग सम्बन्धो घूर्णनहेतुः। गृहत्र तेषां हेतूनामभावेति तत्कार्यस्य पौजोदरूपस्य प्रकाशनं कथनमिति विभावनालंकारः। विशेषोक्तिं लक्षयति विशेषोक्तिरिति। गृहण्डेषु कारणेषु सत्स्वपि फलावन्धः कार्याभावकथनं विशेषोक्तिरलंकारः। सा च गृहनुस्त-निमित्ता, उन्मीलनिमित्ता गृहोन्मत्तनिमित्तेति त्रिविधा। गृहनुस्त-निमित्तामुदाहरति निद्रेति। निद्रायाः निमीलो सत्यामपि पुरत्र सूर्ये उदिते सति सरोजने द्वारदं मलत्यातं पराये जाये स्तोत्र भृंगे उपपतौ श्लथीकृतः शैथिल्यीकृतः गृहश्लेषरसः गृहोल्लगनरसो येन तादृशोऽपि सा नायिका गृहोल्लगनात् न चलात् न निवर्तते इत्यर्थः। गृहत्र निद्रानिमीलनयोः सूर्योदयादेरूप कारणसत्त्वेऽपि गृहोल्लगनत्यागरूप कार्याभावोक्तेरिति विशेषोक्तिः। सा च निमित्तस्य गृहनुरागादि-शमस्य गृहनुरनुन्मीलनिमित्ता। उन्मीलनिमित्तामुदाहरति कपूर इति। बालरामायणे तृतीये गृहंके पद्यमिदम्। यः कामः कपूरे च दग्धोऽपि जले जले शीतलमान् गृहतः गृहवायनीयापि गृहकाष्ठतशलेन तेजसे गन्धकेतने कामाय गतो गृहोत्तिवत्यर्थः। गृहत्र शरीरदाहः शीतलजले कृणं सत्यपि तादृशे काले शीतस्पर्शरूप कार्याभावकथनमिति विशेषोक्तिः। सा च निमित्तस्य गृहवार्यवीर्यत्वस्य कथनादुन्मीलनिमित्ता

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

गृहोन्मत्तनिमित्ता विशेषोक्तिं लक्षयति उदाहरति सरस इति। रसः केवल

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स: कुसुमायुध: क्षत: क्षीणो जगन्ति भुवनानि जयेत यस्य कामस्य तनुं शरीरं हरता दहता शम्भुना बलं सामर्थ्यं न हृतमित्यर्थ:। अत्र ननु हरणं बलहरणे कारणं सत्यपि तस्मिन् कार्ये बलहरणस्याभानत्वमनौचित्यमिति विशेषोक्ति: । यथासंख्यरूप नामक मलंकारं लक्षयति यथासंख्यमिति। क्रमेणोद्दिश्यमानानां पदार्थानां क्रमेण उद्देश्यक्रमेण प्रथमस्य प्रथमेन द्वितीयस्य द्वितीयेन इत्येवं समन्वय: सम्बन्धो यथासंख्य नामालंकार: यद्यपि क्षीणक्षीणमिति निर्भिन्नत्वस्य अलंकारत्वजीवातो: शेतोत्पभावादस्य नालंकारत्वं तथापि रम्यत्र पद्ये गद्ये वा बहूनां क्रमान्वये वैचित्र्यादलंकारत्वम्। दाडिमेऽस्मिन्नाटस्पा इति पाणिन्यसूत्रे सत्यपि क्रमेणान्वये नालंकारत्वप्रसंग: वैचित्र्याभावात् उदाहरति रम्य इति। राजानं प्रत्युक्तिरियम्। हे देव राजन् रम्य: रमणत्वं द्विषां शत्रूणं निदुषां पण्डितानां मृगीदृशां रमणीनां च चेतसि वित्ते वससि अत्र अस्मिन् विषये चित्रमाश्चर्यम्। किं कुर्वन्? शौर्यस्य प्रतापस्य उष्णेन विनयेन नम्रतया त्वौत्सुक्येन विलासेन च क्रमेण नाम सन्तापं सम्भ्रमं अत्यन्तरसं श्रीतं शीतं च पुष्णन् अत्र शीतोष्णत्वयो: प्रदर्शनं यथासंख्यमलंकार:। अथ पर्यायान्तरन्यासं लक्षयति सामान्यमिति। सामान्यं विशेषेण विशेष: सामान्येन यत्समर्थ्यते तत्पर्याय क्रोडीकृतो पर्यायान्तरन्यासालंकार: साधर्म्येण समानधर्मवत्त्वेन वैधर्म्येण विरुद्ध-धर्मवत्त्वेन। तत्र विशेषेण सामान्यस्य समर्थनं साधर्म्येणोदाहरति सुखेनेति निजेनेति। निजदोषेण स्वावृतं व्याप्तं मनो येषां तादृशानां पुरुषाणां स्वीयसुन्दरमपि वस्तु विपरीतं असुन्दरं भीत इत्येन पित्तेन मामुना रोगविशेषेण उपहत: पुरुष: शशीवत् शुभ्रमपि शंखं पीतं पीत-वर्णं पश्यति। अत्र निजदोषत्वादे सामान्यं शंखपीतिमना विशेषेण समर्थितमिति विशेषेण सामान्य समर्थनरूपो पर्यायान्तरन्यास:। सामान्येन विशेषस्य समर्थनं साधर्म्येणोदाहरति सुखेनेति। सुखोत्पत्त्यादिना पर्यायान्तरमिदं प्रथम्। अत्र सुखेनत्वादिना स्वीकृतो विशेष: च

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

नासीत्वादिना सामान्येन समर्थित: इत्यपर्यायान्तरन्यासोऽयम्।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

विशेषेण सामान्यस्य समर्थनं वैधर्म्येणोदाहरति गुणानामिति। धुर्यः धुरवहनक्षमः बलीवर्दः गुणानां दौरात्म्यात् गुणरूपदोषात् धुरि वाहनभारे नियुज्यते गोत्वः वृषभः गुरुज्ञातः निर्गतो यस्य लाङ्गूलात् लम्बो यस्य सः सुरभिं यथा स्यात्तथा स्थापितः। अत्र धुर्यः इत्यादिना भिन्नेतं सामान्यं गौर्गलिरीति विशेषेण समर्थयतीति अत्रान्तरन्यासालङ्कारः। सामान्येन विशेषस्य समर्थनं वैधर्म्येणोदाहरति अत्रेति। हे भग्न आर्यपुत्र दीर्घकालं जीवेत बहु अत्र यस्मात् ईदृशं सुहृद्व्यसनं अत्रोद्रेकं मम वाच्यं ये सुहृदः मित्रस्य पराभवं अज्ञानात् अत्रैवैव अयं नाशं गताः आप्ताः ते एव जनाः जगति लोके अन्याः मुक्तिनः इत्यर्थः। अत्र ते इत्यनेन सामान्यतो अन्यदार्थस्यापि ग्रहणात् सामान्यत्वं ते अन्याः इति सामान्येन अन्वयः इति वैधर्म्यद्वारा स्वामुरपराध्यतो विशेषः समर्थ्यते इत्यतोऽन्तरन्यासालङ्कारः। विरोधाभासं लक्षयति विरुध्यते। अत्रोभयेऽपि वस्तुगत्या विरोधाभावेऽपि द्वौ वस्तुनो विरुद्धत्वेन भातः प्रतीयमानः यो विरोधः तस्य वचनं अत्रोभयोर्विरोधे सति विरुध्यते इत्यर्थः। अत्राभासते इत्याभासः विरोधस्याभासः विरोधाभासश्च इति समासः। एवं विरोधाभासं दर्शयन् विवृणोति जातीति। जातिगुणक्रियाद्रव्यात्मनां पदार्थानां परस्परं दशधा विरोधाः सम्भवन्ति तत्र जातीनां जात्या सह विरोधं उदाहरति खलिनेति। हे सुभग सुन्दर अस्याः कुरङ्गदृशः नीपव्यापारः विरोधवशेन दैववशात् त्वयोपयोगः एवमेव युज्यते अस्य पतते सति अत्रोभयत्र या खलिनी कक्षोत्तंसी विसलतं पल्लवं मृणालस्य वलयं केसरं च अत्रादिपदात् चन्द्रचन्दनादेश्च दवदहनस्य दावाग्नेः सादृश्यवती इत्यर्थः। अत्र खलिनीत्यादि जातीनां दवदहनत्वजात्या सह यो विरोधः स च खलिन्यादिषु नैवरहद्वीपत्वेन दवदहनत्वोपचारेणाभेदेन भातः इत्याभासरूपः विरोधाभासालङ्कारः। खलिनीत्यादेः दवदहनत्वस्य च जातित्वं रूक्षत्वात् नित्यत्वात् अनेकानुगतत्वाच्च। जातेः गुणेन सह विरोधस्तथा हरिणेक्षणः इति [illegible] तव अत्रोत्तरे समीपे इदं निगदतः

CC-0. Lal Bahadur Shastri University Delhi. Digitized by Sarvagya Sharada Peetham

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

01
247

मिमित्याह । स्थिरयोगेऽपि अनुज्झितमुज्झः अत्युच्चतां भजन्तः मरुतो अनचलः अप्रत्यवेगः अबद्धयोगेऽपि अगम्भीरा अनवगम्भीराः निश्चला भूमयो अनोतत्वं । अनपकृष्टगुणत्ववतीत्यर्थः । अत्र मेरोरत्यादेर्जातीनां अनुच्चत्वादिभिः गुणैः सह विरोधः स च वर्णेनोपरञ्जनो इत्यादिनिरस्तः विवक्षया चाहतः इति निरोध्याभासः । यद्यपि निश्चलमेरोते न जात्युपाहृतं अवस्थाभेदेन जातित्वाभावात् तथापि सृष्टिभेदेन तद्भेदात् मण्डलभेदात् वा जातित्वं इति । जातेः एकपदा सह विरोधमुदाहरति येषामिति । ये भूपते धाराधराः बहवः तोदिनो दानिनो अवति सोऽपि बहुशः संगतसंगो शक्रं मनोभेषां तथाभूतानां राज्ञां जेतृणां कण्ठपीठगृहं अनोपितां प्राप्य अनुरज्यते प्रीतिमान् सन् वर्णश्च भवति कमपि एतेषां सौहार्दं चित्रतां प्राप्नोति तेषां राज्ञां त्वया पांसूनां धूलीनां पटलैः प्रसाधनविधिः अलंकारः निर्वर्त्यते क्रियते कथं दत्त्वा संग्रामधनिश्रमाः ते क्रियन्ते इति मौलुकमाश्चर्यमित्यर्थः । अत्र धाराधरत्व जेतृनुरागत्वेन अपि एकदेशस्थं विरोधः स च कर्तृसंपर्क कृत्वा तोदित्व चित्रकर्णार्थत्वाभ्यां परिहृतः इति निरोध्याभासः । जेतृ इत्येकपदा सह विरोधमुदाहरति । सृजतीति । यः इदं जगत् हेलया अनायासेनैव सृजति रक्षति संहरति च सोऽपि जनार्दनः अनवसत्वशात् कालवशात् अन्येषां मर्त्यानां जगतः इदं चित्रमाश्चर्यमेव । अत्र शश्वदत्वजगतः जनार्दनेन इत्येकपदस्य विरोधः स च लीलया सर्वसम्भवात् मत्स्यशरीरपरिग्रहत्व अनाश्रयत्वात् पोहृतः इति निरोध्याभासोऽयम् । अनात्मपरत्वात् जनार्दनपदस्य द्रव्यत्वम् । गुणस्य गुणेन सह विरोधमुदाहरति सततमोघ । हे भूपते सततोऽनन्तरं मुसलेषु अनेकेषु अनासक्ताः बहवः परगृहक्ष्म पटगवो कौशेयाः कक्षिजपत्नीनां शाम्भवीनां क्षौमाः हस्ताः भवोत त्वोप दानोरे विद्यमाने सति सरोजवत् कमलवत् सुकुमाराः कोमलाः जाताः । अत्र कोमलसुकुमारत्वभागुणयोः परस्परं विरोधः स च भवदृष्टिवशात् क्षमं गृहीत्वा [illegible] । गुणस्य क्रियया सह विरुद्धा कालभेदेन नारहति ।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

24S

नैरोध्यमुदाहरति पेशलोमेति। पेशलं कोमलं यदपि खलानां दुर्जनानां वचनं सत्त्ववितां तत्त्वज्ञानां मानसमन्तःकरणं दहति तितरां शोकशोषेण दहति परुषं रूक्षमपि सुजनस्य साध्वं मलयजरसवत् प्रमोदयति ग्रानन्दयतीत्यर्थः। ग्रत्र पेशलत्व परुषत्वयोर्गुणयोः दाहप्रमोदक्रियाभ्यां विरोधः स च खलत्व सुजनत्वाभ्यां योगेन। गुणस्य द्रव्येण सह नैरोध्यमुदाहरति कौञ्च्येति। ग्रत्रौ कौञ्च्याद्रेः उद्गमः महत्पा याः हृदयः शैत्यात् तोयः हृद्यरूप पस्य भागस्य भागेभ्यो नानाभ्योजस्वलत् स्रुतनपञ्च पतनवत् स्रोतोजातः कोमलो ग्रजायत स भागेनः परशुरामः ग्रपूर्वः रागः ग्रनैतोमनो ग्रवचनाः इत्यर्थः। ग्रत्र कोमलत्वस्य गुणस्य कौञ्च्यादि द्रव्येण सह विरोधः स च भागेव मोहन्ना योगेन। क्रियया क्रियया सह नैरोध्यमुदाहरति पोयद्धेति। ग्राख्यातोपदं पदं चतुर्थीविभक्तेः। ग्रत्र. जङ्घाते च नाशं च कुरुते इति ग्रनेकक्रियाप्रयोगे क्रिययोर्विरोधः. नैरन्तर्येण क्रियाक्षेपात् पोयद्धेति; क्रियायाः द्रव्येण सह नैरोध्यमुदा-हरति ग्रपोमेति। मलयरसतुल्यं पदमेतत्। ग्रयं जलोर्मिः समुद्रः यावां जलानाँ एको मुख्यो निजस्वः स्वामी द्रोह हेतोः रत्नानांकोक्तः: इति हेतोश्च तृष्णया तदीयतां व्याप्तुं मनो येषां तादृशोत्साहोः येन ग्रपोक्षतः गुणिगतस्वः एनं जलोर्मिं क्षणात् क्षणमेव ग्रपास्यति इत्येवं को जानाति। मोदशं जलोर्मिम्? निजाः स्वीयाः या समुद्रो रत्नसम्पुटं येन क्षेत्रेण गतिः तदगतं ताम्यन्तो ग्लायन्तः तिमयो मत्स्याः नक्राश्च यस्मिन् तादृशं च। ग्रत्र यानीकृपयाः ग्रगस्त्येन कर्त्री समुद्रेण क्रियाश्च द्रव्येणविरोधः नरेनरोजस्य ग्रगस्त्यस्य समुद्रपानासम्भवात् नैरोध्यः ग्रगस्त्यतपः प्रभावोक्तशेषेण योगेन। द्योत निरोध्यभाव:। द्रव्यस्य द्रव्येण सह नैरोध्यमुदाहरति समेयोति।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

हे क्षितीतिलकराजन् त्वयि लक्ष्मीर्नीरवे सीत शंकरस्य शिरस्य
प्रज्ञा शिवा जाय समूहः तत्सम्बन्धिन्या ज्ञाप्या नदी गंगा साऽपि
कालिन्दी यमुना भवति। कुतः? समयाः मताः ये मनंगजाः क
हस्तिनः तेषां मदजलस्य निस्यन्दः प्रवाहः स एव तोयं जलं यस्याः
तस्याः गोपेन्द्रांगात् सम्बन्धोदत्पर्यः। ~~ज्ञां समूहः यदं नेत्रजलानि~~
~~ज्ञाप्या यमुनात्~~ मृतेः। ज्ञत्र गंगायमुनयोः द्रव्ययोः परस्परं
विरोधः स च कालिन्दीपदस्य श्यामाभासत्वात् गोहतः शैव
विरोधाभासः। स्वभावोक्तिं लक्षयति स्वभावोक्तिरिति। स्वभावस्य वर्णनीय-
वस्तुमात्र गतस्य धर्मस्य क्रियादेः स्वभावोक्तिरित्यन्वर्थसंज्ञा। ज्ञर्थात्
तस्य क्रियादेः वस्तुनो। ज्ञसाधारणत्वेन धर्मं वर्णनं स्वभावोक्तिरिति लक्षणं।
ज्ञत्रापि ~~ज्ञमत्कृतेन~~ चमत्काराजनकत्वेन अलंकारसामान्य लक्षणाक्रान्तत्वेन च।
तेन गोरूपत्वं बलीवर्दे चासम्भवेन भुवेन सः।

मूत्रं मुञ्चति रोशनेन ज्ञपानेन तु गोमयम्॥ इत्यादेर्नालंकार्यत्वं।
त्वम्। स्वभावोक्तिमुदाहरति पश्चार्धेन। हर्षाक्षिप्तेत्यादिना।
शयनादुत्थितः तुरंगो ज्ञश्वः पश्चादंघ्री पोश्चमपादौ यस्य तादृशं
पृषुवंशः तस्य नीतः नम्रता तया विततं विस्तृतं ज्ञंगं शरीरं उच्चैः
ज्ञीलनेन ज्ञाधिपत्वा कृत्वा ज्ञमुग्नौ नम्रः कण्ठो ग्रीवा यस्य
तादृशः सन् उरसे मुखं ज्ञासज्य संयोज्य धूल्या धूसरां कोलनां पार्श्वां
स्कन्धकेशावलिं विधूय कम्पयित्वा घासग्रासाभिलाषात् ज्ञनवरतं
निरन्तरं चलन्तौ दोषतुण्डौ ज्ञोष्ठाधरौ यस्य तादृशः ज्ञतं शैलः शब्दायमान
हेषां कुर्वन् रुरुटे ज्ञतां मूत्रं विलिखति उत्सृजति। ज्ञत्र ज्ञश्वमात्रगतस्य
क्रियासंस्थानयोर्वर्णनात् ज्ञलंकारत्वम्। व्याजस्तुतिं लक्षयति व्याजस्तुतिरिति
मुखे ज्ञन्यथा निन्दा स्तुतिर्वा कोऽपमर्थवसानेऽन्यथा ज्ञवति स्तुतेर्निन्दा
~~निन्दायाः स्तुतेरपमर्थवसायेन~~ निन्दा निन्दार्थपर्यवसायेन स्तुतिः। सा
व्याजस्तुतिः व्याजरूपा स्तुतिः ~~व्याजरूपा~~ स्तुतिः। व्याजः कपट

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स्तुतिपर्यवसायिनी निन्द्यमुदाहरति हे शेते।

त्वां विनेत्यर्थः। उपरोधः अनुरोधः। तेन वन्ध्यं शून्यं मनो येषां

मौलेः शेखरस्य मणेः उच्चैः नास्ति तथा लज्जानमनं विनैवोच्चैः

रमामन्तेऽपि लक्ष्मीं विना उच्चैस्त्व न मेरुरपि इत्यहं मन्ये यो

भवान् मुखशेते: युद्धाद्यनेकोपायैः रक्षन् त्यागेन उज्झितायाः पृथ्वीः

लक्ष्म्याः त्यागं दानं तनुतेस्म त्यागेनोत्तरयन् जेतारमपि तथा त्याग-

कृतावमानं त्याज्यमपि यस्याः पृथ्वयः त्यागे रक्तस्थितः स्थितेत्यर्थः

उज्झित। अत्र रक्षः उज्झितत्यागरूपः निन्द्यो व्याजेन महादातृत्वं ज्ञा

लक्षणावत्त्वेनाध्यानात् स्तुतिरिति व्याजेन स्तुतोऽपि निन्द्यपर्यवसायी।

निन्द्यार्थैकपर्यवसायिनी स्तुतिमुदाहरति हे शेते।

हे देवाजित् बोधियत्न युद्धेषु हे तोषये त्वत्तः त्वत्तोषविरोधेः

किंवा परोहिताधाने परोपकरणं गृहीतं व्रतं येन स: गृहीतव्रतः त्वत् तादृशः

परः पेडितोऽपि नास्ति यत् यस्मात् त्वाज्ञात् तृषन्तः तृषार्ताः ये

पान्थजनाः तेषां जलदानेन यः उपकारः तस्य वचनायां सम्यादन-

विषये वैमुख्येन पराङ्मुखत्वेन लब्धं गतं यत् यशः उज्ज्वलकीर्तिः

तस्य प्रो भोः महदौन्धत्यं तस्य दोर्दण्डेन निर्महणविषये मेरोः मर्क-

देशस्य साहायकं सहायत्वं हरया करोषीत्यर्थः। अत्र अनुज्ञस्य

स्तुतेः व्याजेन निन्द्यार्थोत्पादनात् व्यभत्कारोत्तरशयः इति व्याजस्तुतिपरः।

सहोक्तिं लक्षयति सेति। रक्तं चंदं यत् सहायत्वं

अतात् सामर्थ्यात् पेडवाधकं अत्रैकार्थाभिधायकं सः सहोक्तिलक्षणं

उदाहरति सहोक्ते।

सह दिवसलोचनशोभः दीर्घाः स्वाहतदण्डाः

सह मृगपतिवलयैः वाष्पधाराः गलन्ति।

तव सुभगपेडयोगे तस्याः उद्वेगगूढाः

सह च तनुलतया दुर्वहा जीवितेशा॥ इति संस्कृतम्

कर्पूरमञ्जरी सट्टके पद्यजेदम्। हे सुभग सुन्दर तवविरोगे पेडरे

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ओष्ठशुष्काः तस्याः नासिकाशाः दन्तक्षताः श्वासाः दैवसदैनशोभाः सह दोषाः जाताः नाश्यो नेत्राम्बु तस्य व्याः क्रोधवलेयः रत्नसंज्ञेः सह गत्वित चतोवत् तथा जीवितशा नष्टत्वतया शर्वरी यद्धया सह दुर्बला जातेत्यर्थः। यत्र नासादन्तक्षतेषु यत्रमान्तेषु दोषत्वादीनां यत्नन्वयः शब्दः दैवसदैनशोदेषु तु तृतीयान्तेषु सह शब्दार्थान्वयबलात् बलादार्थः इति सहोक्तरलंकारः। विनोक्त्यलंकारं लक्षयति विनोक्तीति। अत्र पूर्वत्र यत्नन्वयौ यत्नन्वयं विना यत्नन्वयः सन् शोभनो न भवत्यशोभनः तथा नेत्रं नाशोभनः किन्तु शोभनः सा यक्षा हयत्नन्वयौ विनोक्तेरित्यर्थः। यत्नशोभनत्वमुदाहरति यक्षो यक्षि निशया रात्र्या विना शर्वरी चन्द्रः यत्नयोगः यत्नशोभनः इत्यर्थः शोभना विना सापि निशापि महत्तमः यत्नन्वयं विना यत्नशोभनेत्यर्थः। यत्र दैनशोदेन विना यत्नन्वयस्य चन्द्रोदयस्य शोभनत्वमुक्तौ तत्र विनोक्त्यलंकारः। शोभनत्वमुदाहरति कोगति। यत्रं नेत्रं सुनुः राजपुत्रः मृगेक्षणया यत्संगमनया विना विनोदेषु व्यवहारेषु यावनेन ओदति स्फुरति तस्याः प्रभया प्रकाशेन यत्नगत्भः चतुरः शोभनः इत्यर्थः तेन पुष्पस्फुटिना सुहृज्जनेन विना यत्नमुत्फुल्लिचन्द्रः तहत् सुन्दरः भवतीत्यर्थः। यत्र कृष्णलोचनया पुष्पसुहृदोश्शेषं च विना नेत्रं सुनुः विनोदव्यवहारचतुरत्वं चन्द्रसुन्दराशयत्वं च शोभनत्वं प्रतिपादयति तत्र विनोक्तिरलंकारः। चोरवृत्तं लक्षयति चौरवृत्तमिति। यः स्वकीयं पदार्थानां वस्तूनां विनिमयः सा चौरवृत्तिरित्यर्थः। चौरवृत्तं विनिमयं आक्षेपदर्शनेदं संज्ञा। उदाहरति ललनाकेलिरिति। यत्रं मरुत् वायुः उदेत्य कुसुमानि सञ्जातपुष्पाणां लतानां वल्लीनां यत्समं यत्नुपमं यत्नोदं चारुतरं भरं यत्पर्यं स्वयमेव स्वीकरोति। किं कृत्वा? मतं सम्मतं नाम्दं मोदं दत्वा लतानां यत्पल्लवानां पान्थानां इदं इदृशं सहसा यत्नाय हत्वा यत्रियन्त्याश्च भावे: कोदतं रोदनं मोहो विरहेणेति एतेषां व्यतिक्रमं

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सम्पर्कं ददाति योजयेत्यर्थः इति शेषः। अत्र हर्षार्थे लोहितेन तस्य रागोद्गमस्य निमित्तम्। अत्रार्थे उदाहरणमाह। व्याधिव्याधीनां न्यूनानां निमित्तम्। न्यूनेन उनस्य निमित्तं उदाहरतीत्यनेनेति। ये पश्य दृष्ट्वा दर्पयुक्तो बलगर्वितो यो व्याधवरविसरः शबरीनि शत्रुवीर-समूहः तेन सम्मुखे युद्धे नानावर्णैः रक्तैः एकैकपक्षैः उद्गतैः उड्डीनैः दाक्षिणिनायकस्य भयंकरशब्दमुक्तान् उद्धतान् ताडनानि स्वीकृत्य निर्गतो विपुलस्नायो विशेषेण गतात् ताहशः गीतस्य व्याख्यानस्य विधिः स्वीकारो यस्मात्। ताहशी इयं वसुन्धरा भूमिः निर्मीर्णा दत्ता व्यर्थात् तुभ्यमेवेति भावः। अत्र द्वयूनैः द्वाभ्यां उद्गताः वसुन्धरायाः निमित्तभूतस्य ये वीरा व्याधाः। भाविकनामानमलंकारं हेत्वा लक्षयति यत्पक्षाः इति। भूता एवंकालिकाः भाविनः उत्पत्स्यमानस्य भावाः पदार्थाः तेषां यत् यत्पक्षाः इव हेतवन्त लौकिकैः यत्पक्षोपपत्तये ज्ञेयत्वेन्यन्ते तत् तत्कालदर्शनवत् भाविकालंकारः उदाहरति व्याख्यातेति। हे कान्ते अत्र अत्रनयोर्नयनयोः यत् अज्ञानं कज्जलं दत्तमासीत् तयुक्ते तव लोचने लोचनहर्षं करयामि भावी भूषणानां अलंकाराणां प्रसारः समूहो यत्र तथाभूतां तव व्याकृतिं साक्षात्कुर्वे। अत्र हर्षार्थे भूतस्य अज्ञानस्य अनार्थे भाविनो भूषण-सम्भारस्य च यत्पक्षतयाभिधानेनेति भाविकनामालंकारः। काव्यलिंगं लक्षयति काव्यलिंगमिति। काव्यमिव यत् लिंगं काव्यलिंगं तत्रेशात्वोत्-यत लिंग ज्ञानतनाय काव्यपदम्। लिंगमत्र हेतुः हेतुस्वरूपं च ज्ञापकपुरोगे सिद्धाधिकृतार्थत्व हेतुर्भवति साधकः। कारको ज्ञापक इति द्विरूप खेऽप्युपादेयत्व। अत्रापि यमत्रीति हेतुत्वमलंकारालंकारं चाहमत्वेन तेन दण्डेन घटः इत्यादौ यमत्कारामावान्न काव्यलिंगत्वम्। हेतोः वाक्यार्थतामुदाहरति व्याख्यातेति। हे पुरो नेत्रपुरो नेत्रव्यं पुरो स्थितिम् कालिकापि जन्मनि यत्तं त्वां ज्ञातो न ज्ञातवान् नमस्कारं न कृतवान्

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

250

कथं ज्ञानोत्पत्तिरित्याह । इदं मया चक्षुर्भ्यां शमीयेत्यादिश्रुतेः लिंगात् ज्ञायतेऽतं ज्ञानोत्पत्यर्थः त्वत्प्रसादे सति मुक्तिलाभेन शमीशे-त्यत्रेशनादीनि भावः सम्पीत इदानीमपि नमनमुखः ज्ञेयं ज्ञानतुः शमीशस्यरूपः देहाभिमानरहितः इत्यर्थः ज्ञेयेऽपि ज्ञानसाधनेऽपि ज्ञानोत्पत्ति मुख्यत्वं पुनर्देहाप्त्यभावेन ज्ञेयेऽपि प्रणमनभावः हे मदेरा नादेयं ज्ञप्यार्थत्वेऽपि भवता ज्ञातव्योमित्यर्थः । ज्ञत्रपुत्रा क्षोन्यर्थं नाहं भवन्तं प्रणतवान् ज्ञेयेऽपि ज्ञप्रणमनेतभाव् इत्यनान्तर्याच्यदार्थिकेन ज्ञनमनं ज्ञप्यार्थे हेतुः ज्ञत्पति ज्ञानमनद्रुपजन्यं दुरितक्षयं नाशनीय-मित्यर्थः तथाच श्रुतमानिज्ञानोत्पत्तिमनसा हेत्वोः लिंगाद्देवनसाधुत्वे, वाक्योरर्थतोति काव्योलिंगमलंकारः । हेतोरेकपदार्थतामुदाहरति ज्ञणमीति । मालतीमाधवे पद्यमेतत् । रे पाप ज्ञणधिनोनां ज्ञोतिमतीनां साध्वीनां सतीतो यः पोद्दासासः तेन व्यभिगेन ज्ञरेः लोलतोशीर्ष-पुष्पैरेनेरपि मत्वपुः ताम्यति ग्लायति तत्र तस्मिन् वपुषि मालती-शरीरे वध्याय शास्त्रमुपोद्यपत: चालयतः तत्रोशमीति मूर्धनि एवः ते करालो भुजः बाहुदण्डः ज्ञमाज्ञे ज्ञमाले मदद्दण्ड इव पततु इत्यर्थः । ज्ञत्र वपुषि शस्त्रं मुपोद्यपत: इति शास्त्रोपक्षेपरूपो ज्ञर्थः भुजपातेहेतुः इति काव्योलिंगमलंकारः । हेतोरेकपदार्थतामुदाहरति भवेति । सिद्ध-ज्ञसाधन ज्ञात तत्त्वज्ञानस्य साध्यत्वेनोक्तीयम् । हे भवोद्भूलन भवतोलेपन भवते भद्रमस्तु कल्याणं भवतु हे कृष्ण भवते भवतेः श्रुतमस्तु शिवेसुताकान्तस्य शिवस्य ज्ञत्रालयः शास्त्रादृ तस्मालंकृतिं शोभनपरम्परां सोपानपोक्तं इ. तस्याः शोभतेत्यर्थः ज्ञत्र ज्ञस्मिन् ज्ञद्वैत ज्ञमाधवेन सेवया तोषितेन निभृत शिवेन मुक्तां भवो-द्भूलनायेनां भवतां या सपर्या सेवा तत्सुखेन तदानन्दुरुप्रलोकः उत्कर्षः तद्भद्वैदिति तलाशेन सोऽहमस्मि सोऽहमस्मि इत्यादि

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

उदात्तं लक्षयति उदात्तोऽरिति । उत्कर्षेण ग्रहीयते गृह्यते स्मेत्युदात्तम् कर्मणि क्तः उत्पूर्वः वक्तुः ध्वनेरोष्ठ्ये सम्पत् समुच्चारणत्वम् । उदाहरति मुक्ताः इति । चेदुषां पण्डितानां मनेषु हृदयेषु ये मौक्तिकदामो गीतानि चर्चितानि सम्मार्जनीभिः शोधनीभिः दासीजनेन हृताः ध्वनसारिताः ततः काले प्रांगणभूमि मध्यं मन्दं यथा स्यात्तथा चलन्त्यो धावन्तो वान्ताः वीतयः तथा भक्तिलक्षणया प्रणालक्रमेण ध्वस्ताः ध्वस्ताः मुक्ताः मौक्तिकानि इवात् दीर्घमनीजेषु शैवलेषु चर्मेषां ते केलिमुक्ताः क्रीडार्थं पतिताः क्षीराः यत् वर्षति तत् भोजनृपतेः दानात् त्यागात् लीलायितं क्रियते । अत्र चेदृदृष्टान्तात् उत्कर्ष सम्पत्ति वर्णनात् उदात्तालंकारो यम् । अथ व्यधिकरणमुदात्तं लक्षयति मङ्गलादिति । अंगेति वर्णनीये अर्थे सहितां साम्यादिनीरालं यत् उत्कर्षकं अंगत्वं वर्ण्यते तदपि उदात्तम् । उदाहरति तदिदमिति । तत् रक्तवर्णं वर्तते यत्किंत् रक्तेऽपि तेनसत् वाङ्मात्रसहायः वाङ्मात्रसहायः शोणः रक्तवर्णं चकार । अत्र वीरो रसः वीररसस्य वर्णनीयस्य ~~प्राप्तस्य~~ वर्णनीयस्यार्थस्य अंगत्वात् । अथ समुच्चयं लक्षयति तत्सिद्धौ इति । एककेन उदाहरणे सिद्धे सति यत् उदाहरणं साध्यकार्यं कारणान्तरं तत्समं कार्यसिद्धिकरं भवेत् स्यात् समुच्चयालंकारः । उदाहरति दुर्वार इति । मयूरसूनोः शंकुकस्य चमत्कारकारीति शार्ङ्गधरपद्धतौ स्थितम् । कः- मार्गणः कामबाणः दुर्वारः दुःखेन वारयितुं शक्यः प्रियतमः कान्तः दूरे प्रवासात् इदे अस्ति अतः उत्सुकं दृष्ट्वा प्रेक्षणकौ- तुकं येन स्नेहः गाढमौनशायितं अयः नवं नूतनं काजः अस्ति

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

वस्तुनः एकेनैकत्र क्रमेणासम्बन्धो यत्र सः प्रथमः पर्यायालंकारः। एकमेनैकत्र भवतीत्यस्योदाहरणं दर्शयति। भल्लटशतकेऽप्यस्योदाहरणम्। हे कालकूट उत्कट-विष उत्तरोत्तरं नैनोशेषं यदं स्यादं मत्पां नाइशो इपमाश्रयोत्थितः तव केन उपदेशेन यत् यद् यद्यं एजनस्य सम्मुखस्य हृदये एभ्यनन्तरं एनन्तरं वृषलक्षणः शंभोः कण्ठे एभ्युना रत्नानां दुर्जनानां नाम्ने गुरवे नमसीत्यर्थः। एत्र कालकूटस्य वस्तुनः एकस्यानेकत्र नाशे प्रयोजकं किंचिदपि नोक्तमेते भवत्युदाहरणं एभ्यात् एकस्य कालकूटस्य कुमेणानेकत्रास्थानेः। उदाहरण-त्वमाह विम्बाष्ठ एनेति। भवसाइशोल्लिखति पद्यमिदम्। हे तन्वि यदं ते तव बिम्ब सदृशे नेत्रे एव रागः अदृश्यत हे मृगशावाक्षि एभ्युना एव रागः तव हृदये ऽपि लक्ष्यते दृश्यते। एत्र एकः एव रागः क्रमेणानेकत्र नेत्रे हृदये च भवतीति पर्यायालंकारः। एकमेनैकत्र क्रियते इत्युदाहरति तं लक्षयति। बिम्बमरुणत्वोल्लासं पद्यमिदम्। तत्र

तत्रेषां श्रीसहोदररत्नाभरणे हृदयमेकरसम्।
बिम्बाधरे चेषामिनेत्रोशतं कुसुमबाणेन॥ इति संस्कृतम्।

श्रीसहोदररत्नाभरणे श्रीविष्णौ एकरसं तत्परतया यावत् तत्रेषां प्रसूनानां हृदयं कुसुमबाणेन कामेन चेषामिषां मोहनानां बिम्बसदृशे एभ्यरागे नियोजनमित्यर्थः। एत्र एकस्य हृदयस्य एनेनैकत्र श्रीविष्णौ नेत्रे च क्रमेणो सीत भवतीत पर्यायः। एनन्योक्तं पर्यायं लक्षयति एभ्यः इति। ततः पूर्वस्मात् पर्यायात् एभ्यथा वैपरीत्यं एभ्यो एभ्यनन्तर पर्यायः इत्यर्थः भवत्यर्थे उदाहरति मधुरिमेति। एभ्यहो महदाश्चर्यं मधुरिम्णा माधुर्येण रोचकं मनोहरं रत्नानां दुर्जनानां वचो वाक्यं प्रथमं पूर्वं पुष्पभूतं वमनोत्थं एभ्यनन्तरं तदेव वमः एभ्यन्तर्गतं उपरि याप्तं सत् हालाहलं विषमेव भवति। कीदृशम्? मोहेन मोहजनकम्। एभ्य

CC-0. Rajiv Gandhi Sanskrit University, Delhi. Digitized by Sarvagya Sharada Peetham

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स्त्रीत्वं धैर्यविरोधि बाला नवान्तरूपः मन्मथस्य मदनस्य सुहृत्
मित्रं कृतान्तो यमः रुक्मः रुक्मवान् राजा नयनयोर्नेतुमशक्यः शक्यः
न चतुराः नागरकाः चातुरपदे रुकुशलाः इत्यं प्रति शब्दे सर्व-
भक्ति पीडादायी निरर्दः रेफयोर्वियोगः कथं नु सोढव्यः सहनीयो
भविष्यति। अत्र निदर्शनालङ्कारत्वं नाम ईदृशार्थस्य वस्तुनः
सम्बन्धः तदुक्तौ विवक्षायां इतीत्थंप्रकारयोर्हि कारणत्वमपि उपपद्यते
इति समुच्चयालंकारः। रुक्ष एव समुच्चयः सतां योगे रुक्षतां योगे
सदृक्षतां योगे च चर्चयिष्यति इति नपुंसकत्वाद्वेत्ता शून्यहेतोरिति शेषः
तत्र सतां योगे समुच्चयमुदाहरति कुलीनेति। हे राजन् कुलं रुक्मोल्लं
तेनोज्ज्वलं मूर्तिः रुक्मकान्तिः भद्रा श्रेष्ठा भोतः प्रोद्यः शुभशीलनी वेदरुक्मी
शोभना भुजयष्टिः रुक्मं रुक्मितशोभितं लक्ष्मीः स्फीता रुक्मेदृक्ष रुक्मुरा
प्रभुत्वं रुक्मोण्डनमुक्तिष्ठितं रुक्ते भावाः पदार्थाः रुक्मेतसुभगाः स्वभाव-
सुन्दराः सौम्ब रुक्मभिः भावैः रुक्मं इच्छमानो जनः भुवर्गं दर्शनीयमनं
रुजति रुक्नोति तव नु रुक्ते भावाः रुकुशाः दर्भजातिबन्धकाः सन्तीत्यर्थः।
रुक्त निर्मलकुलरूपे दर्भे तद्भावहेतौ सत्येव मदमूर्खादिकमपि। इत्युक्तेना-
पात्तमिति समुच्चयालंकारः। रुक्तमेव हेतुं सद्योगे चर्चयिष्यति इत्याह
रुक्त सतामेव योगः पूर्वोदाहरणे तु रुक्सतामेव योगः सदसद्योगे उदाहरति
रुक्शीति। भर्तृहरिणेन नीतिशतके पद्यमिदम्। रुक्शो भन्ने सेवकस्यूसरो
योगस्तेजाः क्षोभनो क्रान्ता गोलतैवनता। नहनाकृष्टा सारः काकार-
निगतनालिं पद्महीनं स्वाकृतेः शोभनाकृते मुखं वदनं रुक्मुरं
विद्याहीनं प्रभुः धनपराधः धनलुब्धः खलः दुष्टः कृतोपकारात्
एतानि सप्त ये मनुष्याः शल्यानि बाणतुल्यानीत्यर्थः। रुक्त रुक्ष-
शोभारूपे व्यधा हेतौ सत्येव गोलतैवनतादीनां रुक्मिन्यादिकमपि
व्यधा हेतुत्वेनोपात्तमिति सदसद्योगे समुच्चयः।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

अन्योन्यं समुच्चयालंकारं लक्षयति स त्वन्यदपि। यः गुणैकेषयः
युगपदेकक्रियो भवति स गुणैकेषयः समुच्चयः। गुणयोः
यौगपद्यं क्रियायाः यौगपद्यं गुणैकेषयाः यौगपद्यमिति त्रीण्येतानि
समुच्चयः। तत्र गुणयोः यौगपद्यमुदाहरति विदीर्णेति। हे नरपति
विदीर्णं रिपुखण्डितं सकलानामवनीनां कृतं येन तथाविधं इदं तव
बलं सैन्यं व्याप्तशौर्यं विमलं निर्मलं चन्द्रमावत् तीव्रप्रसन्नानां
कृष्णानां मुखानां मोचनानि जातानि। अत्र विमलत्वमोचनत्वयोर्गुणयोः
यौगपद्यमिति समुच्चयालंकारः। रिपुक्षयोः यौगपद्यमुदाहरति विक्रमेति।
वर्णाये चतुर्थे श्लोके तथा चक्षोभदत्। अथेति। तथा रिपुक्षया उर्वरया सह
मे मम एकपदे अकस्मात् एवं उत्सवः विपक्षाणां विद्रुतः उपनतः
जातः अद्रीणां दिनैः नवनागेश्वरोदयात् रम्यैः भूतं भवितव्यं
निरातपत्वरम्यैः व्यातपयोरुत्पत्तिरम्यैरित्यर्थः। अत्र उपनतो भवितव्यं
चेति रिपुक्षयोः यौगपद्यं चमत्कृतगम्यमिति समुच्चयालंकारः।
गुणैकक्रियोर्यौगपद्यमुदाहरति कलुषेति। हे महीपतेऽनुरक्तिन-
मेकैकसादरा स्वेतकमलतुल्या श्रीः शोभायास्य तादृशं तव चक्षुः
व्याप्तेषु शत्रुनिषेषु अकस्मात् कलुषं जातं तेषां राज्ञां वपुषि
व्यापदां विपत्तीनां कथाभिः प्रस्फुटं द्योतनेन। अत्र कलुषत्व-
पतनयोः गुणैकक्रियोः समुच्चयः। तत्तत इषमिति कलुषेति च
द्युतेर्गतीति च। अत्र वैधर्म्यमूले व्याक्षेपमूलैव एष समुच्चयः इति
रुद्रटः व्याहृ तन्मन्दम्। द्युतेर्गतिरिति इत्यादौ सामानाधिकरण्येन
क्रियेषयोः समुच्चयत्वादर्शनात्। कैयटस्तु सामानाधिकरण्येऽपि एष समुच्च
इत्याहुः तदपि न सम्यक् कृत्यप्रयोगस्य भावात् समुच्चय इत्यादौ
इत्यादौ वैधर्म्यमूलेऽपि क्रियेषयोः समुच्चयत्वदर्शनात्। समाधिमन्त
अलंकारं लक्षयति रत्नेति। रत्नेत्यनेनोक्तं वस्तु यत्क्रमेण काल
[illegible] अथवा समुच्चयः इत्यर्थः। रत्नस्य

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

वेदरोतः चक्षेपः। करोत्पर्षे उदाहरोत तद्गेहमिति। धन्यालोके उदाहृतमिदं पद्यम्। ग्रयं खेजः मुदामा देवस्य: इयतीं भूमिमनल्पां समारोपितः इत्याश्चर्यं तत् श्वश्रूः गेहं गता गत्वा भोजनस्य रन्धनेन्ध माक्षीत् इदानीं तु देवः स्वगात् लब्धः चारुः ग्रवन्त्याशो यस्य तादृशं सौन्दर्यं जातमित्यर्थः। सा पूर्वदृष्टा जरती जरद्धेनुः गौरेवासीत् इदानीं तु गजानां करेणां चटाश्रेणयोः नवीकृत सुधाः मृदुलत्वेन; तद्वत् ग्रासीत् इदानीं तु मधुस्वरं योषिता मँगनानां रंगीतकं गायनं जात मित्यर्थः। ग्रत्रैकस्मिन् खेजे तद्गेहतन्भोज्यादीनामनेकेषां सम्बन्धे दिवसैरीति क्रमेणान्वे निर्देशः। ग्रत्र पोतृप्तलंकार शंकां वारयति ग्रत्रेति। ग्रन्यस्यैव वस्तुनः हानं स्वीयवस्तु समर्पणं उपादानं परकीय वस्तुग्रहणं तयोः ग्रनेकोक्तत्वात् ग्रनेकवृत्तिस्तंकारः वीरवृत्तलंकारः। ग्रनुमानालंकारं लक्षयति ग्रनुमानमिति। साध्यसाधनयोः पदवचनं तदनुमानम्। साध्यं वह्न्यादेः। साधनं धूमादेरित्यर्थः; साध्यत्वेन साधनत्वेन च ज्ञोतपादनमनुमानालंकारः इति भावः। साधनपदार्थमाह पक्षधर्मेत्यादिना। पक्षधर्मत्वेन ग्रन्वयित्वेन व्योतरेकित्वेन च त्रिरूपो हेतुः साधनपदेनोच्यते यत्रानुमिनोति सः पक्षः यथा पर्वतो वह्निमान् धूमादित्यादौ पर्वतादेः तत्र हेतोर्वृत्तित्वं पक्षधर्मत्वं सपक्षे हेतावृत्ति ग्रन्वयित्वं विपक्षे हेतोरवृत्तित्वं व्योतरेकित्वम्। ग्रत्रिं हेतुमति पर्वतादौ ग्रारोपरूपः वह्न्यादेः ग्रनुमागव्यवच्छेदो ज्ञेयः साध्यसम्बन्धः साध्यत्वमित्यर्थः। उदाहरोत यथेति यत्रोत्थ ग्रत्र दृश्यमानाः लहरीवल्लयचलाश्चलाक्षेण्यः यत्र यस्मिन् विषये लक्ष्य भ्रुवं भ्रुकुटिं व्यापारयन्ती कटाक्षं कुर्वन्ती तस्मिन्नेव ग्रभी मर्ममेदिनः मारणः कामबाणाः सन्तनं पतीत तत्र दोषसम्बन्धेन

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ग्रवर्ती क्रोधनः क्रोधशीलः तेदृग् पक्षीकृतः यथा धनुर्यस्य

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

नत् यथा स्यात्तथा औच्चैतेषु चुगदि योजितेषु शेषु अंगेषु लेखनक्रि-
स्त्रि: श्यामः श्वासो न्मोचनानां श्वसतः पुंसो यावतीत्यर्थः। अत्र ईर्ष्य
रूपतानिपतन मर्मभेदि बाणकलसत्भ्व्यापारस्थानकत्वं साधनं पञ्चवृत्ति-
त्वेनोक्तं यथार्थे श्वसतः तादृशमदनधावनरूपं साध्यमुक्तं पञ्चदश्यां व्याप्ति:
सूचिता। पूर्वार्धोक्तहेतुना श्वसतः तादृशमदनधावनस्य साध्यस्य साधनाद-
नुमानालंकारः। विकल्पे विषयये नकिंचित् वैचित्र्यं नकोऽपि चमत्कारः
इत्यर्थः किन्तु साध्यसाधनवचनकृतमेव वैचित्र्यमिति नविभागो न कृतः
पौनरुक्त्यनामकमलंकारं लक्षयति नैवशेषणेति। यत्र यस्मिन्नलंकारे साकूतैः
सोद्भावैः विशेषणैः विशेषस्य पौनःपुन्येन पुष्टिः सा पौनरुक्त्यालंकारः। पौनरुक्त्येति
सकूतार्थमुपकरोतीति पौनरुक्त्यः सोद्भावशब्दः सोऽभिप्रायो यस्मिन्निति पौनरुक्त्यः
उदाहरति मैद्योजसः इत्यादि। किरातार्जुनीये तृतीये सर्गे पद्यमिदम्। धनुर्भृतः
भयः तस्य दुर्योधनस्य विधाने श्रद्धुरोः द्रोणस्यापि स्तोत्रितुं वर्तुं
वाग्मिनो न। कीदृशाः मैद्योजसः? तेजस्विनः इत्यर्थः मानधनाः मानिनः
धनार्जिताः धनयुक्ताः संपत्तिं लब्धकीर्तयः न संहृताः नष्टाः न
भेदवृत्तयः तेनायं दुर्योधनो रुदमूलो दुर्जयः इति व्यंग्यम्। अत्र मैद्योजसः
इत्यादिविशेषणानां धनुर्भृतः इति विशेषस्य पौनःपुन्येन तेन पक्षधानस्य
दुर्योधनस्य श्लाघनशीलः स्तौतीति पौनरुक्त्यालंकारः। श्वसृक्षार्थस्य
श्वसृक्षार्थकत्वस्येत्यर्थः। तत्साधने तथापीति बहूनीति सूत्रेविशेषेण-
गिति बहुत्वं विवक्षितमिति भावः एवगुणत्वात् उक्तादाहरणवदुपादान
वैचित्र्यमिति श्वसृक्षनोसिद्धमिति शेषः न तु दोषाभावत्वमात्रमेव इत्यलंकार-
कथने गौरवात् पतितः एवं च सोद्भाव विशेषणोपादानं श्वसृक्षलंकारे
भवतीति भावः। एतत्पर्यन्तमेव मम्मटाचार्याणां कृतिः यदुक्तं 'कृतिः
श्री मम्मटाचार्य वर्यैः पौनरुक्तावधिः। अत्र परः कृतिः शेषो विधायत्वाह-
सूत्रिण। व्याजोक्तिं लक्षयति व्याजोक्तिरिति। उद्भटस्य स्फुटस्य
वस्तुरूपस्य छद्मना कपटेन यत् निगूहनं गोपनं सा व्याजोक्तिः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

व्याजेनोक्तिः व्याजोक्तिरित्यन्वर्थं संज्ञा। निगूढमपि गुप्तमुद्भटमपीत्यर्थः
रूपं स्वरूपं कपमपि लिंगादिना प्रोक्तं स्फुटं दृढमना येन केनापि व्यवहारेण
व्यपदेशेन गुप्तमुपपद्यते गोप्यते। उदाहरति शैलेन्द्रेति। भवानीशंकरयोः नैवोह-
वृत्तान्तवर्णनमिदम्। शैवः शंभुः वः युष्मान् गुप्तवतात् रक्षतु। कीदृशः?
शैलेन्द्रेण हैमाद्रिणा प्रीतमाद्यमानं दीयमानं या गिरिजा पार्वती तस्याः हस्तस्य
उपगूढं सम्बन्धः गावे सः प्रत्यूषः तेन उल्लसत् गुप्तविभवत् यत् रोमाञ्च्या-
दिकं तेन विसंष्ठुलो व्यग्रहस्तः स चासौ गुप्तलिंगविभवव्यासंगतया
भंगेन व्याकुलः व्यस्तश्च शैलान्तःपुरैः हैमाकुन्ची जनैः बन्धादिभिश्च
दृष्टः भगवान् शिवः। हा नु हिमाचलस्य शैत्यं करेणः शैत्यं गुप्ताश्चर्यजनकत्व।
गुप्त पार्वतीकस्पर्शजन्यस्य सात्विकभावस्य रोमाञ्चोदयः हैमवत-
करस्पर्शनिमित्तकत्वेन कैतवात् व्याजोक्तिरलंकारः। पीरसंख्यां लक्षयति
किंचिदुद्दीति। गुप्त पृष्ठमपृष्ठं वा इति विभागः गुप्तवत् सर्वं लक्षणं तथा च
किंचिद् वस्तु पृष्ठमपृष्ठं वा कोपतं रत्नव्यतिरिक्तं पीतवादितं सत् स्वव्यवहारेण
स्वतुल्यं गुप्तं वस्तु व्यवच्छेदाय मत्तकलभेत पर्यवस्यति सा पीरसंख्यालं-
कारः। व्यवच्छेदाय व्यावृत्तये पर्यवस्यति पर्यवसानं प्राप्नोति सा पीरसंख्या गुप्त च
कथनं प्रश्नपूर्वकं भवति तदन्यथा गुप्तप्रश्नपूर्वकं च पीरदृष्टम्। व्यवहारमानस्य
व्यवच्छेद्यस्य प्रतीयमानता व्यंग्यता वाच्यत्वं शाब्दत्वं। इदमत्र कथं
पीरसंख्या प्रश्नपूर्विका गुप्तप्रश्नपूर्विकेति चेदुच्यते सापि प्रतीयमानव्यवच्छेद्या
वाच्यव्यवच्छेद्या चेति द्वयोरेव भेदयोः इत्यर्थः। यत् कौतुकातिशयोत्पन्नता
इतरव्यावृत्तेः तत्रैवालंकारः। प्रश्नपूर्विकां वाच्यव्यवच्छेद्यामुदाहरति
किंभूतमीक्षते? किमासेव्यमीक्षते। पुंसां नयनमासेव्यं कीदृशं? पुंसौरेतो
गंगायाः गुप्तनदं उत्तमं सौन्दर्यं समेतं तदीक्षत्यर्थः रत्नकान्ते
दृषदं किं वान्यत् कौस्तुभभृतो विष्णोः वक्षःपुरुषं पादयुगं नागेन्द्रगणादिः
गुप्तार्च्यं किं पुरुषं नचार्चं। गोमेदलक्षणं किं कक्षणदमा नरेंद्रादेः
यत्र पुंसौरेत सौन्दर्यादेरुत्प्रासस्य प्रोक्त्या चेतोः मनः तेनसौन्दर्यविमुग्धेन
रूपगुप्तरूपोपेत गुप्तमीक्षत समर्थ मनतीत्यर्थः। गुप्त गंगातटादेः सेव्यत्व-

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

किं शास्त्रपुराणादिना ज्ञानगतमपि तदवगमाय इदं पद्यमुक्तं किन्तु
गंगाभिन्न नदी तटादेरसे व्यत्यादेशतिपदकम् गंगा तटादेः ऐक्यत्वादिनमुक्त
मिति पौरस्त्येपम्। ज्ञान किमासेव्यमित्यादेरुत्तरपूर्विकेयम् ज्ञानोपमान-
व्यवच्छेद्यां पौरस्त्यामुदाहरति किं भूषणमिति। ज्ञान नीचे सुष्ठं
शोभनोशभूषणं किंतूपशः कीर्तिरेव रत्नम्। कार्यं कर्तव्यं किम्?
ज्ञायं चारितं शीलं। सेवितं सुष्ठु [illegible] किम्? तदोजः
व्योमाकाशादि ज्ञानरहितं चक्षुः किम्? शेषजनमुखेः न केनं
त्वदन्यः त्वदन्यः सदसत्विवेकं उत्कृष्टनिकृष्टविभागं को जानाति
न को मीत्पर्यः। ज्ञान पशः पशुतेः भूषणत्वादिकमादेत, सर्वत्रगत-
मेनेति न सर्वगमाप इदं पद्यमुक्तं किन्तु पशोरिव रत्नत्वादे-
भूषणत्वादिकं व्यवच्छेद्यमिति उत्तरपूर्विका मेयम्। ज्ञानउत्तरपूर्विकं
ज्ञानोपमान व्यवच्छेद्यां मुदाहरति कौटिल्यमिति। हे जयसि ते तव कच-
निचये केशसमूहे एव कौटिल्यं वसति न तु हृदये। कौटिल्यमत्र वक्रत्वं कपटं च
कार्यगणाद्यदेतेषु हस्तपादेषु पल्लवेष्वेव रागः न परपुरुषे। रागो ज्ञान
रोमनाशीतिश्च। कुचयुगले एव कठिनत्वं न तु हृदये। कठिनमत्र दृढता
निर्दयत्वं च। नयनयोरेव तरलत्वं न मनसि। तरलत्वमत्र चञ्चलत्वं
ज्ञानचापेक्षोत्वरत्वं। ज्ञान कथनमनुमानपूर्वकमिति शेषत्वमूह्यम्।
ज्ञानुमानपूर्विकां नाद्यव्यवच्छेद्यां मुदाहरति मौलिरिति। योषा बहुज्ञा महतां
महापुरुषाणां मौलिमालोन्नतः मेरौशैल एव न विभवे ऐश्वर्ये व्यसनं
रोषः शास्त्रे एव न युवतिरूपे मात्रात्रे चेन्ता यशस्येव न वपुषि
पीडेष्यते इत्यर्थः। ज्ञान कथनमनुमानपूर्वकमिति ज्ञानुमानपूर्विकेयम्।
कारणमालां लक्षयति यथोत्तरमिति। यथोक्तं उत्तरमुत्तरमर्थ इति
पूर्वस्य पूर्वस्यार्थस्य हेतुता कारणत्वेत् तदा कारणमालालंकारः। इद-
मुत्तरलक्षणं नरस्य पात्रे कारणत्वेऽपि बोध्यपेयम्। उदाहरति
जितेन्द्रियत्वमिति। पद्यमिदं सप्रमोत्लासे व्याख्यातम्। ज्ञान
जितेन्द्रियत्वात् विनयः ततो गुणज्ञता ततो जनानुरागः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तस्मात् सम्पदः इति पूर्वपूर्वस्य उत्तरोत्तरं प्रति कारणत्वात् काव्यलिङ्गम्।
हेतुमता सार्धमभेदो हेतोः काव्यस्य यत्रेदंतो ऽभिधानं क्रियते
हेत्वलंकारः इति हेत्वलंकारस्तु न लक्षितः यस्मिन्निति शेषः
यत्रापूर्वनिषेधादिरूपः रूपः उदाहरः चर्वणीयः न भूषणतामलंकारतां
महति चमत्कारित्वाभावात्। यथा। वसन्तवर्णनोदयम्।
अविरतं निरन्तरं कमलानां पद्मानां विकासश्रीः समृद्धः ये उत्पलेषु भ्रमराः
तेषां मदरुतः कोकिलानामानन्दकृत् लोलोत्कण्ठाधाः कृतः रम्यो
रमणीयः यत्र वसन्तसमयः कालः सम्पृक्तः रतेः उद्गच्छतीत्यर्थः
इत्यत्र कोमलानुप्रासमोहेनैव काव्यरूपतां भामहादयः समामनन्ति।
पुनः हेत्वलंकारकल्पनया रीतिपूर्वोक्तं काव्यलिंगमेव हेतुः
हेत्वलंकारः। उत्प्रेक्षालंकारं लक्षयति किंचेति। यत्
वैचित्र्यं उत्प्रेक्षणं क्रियया क्रियाहेतुना वस्तुना हेतोः पदार्थयोः मिथः
साम्ये जन्ये वैचित्र्यं चमत्कारः तदुत्प्रेक्षालंकारः। उदाहरति हंसानेति।

हंसानां सरोभिः श्रीः सार्यते उत्पलस्थानां हंसैः।
उत्प्रेक्षणमेव रसे उत्कर्षं केवलं करोति॥ रीतिसंस्कृतम्।

श्रीः शोभा सार्यते उत्कृष्टा क्रियते करोति गुरुकुर्वन्ति। उत्र
सरो हंसयोः साम्यं शोभाजनकत्वात् उत्प्रेक्षणालंकारः। द्वितीयं
उत्प्रेक्षणालंकारं लक्षयति उत्प्रेक्षेति। यत्र प्रकृतालंकारो उत्प्रेक्षते-
मानतः प्रकृतस्य उत्प्रेक्षणं कल्पनं तत्प्रथमः उत्प्रेक्षालंकारः प्रसरकृत् उत्प्रेक्षणं प्रकृते
रीति उत्प्रेक्षाभावं पुरोयं पटुरं चित्रयन् सहृदयः उत्प्रेक्षालंकारः। तद्यथ-
उदाहरणं लक्ष्मीकृत उदाहरति यथा इति। ध्वन्यालोके यथोदितम्।

योषाजङ्घाहरितदलताः कुतोऽस्माकं व्याधकृत्तपरस्य।
यावन् लीलालसमुखी गृहे पोरश्चक्रमते स्नुषा॥

रीति संस्कृतम्। केनाचिं योषाजं रति जरद्व्याधस्य उत्प्रेरितम्। हे
योषाजङ्घ योषाजङ्घकल्पः हरितदलताः व्याधकृत्तपरस्य [illegible]

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Shastri Pothana

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

एतस्माकं कुतः सम्भाव्यन्ते यावत् कुटिलाः चंचलाः श्यामलाः कुटिल केशाः यत्र तादृशं मरणं यस्याः एवंविधाद्दुःखा दुःखभार्यं गृहे परिवर्तन्ते परिभ्रमतीत्यर्थः वधूसमासक्तो मत्सुतो मृगयार्थं न गच्छतीति व्यज्यते अत्र हीत्यनन्तरं व्याधकुलोनामद्दुःखभार्यो भूत्वेन ताः उपरक्त रीते केचूद्- वचनं उक्तेन उत्तरवाक्येन कुतो नीयते इत्युक्तमालंकारोऽपह्नुतं काव्यलिंगं भवितुं अर्हतीति। उक्तस्य हेतुवचनस्य तादृग्नानुपपत्तेः हेतुत्वा- नुपपत्तेरित्यर्थः। हेतुर्हि यथा भवेत् जनको ज्ञापकश्च तत्र उक्तस्य हेतुवचनं न जनको हेतुः किन्तु ज्ञापकः ज्ञापकहेतोश्च न काव्यलिंग- विषयतेति भावः यतोऽनुमानमिति उक्तं अनुमानालंकारोऽपि भवितुं अर्हतीत्यर्थः। तत्र हेतुनाह एकधर्मित्वादि। एकस्य ज्ञोल्गतत्वेन साध्य- साधननिर्देशो हि अनुमानालंकारो भवति उक्तत साध्यं दुष्टत्वं साधनं मुखरीति एकस्मिन् ज्ञोल्गतत्वेन तेर्देशाभावात् नानुमानालंकारः लोकोत्तरकान्तगोचरतया प्रमाणान्तरागोचरतेत्यर्थः उक्तसम्भाव्यरूपं सम्भावयितुमशक्यमित्यर्थः ज्ञातव्यं हेतोरयमुक्तं तदुदाहरति कारिवसमेति।

कारिवसमा देवगीतः किं लब्धव्यं जनो गुणग्राही।
किं सौख्यं सुकलत्रं किं दुःखं यत् स्वलोत्तोत्रः॥

इति संस्कृतम्। निषमा कठिना कलत्रं भार्या स्वलो कुष्टः लोको जनः। अत्र कारिवसमा इत्यादेशो उक्तसूत्रेण देवगीतीति उक्तसूत्र ज्ञातव्यमुदाहरंतेका। एतत्पूर्तिकायां परिशेष्यायां उक्तव्यपोढ व्यवच्छेदे तात्पर्यम्। इह तु उक्ते तु वाक्यार्थे एवेवशब्दाति सर्वनाम्नः इत्यनयोः उक्तपरिशेष्यात्मकयोः विवेको भेदः। सूक्ष्मनाम्नः अलंकारां लक्षयति कुलेज्यीति। यत्र पारिशेष्यालंकारो सूक्ष्मः सदृश्यमवेदो पर्यः

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

कुलेजाः ज्ञापकात् लोक्तः स्वयमुक्तात् केनचित् व्यक्तेन

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

261

उन्मीलने नेत्रोन्मीलन उक्तादृशते तत् मुद्रमनामकोऽलंकार इत्यर्थः।
केनाऽपि ज्ञानात् इंगितात् वा रूपोदरन्यथात्वमाक्षा: चेष्टाविशेषः
इंगितमिति सहृदयमात्र वेद्य इति यावत्। एवं च ज्ञानादलोकितस्य
उन्मीलनं इंगितादलोकितस्य उन्मीलनं चेति द्वौ भेदौ मुद्रमना-
मालंकारोऽभिमत इति भावः। तत्र ज्ञानादलोकितस्योन्मीलन मुदाहरति
नवेति। काऽपि विदग्धा सखी नायिकामुखात् स्वोदन्तः वेदस्य
धर्मस्य बिन्दुना उन्नम्रेः सम्रेः मिश्रं कुंकुमं केशं निलंहृतं
रिक्त्वा विहस्य तन्व्याः नायिकायाः पुंस्त्वं पुरुषायितं व्यञ्जयन्ति
सूचयन्ति सति नायिकाहस्ते नखक्षतलक्ष्मं लिखित्वा लेखनीनखतत्पर्यः।
अत्र वेदधर्मसुरतप्रसङ्गतया सौभाग्यसौन्दर्यतया वाच्या मुद्रमना
पुरुषायितं नखक्षतलक्ष्मलिखनेन धर्मेण नायिकायाः व्यञ्जयन्तीति
मुद्रमनालंकारोऽयम्। इंगितादलोकितस्य उन्मीलनं उदाहरति एवमेवेति।
उन्मत्तोऽयं पद्यमिदम्। विदग्धया चतुरया कयाचित् उन्मीलिताया इयत
स्तन्यं यया स्पष्टतया नेत्राभ्यामर्पितं सूचितं उद्घाटितं रहस्यं येन तादृशं निटं ललाटं
संकेत काल अनागत एव तादृशं संकेतकालनिशासुखमित्यर्थः ज्ञात्वा लीलापद्मं
क्रीडासम्बन्धकमलं निमीलितं संकोचितमित्यर्थः। उन्मीलने नेत्रोन्मीलनेन
लोलात: तीक्ष्णलोलनेक्षणतया सूक्ष्मः लोभनः संकेतकालाभिलाषः लोभन्या
निशासूचकेन चक्षुर्निमीलनेन वेदर्षेः लोलया चञ्चलेक्षणः शेषसूक्ष्मालंकाराः।
सारनामकमलंकारं लक्षयति उत्तरोत्तरोत्कर्षः। उत्तरात् यथापूर्वया चमत्कृतेः
परः काव्यार्थः यस्मात् सोत्कर्षः यत्र उत्कर्षः चमत्कृतिर्यते तत्सा-
मालंकाराः। यथोत्तरोत्कर्षेण तत्तेन पर्यन्तभागे एव निश्चयान्तः
पर्यवसानात्। उदाहरति राज्ञेति। रुद्रटालंकारे पद्यमिदम्। राज्ञेत्यनुक्तकृत्यो
सारं उत्कृष्टं सारादिति सामान्ये नपुंसकं मृदुपदयोर्न क्षेत्रवत् उन्नतक्षेत्रोलं महाक्षेत्र
शक्यं यत्नेन शत्रुसामन्तैरपि कर्तुं यत्नेनाहन्तुमिति व्यस्तार्थं पुरं नगरं पुरे

सौधे सुधागृहे शीर्षे तस्मिन् दृष्ट्वा वैदग्ध्य [illegible]

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham.

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

एकदेशता सारूप्यमित्यर्थः। एकसंगतिं लक्षयति भिन्नेति। यत्र भिन्नकालकार्यकारणभूतयोः धर्मयोरुत्पत्तौ भिन्नत्वेन भिन्नदेशतया पुरुषभिन्नदेशतया युगपत् एककालत्वे द्योतनं सा एकसंगतिः। इह लोके यादृशं कारणं तादृशमेव कार्यं उत्पद्यमानं दृष्टं यथा धूमादीनां यथा शैत्यस्य वह्नेः शैत्यमेव धूमं जनयति न तु महानसीयो वह्निः पर्वतदेशे धूमं जनयति यत्र तु कार्यकारणयोः केनापि विशेषेण नानादेशतया भिन्नध्वनित्वेन युगपत् एककालावच्छेदेन द्योतनस्वभावत्वं सा तयोः एकसंगतिः। तत्यागात् एकसंगतिलक्षणाः हेतुफलतया रश्मिधूमादीनां इव दीपकप्रभाः समानदेशत्वरूपायाः संगतेः त्यागात्। उदाहरति नक्तं एति।

तस्यैव वृत्रः तस्यैव वेदना भणति तज्ज्ञो श्लोकम्।
दन्तक्षतं क्षोणितेन लिखाः वेदना सपत्नीनाम्॥ इति संस्कृतम्।

तस्यैव वेदना इति यज्ञो भणति यदीव तत्कलीकं ज्ञातं नखनिवेदा। अत्र लिखाः क्षोणितेन दन्तक्षतादि सपत्नीनामतीव क्लेशदायकः इत्यर्थविशेषद्योतकत्वेन वेदनायन्तक्षतयोः कार्यकालयोः भिन्नदेशतानित्यान्वितिं वैयधिकरण्यरूपासंगतिलक्षणाः। एकाश्च विरोधे बाधो विरोध्यबाधो विरोधाभासे बाधिकानवबोध्यः न विरोधाभासः। भिन्नाश्रयत्वेनैव कार्यकारणयोः विशेषितयोः इह एकसंगतिलक्षणे द्योतभासात् विरोध्ये तु विरोधाभासे तु एकाश्रयेणैव भिन्नदेशकयोरेकदेशवृत्तेः विशेषितत्वं एकत्वसम्भवे विरोधाभासलक्षणे इति शेषः पर्यवसितं व्यक्तितम्। एकत्वविषयप्रवाहेण उत्सर्गरूपे विरोधाभासरूपे व्यवस्थितत्वात् प्रकल्प्य बाधनादोषभयं ततः उत्सर्गो एकमनिर्वाहेते दनिष्पाद्यात् तथा नेवं भिन्नदेशकयोः एकदेशवृत्तेः विशेष्यः इति दोषः नैर्याशितमिति। एकसमयीति शेषः। समयं लक्षयति समयीति। यत्र भिन्नकालकार्यकारणत्वेनोपगतः हेत्वन्तरयोगात् कार्यं सुकृतं सुकालेन विनोदितं न समयीति सूत्रार्थः एकसंगतिः एककालेऽपि एकक्रियस्य कारणान्तरप्रबन्धानादेव नैयत्यं समयि-

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

रित्यर्थः । तौल्यं च सादृश्यस्य ज्ञानापेक्षेण तेनेच्छया संगतिरिच्छा च बोद्धव्या । उदाहरति मानोन्नतेति । काव्यादर्शे चन्द्रोदयम् । ज्ञप्ताः नापि ज्ञाताः मानं निराकर्तुं शीलयेषां ते मानिनः तेषां मानिनां उन्मादेन देवेच्छया मादकेन इदं घनगर्जितं मेघगर्जनं उर्वी उद्भूतम् । ज्ञत्र गादयतनयोः कार्णेन ज्ञारब्धस्य मानापगमस्य ज्ञानापेक्षिकघनगर्जितस्य कार्योद्दीपनत्वेन मानापगमहेतुत्वोदीनं भावः । सहनामकमलंकारं लक्षयति समेतीति । वस्तुविशेषयोः सम्बन्धः यदि योग्यतया ज्ञौचित्येन सम्भावितः तदा समालंकारः सः तुल्यतया मीलते इति समेतीति व्युत्पत्तेः । ज्ञनुरूपयोः योगे हि समः सम्भवति स च सतोरेव ज्ञसतोरपि सम्भवति इति सतोर्योगे ज्ञसतोर्योगे च द्वैविध्यः समालंकारः । योग्यता ज्ञनुरूपत्वं । सम्भावितः सर्वसम्मतः निपतनिषद्यध्यवसानं निश्चयः । सद्योग उदाहरति चानुशेति । ईक्षा मृगाक्षी चानुः ब्रह्मणः यत्नशिल्पं निर्माणकौशलं तदौचित्यस्य तदुत्कर्षस्य निकषस्थानं ज्ञौचित्यशून्य इति भावः । ज्ञयं देवोऽपि राजापि रसे रस-निकषे ज्ञनुपमः ज्ञसदृशः सामन्तदत्तसत्रः सामन्तेषु ज्ञधिकृतः इत्यर्थः यत् ज्ञनयोः मृगीक्षराज्ञोः सदृशं संगतं योगः समागमो देवात् ज्ञातं तदेतत् शृंगारस्य ज्ञस्य रक्तातपत्रं रक्तच्छत्रं राजपं उन्नतं गर्हम् । ज्ञत्र मृगीक्षराज्ञोः सतोर्योगस्य ज्ञौचित्यस्य औचित्ययोगवर्णनात् समालंकारः । ज्ञसद्योगे उदाहरति चित्रीमिति । विधाता ब्रह्मा देवात् ज्ञदृष्टयोगात् औचित्यायाः रचनायाः संविधाता कर्ता ज्ञातः यत् निम्ब-वृक्षाणां पारिजातेन पल्लवेन योगेन फलेन तेषां स्थितिः समूहः ज्ञात्वादनीया इदं चित्रं चित्रं यच्च रसतायाः फलसम्पदः कायलत-कला भक्षणशीलस्य तत्त्वकोविदः चोरुतः कामरूपो लोकः रसतन्मइत्व चित्रीमित्यर्थः । ज्ञत्र निम्बकाकयोः हेयोरपि नैकृष्टतया औचित्ययोग्यः

इति समालंकारोऽयम् ।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

विषम नाम्नमलंकारं चतुर्थं लक्षयति कार्यकारणयोरिव । यत्र कार्यस्य
सम्बन्धिनोः हेयाः गुणक्रियाभ्यां वैलक्षण्यात् अत्यन्तं वैसादृश्यात् श्लेषः
सम्बन्धः घटनां उपपद्यमानतां न इयात् न प्राप्नुयात् सः एकः
विषमः । यत्र कर्तुः क्रियायाः व्यापारस्य यत्नस्य तस्य अनाप्तिः
अप्राप्तिः एव भवेत् अत्युत् अनर्थस्य एव भवेत् सः द्वितीयो विषमः ।
कार्यस्य गुणक्रियाभ्यां कारणस्य गुणक्रियाभ्यां विरुद्धे कार्यस्य गुणेन कारणस्य
कारणस्य गुणो निष्फलो भवेत् सः तृतीयो विषमः । यत् कार्यस्य क्रियया
कारणस्य क्रिया एव सफला भवेत् सः चतुर्थो विषमः । सर्वत्र समतायाः
निरूपणात् एवं विषमत्वम् । क्रियायाः व्यापारस्य । अनुपार्जितमपि अयत्ना
अनायासोदितमपि । अनर्थमानभूत् । अनायासेन अप्राप्नुयात् । कारणस्य अनुकारणस्य
कारणसदृशस्य अनुकरणस्य सादृश्ये । तयोः कार्यकारणयोः । वैलक्षण्यात् ।
समो विषमश्चेति द्वौ समालंकारौ विपरीतस्वरूपः चतुरः चतुर्विधः विषमः
विषमालंकारः । तत्र विषमं विषममुदाहरति शिशीषायां । तत्सादृश्यान्-
धारेति पद्यमिदम् । शिशीषात् पुष्पादि मृदवंगी कोमलांगी इयमायतलोचना
विशालनेत्रा नासिकाच्च उन्नसा उन्नतेन मणिशो मुक्तहः अयं मदनानलः
मनसिजोगुः वन्हि । अत्र नासिकामदनानलयोरत्यन्तं वैलक्षण्यात् तयोः
सम्बन्धो अनुपपद्यमानतैव वक्रशब्देन अतीव शीतविषमालंकारः ।
हेतोः विषममुदाहरति सिंहीक्षीति । सिंहीक्षासुतः सिंहीशयुः तस्मात्
संत्रस्तो भीतः यः शशः सः स्वकार्यं क्षीत्वा शीतांशुं चन्द्रं क्षीवन्
तत्र अन्यो हेतोः सिंहीक्षासुतो राहुः साक्षयं सत्वरं तं शशं
जगृहे भक्षयामास इत्यर्थः । अत्र शशरूपफलाभावे अन्येन ग्राहकेण
अनर्थः । तृतीयं विषममुदाहरति तृणमाहृत्य कथं इति । तृणमाहृत्यकथंचिते पद्यमिदम् ।
तमालः तापिच्छवृक्षः तडत् नीला नीलवर्णा कृपाणलेखा यस्याः
तस्याः [illegible] तोयं रजो रजः शशेवन्धुपाण्डु पित्तोल्बणं

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

यश! कीर्तिं ब्रह्मते जनयति एतत् चित्रम्। यत्र कार्ष्ण्यापाण्डो:
यशः कृपाणयो: पाण्डु नीलाद्यो गुणो विकल्पविति निजमालंक्या:।
अतुर्यं विषममुदाहरणेन ज्ञानदीपिनि। कटयालंक्यो पद्योमदम्। हे
कुवलयदलतोलाञ्चने त्वं इमम् श्यामलं ज्ञानं ददासि त्वयैव
जनितो निद्रः मे मम शरीरमत्यन्तं तापयति। यत्र नायिका-
निद्रयो: अत्यज्ञानस्य: ज्ञानदुर्दानं तापक्रियो विरहे शैत्य अतुर्यो
विषमालंक्या:। एवं विपुलेनेति। अत्यल्पे पद्योमदम् सागरयामल्पं विशेषो:
विपुलेन विस्तृतेन कोक्षा। उदेति मुखपद्मे चलपद्मस्य भुवनेन अतुर्दशजगोत्त
चपि चौतनेन। स: पुन: सोऽपि वेधसु ब्रह्मणा मया पुरा चित्रमा जगल्लोमदम्
मयेनभ्रमेण मदोनक्षेण असकलया असम्पूर्णया दृशा यशुषा वेधचीत:।
अत्र साद्यमवलोकन: इत्यर्थ:। यत्र कोकशरीरयो: ब्रह्मणवासापनयोर्यो:
पानकर्तृत्व पानकर्मत्व रूपं योग वैधर्म्यं पानपदार्थयो: भेदेऽपि ब्रह्मदोषचाक्षु
बोध्यमिति विषमत्वम्। द्वितीयं ज्ञेयज्ञानामानमलंक्यां लक्षयति महतो विशालयो: ब्रह्मीश्वतास्रयो: ब्राध्येपाद्यापो: ब्रह्मश्रपाश्रयेणो ब्राधा।-
चेमौ तनुत्वेऽपि अल्पत्वेऽपि क्रमात् क्रमेण यत्महोयांसौ स्यातां महत्यत्तया
द्योतनाद्येन तत् द्वितीयमधिकम्। उदाहरणे ब्रह्मे शेत ब्राख्यादर्शपद्योमदम्।
हे भूपाल भुवनोत्रतपादं भुवनत्रयाभ्यन्तं विशालं विस्तृतं ब्रह्म
ब्राश्चर्यं यत् यस्मात् ब्रत्र भुवनोत्रतपादो मानुमशक्योऽपि नेयशोऽशेष:
मिति ब्रह्मकाशं लभते इत्यर्थ:। ब्रत्र ब्रह्मश्रपस्य भुवनोत्रतपस्य
महत्पदा वर्जनं ब्रह्मणि ब्राध्येमस्य यशस: वैपुल्येऽपि तथेजया तेनापि
भुवनोत्रतपादात्य ज्ञोध्यस्य चाकृतो हेतु:। द्वितीयमधिकमुदाहरति पुरान्तो
मार्च्यकाव्ये पद्योमदम्। पुरान्तकाले चलपद्मेन द्योतमहता: शांत्यो न
उपतिष्ठता: ब्रह्मणो नीवा: येन तादृशस्य वैद्योऽहं: शोकृष्णस्य यस्मा
तेनो शरीरे जगोत्त व्यतुर्दशभुवनोन सोवकाशं सावकाशं यथास्यात्तथा
ब्रह्मासत एवमतान तत्र तत्रा [illegible] नादृस्य पो ब्रह्मागम:

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

आगमनं तत्संभवा तज्जन्या मुदः प्रीतयः न अमुः न मोन्त स्म ।
अत्र आधेयभूतायाः मुदः महीपत्वं बीजतम् । उत्पलीकं लक्षयति
प्रीतपक्षीकृति । प्रीतपक्षं शत्रुं प्रीतिकर्तुमशक्तेन केनापि कर्त्रा
तत्तुल्येतत्पक्षीतपक्षस्य उत्कर्षाय या तदीयस्य प्रीतपक्षस्य सम्बन्धिनो
अत्यस्य नैराकिया तत् उत्पलीकं आलंकाराः इत्यर्थः । न्यक्कृतिपक्षमि
अन्यकारणमपीत्यर्थः । विपक्षं शत्रुं नैराकर्तुमशक्तेन
अन्यकेन केनापि केवलेन कर्त्रा । तदीयस्य प्रीतपक्षीयस्य ।
अन्योन्याश्रये चेऽन्योन्ये । तत्प्रीतीनन्यीभूतं तन्निमित्तादिकं मूढतया मूर्ख-
तयेत्यर्थः अन्योन्युपनेचेऽन्यत्र प्रीतियोगेन शत्रौ नैननेन नेतव्ये प्रीत
तदीयः तत्तो तत्तस्मिन्धी विजीयते अन्योन्यभूयते । तदीयत्वे उत्पलीकं
उदाहरति त्वयेति । हे मुग्धे त्वं नैनोर्जितमनसमवरूपः जितकाम-
सौन्दर्यः सन् च कोकते भवति त्वयि अनुरक्ता अतः अस्मः
अनुशयात् द्वेषादेव यन्नोऽपि यत्तः यस्मैः तां तापयते । अत्र स्वरूप-
नैर्जयेन स्वशत्रुभूतं नापकं जेतुमशक्तेन कामेन तत्प्रीतीनन्यिभूतायाः
तदीयकामिन्याः पीडनात् उत्पलीकालंकाराः । द्वितीयमुदाहरति पश्येति ।
साध्यकान्ये पद्यमिदम् । कायाः वेशाद्याः नैगृह्य द्वेषेन गृहीतः अंगी -
कृतः निग्रहो नियोऽयेन तथाविधः कृतो नैचपक्षीयः राहुः सान्द्र
श्रीकृष्णरूपं क्रोधेन चित्तसमे अन्धकर्तुं अन्धकेन अन्धमर्थः सन्
कालवक्त्रसदृशाकृतेः श्रीकृष्णमुखं तुल्यं इदुं चन्द्रमसं अन्धुनाति
बाधते ग्रसते । अत्र स्वशत्रुभूतं श्रीकृष्णं जेतुमसमर्थेन राहुण
श्रीकृष्णसम्बोधनः इन्दोः पीडनात् उत्पलीकालंकाराः इत्येवं
तद्वैपता श्रीकृष्णसम्बन्धता सम्बन्धिनः श्रीकृष्णसम्बन्धिनो
मुखस्य साम्यात् सादृश्यात् तस्य सम्बन्धादित्यर्थः । मीलितं लक्षयति
समेतेति । निजेन स्वभावसिद्धेन अन्यागन्तुकानिमित्तनिरपेक्षेण सम्यक् औचित्येन वा
तत्तत् साधारणं लोचनयोः पद्मेन मनः क्षोभकं वस्तु तुल्यं भवति ।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Pratishthan

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

मन्तेनगूहते तैशेषीयते तन्मीलितमलंक्या(:)। स्वभावेनेन लक्षण...

मीलितमुदाहरति यथांगानि। यथांगयो:(ग्रा)न्तेया: तेन यत्नेन हेतो: तेन मधुरा: कोमला: नखा नखक्षतमर्मकाश्च यत्र यासु तथाभूता: रेख: उत्पल: विलासभरेण विलासातिशयेन अन्यथा मन्दा गतिर्गमनं यत्तेन यान्तं मनोहरं सुखं इति एवंप्रकारेण मृगदृश: कामिन्या: यंगके कोमलांगे लीलया स्वत: सुप्तेन उल्लसितं तत्तस्मात् हेतो: मधुपानस्य उदय: न संलक्ष्यते न ज्ञायते कृतदंशोऽपि। यत्र हि नखक्षतानां आगन्तुत्वात् स्वाभाविकं हरितालादिरंगानुकं लिंगचिह्नं स्वाभाविकं ज्ञाप्यांगं भवेदपि तत्रापि भवेदेवं यदि रागस्य हरितालादिवत्स्य दर्शनादुपलम्भात्। यत्रागन्तुकेन तत्कर्मणा मीलितमुदाहरति यं इति। हे राजन् यं त्वत्तोऽन्यत्रागमने यत्नकृतेऽपि वा शंकिनार्थ्यर्यैषां ते नखक्षिप्ता: रात्रय: निशा: तेनहेतुना सन्ता: हेमाद्रे: कन्दरासु गुहासु निलीनकोऽन्य उत्पुलकं उद्गतरोमाञ्चं तत्कर्म कन्दर्पोद्दीपनं यंगमुद्वहतामपि तेषां शत्रूणां हेमयं शत्रुनिहन्तृणां बुध: पण्डितोऽपि यत्नेन ज्ञाता न भवति हेतुकत्वेनापि पुलकादिदर्शनात् इति भाव:। यत्र कन्दपुलके यंगस्य लिंगे हेमाद्रिकन्दरा तेनासंज्ञामर्थात् स्वीयशीतस्पर्शादेस्य यत्नागन्तुकत्वेन तत्कार्यभूतयो: कम्पपुलकयोरपि आगन्तुकत्वं भवेत् समानतया अथेऽपि कम्पपुलकयोरुपलम्भात्। यत्र लाक्षणात् हेमाद्रिकन्दरा तेनासंज्ञकत्वात् स्वीयशीतस्पर्शादेस्य ज्ञातस्य तत्प्रभवयोरपि शैत्यजन्ययोरपि लाक्षणं यंगागन्तुकत्वेन समानता शैत्यजन्यलाक्षणता तयो: कम्पपुलकयो: उपलोकितत्वात् दृष्टत्वात्। एकानेकौ लक्षयति ज्ञाप्यत इति। यत्र पीनतालंकारो यथाचूर्वं पूर्वं पूर्वं वस्तु गतिर्यं चं उत्तरत्वं नन्तु विशेषणतया ज्ञाप्यते ज्ञाप्यते वा तं पीनालंकारं

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

~~[illegible]~~। वोक्तमा नाइल्येन इत्यर्थः। तदुक्तौ चमत्का-
भावात्। स्थापनं विधानम्। ग्रन्थोऽयं निषेध्यः। तत्रोदाहरणे
प्रदर्शयति। तत्सादृश्यं कथ्यते यद्योमदम्। यस्यां ग्रन्थोक्तनायिकायां पुरोजिगृक्षणि।
नवरंगनाभिः श्रेष्ठकांचनाभिर्नोहताभिः वरांगनाः रूपपुरस्कृताभिः युवतीभिः मालतीः
रूपं समुन्मीलितसदोवलासं सुमुन्मीलिताः उत्फुल्लाः सदोवलासाः यस्मिन्
तादृशीम्। ग्रत्र पूर्वपूर्वस्मिन् उत्तरोत्तरस्य विशेषणतया विधानादिति श्रृंखला-
वत्पत्यलंकारः। निषेधे उदाहरति न तोदिति। भट्टिकाव्ये यद्योमदम्। यत्
सुधाकंकजं न तत् जशान्तजलं न यत् श्लोनषट्पदं तत् पंकजं न
यः कलं नन्नुलं गोक्ष्यतं यस्य तादृशं न ग्रन्यो षट्पदो भ्रमेण न यत्
मनोरथज्ञं न जहार तत् गोक्ष्यतं न। ग्रत्र जले पंकजस्य पंकजे षट्पदानां
तत्र गोक्ष्यतस्य तथापि प्रवोहारितापाः विशेषणतया निषेधः इत्येका-
वत्पत्यलंकारः। स्मरणं स्मारयति यथेति। यः पदार्थः केनोचित् ग्रसाधारणेन
धर्मेण ग्रनुभूतः ग्रनुभवोद्बोधीकृतः सः कालान्तरे स्मरोजनके तत्सदृशे
तत्पदार्थे वस्तुनि दृष्टे सति यत् तमेव ग्रनुभूतं न स्मरति सः
स्मरणालंकारः। उदाहरति नेत्रेति। जलक्रीडावर्णनमिदम्। चलदृशां
ग्रस्मदादीनां नेत्रभृंगकुवलयेषु लहरीभिः तरंगैः जलक्रीडासमये यद्भ्रमजलं
प्लावितं सञ्जीवितं तद्भवैः कुवलयैः सुरतकालिनकण्ठच्छेदसदृशैः
सुरतार्भः सुरांगना सुरतकण्ठकितानां सुरतसम्बन्धिकण्ठच्छदीनां स्मरणात्।
ग्रत्र सुरतकालिनकण्ठच्छेदसदृशैः सुरतकालिनकण्ठकितानां ग्रनुभूतत्वात्
स्मरतीतीति तादृशदर्शनजन्यं स्मरणं ग्रलंकारः स्मरणालंकारः। ग्रन्यमुदाहरति
